ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्र-
जृम्भाविडम्बिविकटोदरमस्तु चापम् ॥ ३० ॥

[इति यथोचितं परिक्रम्य निष्क्रान्ताः सर्वे]।

इति कौशल्याजनकयोगो नाम चतुर्थोऽङ्कः।

इति कर्मणि षष्ठीप्रतिषेधः]। एतत् चापं मदीयं धनुः, ("धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम्।" इत्यमरः। अस्त्रियाविति उक्तेः पुंसि प्रयोगस्य बाहुल्येन सर्वैरादृतत्वेऽप्यत्र "भवाद्दृतसज्जहस्तचापाभरणलाञ्छनम्" इति नपुंसकप्रयोगोक्तेः चापशब्दस्य क्लीबे प्रयुक्तमिति ज्ञेयम्)। ग्रासेत्यादि।—ग्रासाय जगतः कवलीकरणाय, प्रसक्तं, हसत् भक्षणाह्लादेन विकटहास्यं कुर्वत्, यत् अन्तकस्य कृतान्तस्य, वक्त्रयन्त्रं यन्त्राकारं वक्त्रं, तस्य या जृम्भा व्यादानं, तद्विडम्बि तदनुकारि, अत एव विकटं विशालम्, उदरम् अभ्यन्तरं यस्य तादृशम्, अस्तु भवतु। लोकसंचयं कर्तुं प्रवृत्तस्य कृतान्तस्य वदनं यथा प्रलयसमये प्रचुरभक्ष्यलाभानन्देन साट्टहासं व्यात्तं भवति, तथैव मम चापं विकटां जृम्भां विधाय निखिलं रिपुसैन्यं सपदि निहन्त्वित्यर्थः। [अत्र जिह्वया सह ज्यायाः, दंष्ट्रया सह कोट्याः, घनेन सह चापघोषस्य, यन्त्रेण सह वक्त्रस्य, जृम्भया सह चापविजृम्भणस्य अवैधर्म्य-साम्यानामुपदेशात् पञ्चोपमा अलङ्काराः, तेषाञ्च परस्परसापेक्षत्वात् सजातीय-सङ्करः, अपि चान्तकवक्त्रस्य जगद्ग्रासकालिकहास्यस्यासम्बन्धेन तत्सम्बन्धोक्ते-रतिशयोक्तिरलङ्कारः, एतेन सह प्रोक्तोपमानां नैरपेक्ष्येण स्थितेः संसृष्टिः, किञ्च एक एवाहं युष्माकं सर्वेषां रघिसैनिकानां सपदि संचयं करिष्यामि इति च अत्र व्यज्यते, इत्यलङ्कारेण वस्तुध्वनिः। शब्दालङ्काराः छेकानुप्रासवृत्त्यनु-प्रासाद्य यथायोगं ज्ञेयाः। संयुक्तादिवर्णानां श्रुतिदुःखदायकत्वेन दुःश्रवत्वदोषा-नुकूलत्वेऽपि अत्र वीररसानुकूलत्वेन पुनर्गुणत्वमेवेति ज्ञेयं,—"वक्तरि क्रोधसंयुक्ते वाच्येऽत्यन्तं समुद्धते। रौद्रादौ तु रसेऽत्यन्तदुःश्रवत्वं गुणो भवेत् ॥" इति दर्पणात्। अत्र वीरो रसः, ओजोगुणः गौडी च रीतिर्ज्ञेया]। वसन्ततिलकं वृत्तम् ॥ ३० ॥

चतुर्थाङ्कस्य सङ्क्षेपः ।

अथाङ्केऽस्मिन् प्रथमत एव रङ्गालयप्रविष्टयोः सौधातकिभाण्डायननामधेययोः परस्परमालपतोर्द्वयोर्वाल्मीकिशिष्ययोरन्यतरेण, समागतातिथिसत्कारारम्भरमणीयं तपोवनं हरिणपरिपीयमाणोपमधुरसखण्डविनष्डितम् इतस्ततः सञ्चितान्नव्यञ्जनसम्भार-सौरभामोदितनासापदनामालोक्य सानन्दं विज्ञापितोऽपरः सौधातकिः शिष्टानध्याय-सम्भावनया परां प्रीतिमधिगच्छन् सोपहासं तेषु वर्षीयसः परिचयमपृच्छत् । तेन चैवं पृष्टो विरक्तश्चास्य सोपहासवचनेन, भाण्डायनः सपरिचयमेषामागमनकारणं न्यजिज्ञपत्, न्यषेधच्च तमेवं वृथाप्रलापिनं चापल्यात् । सौधातकिरपि सहचर-मुखात् तस्य वशिष्ठेति नामाकर्ण्य वत्सतरीसहितमधुपर्कग्रहणादमुं वृकादित्वेन सम्भावयन् पुनरप्युपाहसत् ।

अथ श्रुतिप्रमाणेन मधुपर्कस्य समांसत्वं प्रमापयन् भाण्डायनः सौधातकिना पुनरपि विदेहनायके जनके तद्व्यभिचारमापृच्छ्यमानः निवृत्तानिवृत्तमांसभेदेन तत् व्यवस्थापयन्नपि, पुनरपि सहचरेण तेन विदेहपतेर्निवृत्तमांसत्वं कथमित्य-पृच्छ्यत । तदेतमाचचाणश्चासौ सुतायाः सीतायाः निष्कारणनिर्वासनदुर्विपाक-श्रवणोत्थस्य वैराग्यसन्तत्यवलम्बनमेव तत्कारणमचीकथत्, अवदच्च सुहृत्साचात्-कारमेव आगमनकारणम् । अथ कौशल्यादिभिरस्य साचात्कारः सम्भवी न वेति सौधातकिना पृष्टो भाण्डायनः वैवाहिकेन साचात्कारार्थं कौशल्यामानेतुं तत्समीप वशिष्ठेनारुन्धत्याः प्रेषणवृत्तान्तमकथयत् । ततः श्रुताखिलवृत्तान्तः सौधातकिरपि सहचरैः सम्भूय क्रीडया अनध्यायमहोत्सवमनुष्ठातुमियेष । भाण्डायनोऽपि प्राचेतसाश्रमवाहिर्भूतं तरुमूलमधितिष्ठन्तं जनकमालोकयन् साचेपं सह सहचरेण अन्तर्दधे । इति विष्कम्भसङ्क्षेपः ।

अथ चिन्तासनाथः विदेहनाथः सन्ततमन्तर्ज्वलताऽतिमहता निखिल-वासनाविदाहिना शोकाग्निना दन्दह्यमानमानसः, प्रखरकरपत्रवदतिदुःसहं मर्म-विदारकं शोकावेगमसहमानः, समवगच्छन् दारुणदुःखदग्धस्यापि देहस्य स्वतः पाताभावं, विभावयन् चात्मघातस्य चिराय घोरनरकोत्पादकत्वं, विलपन् तामेव निष्कारणनिर्वासितां स्वसुतां सीतामुद्दिश्य वारंवारं, स्मरंश्चानियतानितः स्मितोज्ज्वलितं शैशवसम्भूतविरलदशनराजिविराजितं तदीयममलं मुखकमलं

खिद्यमानः, वशिष्ठारुन्धतीगङ्गावह्निभास्करादिभिः सर्वैः स्वयञ्च विदितविशुद्धभावां स्वसमक्षमेवमतिविषमां दशां गमितां सीतामालोक्यापि तदानीमप्रतिकुर्व्वतीं दारुणप्रकृतिं तत्प्रभृतिं भगवतीं वसुमतीं विस्मरणेनासौ तिरश्चकार।

अथ नेपथ्यादुत्थितम् "इत इतो भगवतीमहादेव्यौ" इति कञ्चुकिवाक्यमाकर्ण्य दूरप्रसारितदृष्टिर्गृष्टिप्रदर्शितमार्गां कैवल्यामरुन्धतीमागच्छन्तीमालोक्य, पर्य्यालोच्य च क्षणं महादेवीशब्दप्रतिपाद्यां प्रबलविषादजातविकृतिं क्षौमदीनमलिनाकृतिम् अन्तर्विरूढशोकशल्यां कौशल्यामिति कथमपि निश्चिन्वन्, तदालोकनसमुद्बोधिताखिलपूर्वस्मृतिः मूर्त्तिमदानन्दरूपाया अपि तस्याः साम्प्रतमीदृशमतिभीषणमाकृतिपरिणाममालोकयन् अतिकातरः तामेव उद्दिश्य भृशं विललाप।

कौशल्याऽपि स्वात्मपराधवतीं मत्वा त्रपापरवशा सहसा वैवाहिकसमीपं यातुमनीहमाना स्वयं कृतानुशयं हृदयं विकृतावस्थमपि स्वस्थं विधाय, कञ्चुक्यरुन्धतीभ्यां संस्मारितनिजकर्त्तव्या कथमपि शनैरनुसर्त्तुमारेभे। तद्दुःखाचिन्तहृदया वशिष्ठजायाऽपि एवमतिनिर्विण्णां तां सान्त्वयन्ती दूरत एव विपुलविटपिमूलनिषण्णमतिविषण्ण मिथिलानायकं जनकं दर्शयामास। दूराद्दृष्ट्वा चेनमतिविषमसुताशोकाभिमलिनं राजानमसौ स्वकीयं पूर्व्वकृतदुष्कृतसमवायरूपमतिनिकृष्टमदृष्टमिव शुशोच।

जनकोऽपि कञ्चुकिकौशल्योपेतामरुन्धतीमागच्छन्तीमालोक्य, स्वयमुपसृत्य प्रथमं लोकलोकवन्द्याम् अवनितललोलेन शिरसा समभिवन्द्य, समधिगम्य च सकलकल्याणनिदानमाशीर्वचनं तस्याः, पुरःस्थितं कञ्चुकिनमामन्त्र्य, प्रजापालमात्रत्वेन कौशल्यामध्यक्षिपत्, अपृच्छच्च तमेव तस्याः कुशलवार्त्ताम्। कौशल्यापरिचये प्रजापालमात्रत्वकथनात् अन्तर्निगूढार्थं जनककृतमधिक्षेपमनुचिन्तयन् दुःखितान्तःकरणः ऋष्टिरपि, निष्करुणे सीताविवासने कौशल्यायाः सर्व्वथा निर्द्दोषत्वं प्रतिपादयन्, समर्थयमानश्च रामकृतस्यापि दारुणारुन्तुदकर्म्मणः अपरिहार्य्यनियतिनिमित्तकत्वं, सीताशोकक्लिष्टामपि तामधिक्षिपन्तं राजानमनुनीय ततो न्यवर्त्तयत्।

मर्म्मनिहितदुःखशल्या कौशल्याऽपि इत्थं दुःसहशोकसन्तापतप्तं हृदयविदारणं जनकवचनं क्षते क्षारमिवातिदुःसहं मन्यमाना मुमोह। ऋष्टिना चैवं प्रतिबोधितो विदेहनाथोऽपि सततं सीताशोकेनातिदुःखितामपि तां दारुणवचनैः पुनरपि [illegible] चानुस्मृताखिलपूर्व्ववृत्तान्तः तमेवातिप्रियं द्वितीयमिव [illegible] मोहविलुप्तचेतनां कौशल्यां निश्वास- [illegible] बोधयत्।

एवं प्रतिबोधिता चासौ सततमानन्दितायाः सीतायाः स्मितविकसितमनिन्द्यं वदनारविन्दमनुस्मरन्ती निष्कारणनिर्वासितामतिपूतां तामुद्दिश्यनामल्य कथमपि प्राणैर्वियुक्ता भृशं विललाप। तामेवं विलपन्तीमालोक्य समधिकक्लेशवती कृपापरवती अरुन्धती ऋष्यश्रृङ्गाश्रमे कुलगुरुणाऽभिहितं सत्यं तथ्यमनुस्मारयन्ती कथमपि तां हताशामाश्वासयामास।

अथाश्रमसमीपे सहसा शिशूनां समपनीतहृदयविषादं कलकलनादमाकर्ण्य सर्व्वेषु कथमयं, कुतस्त्यो वेति निपुणं निरूपयत्सु जनकः शिष्टानध्यायात् क्रीड़तां वटूनाम् अयं कोलाहल इत्यकथयत्। अथ कौशल्या दूरादेव तेषु वटूषु कञ्चिदतिमधुरतराकारं सर्व्वथाऽनुकृताभिरामरामसुखाकृतिं लोचनलोभनीयं बालकमालोक्य नातिशयं विस्मयमुपागमत्। ततश्चारुन्धत्याऽपि तथैव सम्भावितोऽसौ बालकः कञ्चुकिना खचिताखिललक्षणेन क्षत्रियब्रह्मचारीति निरणायि। ततो जनकेनाऽपरिचयं पृष्टया अरुन्धत्याऽपि कुतस्त्योऽयमिति निर्णेतुं नाशक्यत। जनकस्त्वतीवकौतूहलाऽऽक्षिप्तहृदयः शिशुमिममाह्वातुम्, अस्य परिचयञ्च विज्ञातुं तमेकञ्चुकिनं वाल्मीक्याश्रमं प्रेषयामास। कञ्चुकिना समाहूतोऽपि नायं क्रीड़नपटुरवाऽऽगमिष्यतीति प्रतर्कयन्ती कौशल्या सविनयं गृहीतदृष्टिवचनं बालकमचिरात् समीपमुपागतमालोक्य विसिष्मिये। मिथिलाधिपोऽपि शिशोरस्य सन्दर्शनमात्राकृष्टचित्तः कमप्यमन्दमानन्दसन्दोहमवाप।

विहितव्यवहारपटुर्वटुरपि सविनयमुपसृत्य, नमस्कृत्य चातिविनीतः सर्वानर्चनीयान् पर्य्यायक्रमेण, समधिगम्य च तेभ्यः अवितथान् शुभाशीराशीन् अरुन्धत्या उत्सङ्गे गृहीतः पुनः कौशल्योत्सङ्गमलञ्चकार। कौशल्याऽपि तमुत्सङ्गे कृत्वा चिराभ्यस्तरामस्पर्शानुरूपमतिकोमलस्पर्शमनुभूय, निरूप्य च निपुणं न केवलं रामभद्रस्य, अपि तु सीतायाश्च प्रकृत्याकृत्योः सविशेषं सौसादृश्यमस्मिन्नतिविस्मिता तदेव वैवाहिकमदर्शयत्। विदेहाधिपतिनाऽपि सर्वं सुनिपुणमालोक्य सविषादं तथैवेति समर्थितम्। अथाकृतिगतसौसादृश्यसन्दर्शनेन प्रबलाशाक्षिप्तहृदया मनसा सीतासुतत्वेन बालकमसुमाशङ्कमाना, कुतस्त्यस्त्वमिति तन्मुखादेव आकर्णयितुमिच्छुरस्य जननी जनकश्चास्ति न वेति समपृच्छत्, अवागच्छच्च तं बालकमविज्ञातपितृपरिचयं केवलमाशैशवं वाल्मीकिस्वामिकमिति।

परस्परमेवमालपद्भिः तैः सर्वैः सहसा नेपथ्ये ...

समयावि... निरणायि च तत्कृतम्...

समदर्शयच्च विदेहपतिमुखात् लक्ष्मणात्मजत्वेन तस्य परिचयं विज्ञाय स्वस्य रामायणकथाप्रावीण्यं विस्तरात्। जनकोऽपि तं तथा कथाऽभिज्ञं विज्ञाय, दशरथात्मजानां कति सुताः केषु केषु च दारेषु अजायन्तेत्यपृच्छत्। तेनैवं पृष्टोऽसौ बालकोऽपि कविना प्रणीतस्यापि तत्कथांशस्य सर्व्वथाऽप्रकाशितत्वेन तस्मिन् स्वस्यानभिज्ञत्वमविज्ञपत्, व्यजिज्ञपच्च ज्यायसा कुशेन परिरचितस्य तद्भागस्य अभिनयार्थं भरताश्रमप्रेरणवृत्तान्तम्। एतावताऽप्यपरितृप्तेन मिथिलेशेन प्रकाशित-भागस्यैव अवधिभागं पुनः पृष्टोऽसौ बालकः आसन्नप्रसवायाः निर्व्वासितायाः सीतायाः लक्ष्मणकर्तृकं निर्ज्जने वने परित्यागमेव प्रकाशितभागस्य अवधिमकथयत्।

तच्चाकर्ण्य तामतिदुःखितामुद्दिश्य सर्वेषु भृशं विलपत्सु, अदृष्टपूर्व्वाश्वसन्दर्शनोत्-फुल्लहृदयाः केचन मुनिबालकाः झटिति प्रविश्य तत्स्वरूपवर्णनपुरःसरं तदद्भुतमालोकयितुं लवमप्याचकर्षुः। लवोऽपि स्वां सहचरकृतानवस्थां विज्ञाप्य तैर्मान्यैः कथमपि अनुनतः सत्वरं तत्रोपस्थाय, समवलोक्य च तमश्वमतिनिपुणम्, आश्वमेधिकोऽयमिति निरणयत्। सहचरास्तु तद्वचसि अप्रतीता अश्वपालानुद्दिश्य "किमर्थोऽयमश्वः" इति पृच्छन्तः "अयमश्वः पताकेयम्" इत्यादिकमतिगर्वितमुत्तरमश्रौषुः। लवोऽपि तदाकर्ण्य, साटोपम् अश्वपालानाहूय सावज्ञमधिचिक्षेप। तेन चाति-क्रुद्धः कश्चित्सदर्पसैनिकः समागत्य लवमतिमात्रमधर्षयत्। अथ कोपप्रस्फुरिता-धरम् अतिभीषणाकारं तं सैनिकमालोक्य भीतभीतैर्वटुभिः तस्मात् शुष्ककलहा-न्निवर्त्तितुं मुहुरनुरुद्धः क्रुद्धयातिमात्रं साटोपसैनिकवचसा, विप्रकृतः सिंह-शावक इवातिदृप्तो लवः सशरशरासनाकर्षणेन निजवचनानुरूपं शौर्य्यातिशयं प्रदर्शयन् भयाभीषितान् सहचरानाश्वासयामासेति।

इत्यशेषशास्त्राटवीसञ्चरणपञ्चानन-कुलपतिकल्प-"बि, ए" इत्युपनामक-

श्रीमज्जीवानन्दविद्यासागर-भट्टाचार्य्यविरचितायां, तदात्मजाभ्यां

श्रीमदाशुबोधविद्याभूषण-श्रीमन्नित्यबोधविद्यारत्नाभ्यां

परिवर्त्तित-परिवर्द्धितायां सुखबोधिनीसमा-

ख्यायाम् उत्तररामचरितव्याख्यायां

चतुर्थोऽङ्कः ॥ ४ ॥

अथ पञ्चमोऽङ्कः ।

[नेपथ्ये]। भो भोः सैनिकाः ! जातं जातमवलम्बन-मस्माकम् । (क)—

नन्वेष त्वरितसुमन्त्रनुद्यमान-
व्यावल्गत्प्रजवनवाजिना रथेन ।
उद्घातप्रचलितकोविदारकेतुः
श्रुत्वा वः प्रधनमुपैति चन्द्रकेतुः ॥ १ ॥

(क) भोः भोः सैनिकाः,—योद्धृवर्गाः, अस्माकं—सैनिकानाम्, अवलम्बनम्—आश्रयः, सुसहाय इति यावत्, जातं—सम्पन्नं, लब्धमित्यर्थः। लवेन निहन्यमानानाम् अस्माकं सेनासमूहानां रक्षणार्थं सेनानीः चन्द्रकेतुः त्वरितमेव समायाति, अतो न युष्माभिः भेतव्यमिति भावः।

अथ राजसैनिकानामधिनायकस्य चन्द्रकेतोः त्वरितमेव युद्धस्थलसमागमन-प्रकारमाह, नन्वेष इति।—ननु भोः सैनिकाः!, एषः पुरत एव दृश्यमानः इत्यर्थः, चन्द्रकेतुः तदाख्यः अस्माकमधिनायकः सौमित्रितनयः, वः युष्माकं, प्रधनं युद्धं, समाकर्ण्य श्रुत्वा, ऋषिकुमारैः सह संवृत्तं तुमुलं युद्धमुपश्रुत्येत्यर्थः, त्वरितेति।—त्वरितेन त्वरान्वितेन, अत्युत्कण्ठितेनेत्यर्थः, सुमन्त्रेण तन्नाम्ना सारथिप्रवरेण, नुद्यमानाः प्रेर्यमाणाः, सञ्चाल्यमाना इत्यर्थः, व्यावल्गन्तः प्रधावन्तः, प्रजवनाः अतिवेगशालिनः, वाजिनः अश्वाः यस्य तथाविधेन, रथेन स्यन्दनेन करणेन, तादृशं रथमारुह्येत्यर्थः, उद्घातेति।—उद्घातेन बन्धुरदेशेषु प्रतिघातेन, उन्नतावनत-भूमिषु वेगेन सञ्चालनात् प्रतिहतिं प्रापितेन हेतुनेत्यर्थः, प्रचलितः भृशं विकम्पितः, कोविदारकेतुः कुद्दालध्वजः, काञ्चनारकाष्ठनिर्मितध्वजदण्ड इत्यर्थः, यस्य तथाविधः, ("कोविदारे चमरिकः कुद्दालो युगपत्रकः" इत्यमरः) उपैति आगच्छति ; अस्माकं युद्धवार्तामुपश्रुत्य सत्वरं रणभूमिमेवागच्छति, तेन चास्माकमिदानीमवलम्बनं जातमिति भावः। [अत्र प्रजवनत्वं प्रति व्यावल्गत्वस्य हेतुत्वेनोपन्यासात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारः, तथोत्तरार्द्धे केतुः केतुरित्यत्रान्त्ययमकालङ्कारश्चेत्यनयोः नैर-

[ततः प्रविशति सुमन्त्रसारथिना रथेन धनुष्पाणिः
साद्भुतहर्षसम्भ्रमश्चन्द्रकेतुः] ।

चन्द्र । आर्य्य सुमन्त्र ! पश्य ।—

मुनिजनशिशुरेकः सर्वतः सैन्यकाये
नव इव रघुवंशस्याप्रसिद्धः प्ररोहः ।
दलितकरिकपोलग्रन्थिटङ्कारघोर-
ज्वलितशरसहस्रः कौतुकं मे करोति ॥ २ ॥
किरति कलितकिञ्चित्कोपरज्यन्मुखश्री-
रनवरतनिगुञ्जत्कोटिना कार्मुकेण ।

पेच्छेण स्थितः संस्पृष्टः] । प्रहर्षिणी वृत्तम् ;—"त्र्याशाभिर्मनजरगाः प्रहर्षिणीयम्" इति लक्षणात् ॥ १ ॥

अथ चन्द्रकेतुः लवस्य शौर्य्यातिशय्यं शरीरसंस्थानञ्च समवलोक्य विस्मय-परवशतां व्यातनोति, मुनिजनेति ।—नवः नूतनः, अचिरोद्गत इत्यर्थः, रघु-वंशस्य रघुकुलस्य, अप्रसिद्धः अभिनवोदयात् सर्व्वथा परिचयाभावेन सर्व्वत्र प्रसिद्धिमनधिगत इत्यर्थः, प्ररोह इव अङ्कुर इव, एकः एकाकी, असहाय इत्यर्थः, मुनिजनशिशुः मुनिदारकः, प्रच्छन्नं रघुवंशीयं तेजः बिभ्रत् कश्चिदयमृषि-कुमार इत्यर्थः, एतादृशालौकिकतेजसां रघुकुलादृते कुत्राप्यदर्शनादिति भावः ; सर्व्वतः सर्व्वस्मिन्, सैन्यकाये सैन्यव्यूहे, हस्त्यश्वरथपादातरूपसेनासमुदाये इत्यर्थः, दलितेति ।—दलितानां निर्म्मथितानां, करिकपोलानां हस्तिगण्डस्थलानां; ये ग्रन्थयः सन्धिभागाः, तेषां टङ्कारेण शराघातजनितेन टमित्याकारकभीषणशब्देन, घोरं भया-नकं यथा तथा, ज्वलितानि प्रदीपितानि, पाषाणसमकठोरकरिकुम्भेषु पतनात् अग्नि-ज्वालायुक्तानीति यावत्, शराणामायुधानां, सहस्राणि यस्य तथाविधः सन्, निशित-शरसहस्राणि विसृज्य गजेभकोटिभागान् विपाटयन् योद्धृवर्गांश्च तथाविधशरजालेन विह्वलीकुर्व्वन्नित्यर्थः, मे मम, कौतुकं कुतूहलं, करोति जनयति । रघुकुल-सच्छायः कोऽयं हि मुनिबालकः संग्रामे अलौकिकशौर्य्यातिशय्यं प्रकटीकृत्य आयुधवर्षणेन करिकुलानि रथिवर्गांश्च व्याकुलीकुर्व्वन् मम विपुलां प्रीतिं जनयतीति समुदितार्थः । [नवाङ्कुरेण सार्द्धं मुनिजनशिशोरवैधर्म्यसाम्योपदेशादुपमाऽलङ्कारः] । मालिनी वृत्तम् ॥ २ ॥

भङ्ग्यन्तरेण बालस्यास्य वीर्य्यातिशय्यं प्रकटीकरोति, किरतीति ।—कलितेन

समरशिरसि चञ्चत्पञ्चचूडश्चमूनाम्
उपरि शरतुषारं कोऽप्ययं वीरपोतः ॥ ३ ॥

आश्चर्यमाश्चर्यम् !!

सुमन्त्रः । आयुष्मन् !—

अतिशयितसुरासुरप्रभावं शिशुमवलोक्य तवैव तुल्यरूपम् ।
कुशिकसुतमखद्विषां प्रमाथे धृतधनुषं रघुनन्दनं स्मरामि ॥ ४ ॥

समुद्भूतेन, किञ्चित्कोपेन ईषत्क्रोधेन, रज्यन्ती रक्तरागवती, लोहितायमानेति यावत्, मुखश्रीः वदनशोभा यस्य तथोक्तः, अतितेजस्वितया अन्येषां वीरत्वख्यातिनसहिष्णोः लवस्य कोपोदयात् मुखमण्डलस्य रक्तिमरागः ज्ञेयः। अपि च, चञ्चन्त्यः रणकर्म्मणि समन्तात् मस्तकसञ्चालनेन इतस्ततः चलन्त्यः, पञ्चचूडाः पञ्चसंख्यकाः शिखाः यस्य तथोक्तः, मस्तककम्पनात् चलित-काकपक्ष इत्यर्थः। (एतेन "एकशिखस्त्रिशिखः पञ्चशिखो वा" इति बौधायन-स्मरणात् कृतचूडाकर्म्मणां रघुकुलसन्तानानां पञ्चशिखाधारणं कुलाचारः आसी-दित्यनुमीयते इति ज्ञेयम्); कोऽपि अज्ञातनामधेय इत्यर्थः, अयं वीरपोतः वीर-शिशुः, समरशिरसि रणमूर्द्धनि, युद्धवेलाग्रभागे अवस्थितः सन्नित्यर्थः, अनवरतेति ।— अनवरतं निरन्तरं यथा तथा, निगुञ्जन्त्यौ शब्दायमाने, कोटी अटन्यौ यस्य तथा-विधेन, कार्म्मुकेण धनुषा, चमूनां सैनिकानाम्, उपरि सेनासमूहोपरीत्यर्थः, शर-तुषारं बाणतुहिनं, किरति वर्षति; अतिक्षिप्रहस्ततया अजस्रबाणवर्षणात् कुमारनिक्षिप्तशरराजयः करकावर्षणानीव अन्वभूयन्त चन्द्रकेतुसैनिकैरिति भावः। [अत्र तुषारैः सह शराणां साधर्म्यात् लुप्तोपमाऽलङ्कारः, छेकानुप्रासवृत्त्यनुप्रास-शब्दालङ्कारौ यथायोगं द्रष्टव्यौ। शराणामसंख्येयत्वद्योतनाय तुषारसाम्यं प्रदर्शितं, तेन न परिमाणगतन्यूनत्वादनुचितार्थतादोषशङ्का कार्य्येति]। मालिनी वृत्तम् ॥ ३ ॥

अथ सुमन्त्रः कुमारे लवे शौर्य्येण शरीरलावण्येन च सर्व्वथा राघवसाम्यं विनिर्द्दिशति, अतिशयितेति ।— आयुष्मन् ! दीर्घायो ! चन्द्रकेतो !, "आयुष्मन् रथिन् सूतः" इत्यालङ्कारिकवचनात् । अतिशयितः अतिक्रान्तः, सुराणां देवानाम्, असुराणां दितिसुतानाञ्च, प्रभावः वीर्य्यं येन तथाभूतं, तवैव भवत एव, तुल्यरूपं समानाकारम्, आकारेण भवत्सदृशशौर्य्यशालिनमित्यर्थः, शिशुम् अमुं बालकम्, अवलोक्य दृष्ट्वा, कुशिकसुतस्य कुशिकनन्दनस्य विश्वामित्रस्य, मखद्विषां यज्ञविघात-

चन्द्र। इयमन्वेकमुद्दिश्य भूयसामारम्भः इति हृदयमपत्रपते। (ख)—

अयं हि शिशुरेककः समरभारभूरिस्फुरत्-
करालकरकन्दलीकलितशस्त्रजालैर्बलैः।
क्वणत्कनककिङ्किणीझणझणायितस्यन्दनै-
रमन्दमददुर्दिनद्विरदवारिदैरावृतः॥ ५॥

कानां राक्षसानां, प्रमाथे संहारे, कौशिकक्रतुहन्तॄन् मारीचादिनिशाचरसमूहान् निहन्तुमित्यर्थः, धृतधनुषं कार्म्मुकधारिणं, रघुनन्दनं रामभद्रं, स्मरामि चिन्तयामि; रणकर्मणि अस्य बालस्यालौकिकं विक्रमं निरुपमं लावण्यञ्च समवलोक्याहं विस्मयविवशो मन्ये, पुनः बालरूपीभवन् भगवान् रघुनाथः विश्वामित्रसत्रे क्रतुविघातिनः राक्षसान् निहन्तुं संप्रवृत्तः किमु? इति भावः। आकारेण पराक्रमेण चायं बालकः रामसदृश एव प्रतिभाति इत्याशयः। [पुरा किल विश्वामित्रप्रार्थनया रामचन्द्रः सलक्ष्मणः राज्ञः दशरथस्यादेशात् तदीयं सत्रं गत्वा यज्ञद्रुहः राक्षसानवधीदिति रामायणी वार्त्ता। अत्र सदृशवस्त्वनुभवात् रघुनन्दनस्मृतेरुदयात् स्मरणालङ्कारः, तथा शिशौ सुरासुरप्रभावातिशायित्वस्यासम्बन्धेऽपि तत्सम्बन्धोक्तेः असम्बन्धे सम्बन्धरूपातिशयोक्तिरलङ्कारः, अपि च तवैव तुल्यरूपमित्युक्तेरुपमा च, एषाञ्चान्योन्यमपेक्षतया स्थितेः सङ्करः]। पुष्पिताग्रा वृत्तम्॥ ४॥

(ख) तु—किन्तु, एकम्—असहायम्, इमं—बालकम्, उद्दिश्य—अभिलक्ष्य, भूयसां—बहूनामस्मत्सैनिकानाम्, आरम्भः—युद्धोपक्रमः, अभूदिति शेषः, इति—अस्माद्धेतोः, हृदयं—मानसम्, अपत्रपते—लज्जते; एकेनानेन शिशुना सह सर्व्वेषामस्माकं रणोद्यमः सैन्यसमवायानाम् अशक्तिसूचकतया अतीव लज्जाजनक इति भावः।

अथ लवस्य शौर्य्यातिशय्यं विवृणोति, अयमिति।—अयं पुरतः दृश्यमानः, एककः एकाकी, शिशुः हि बाल एव, समरेति।—समरस्य युद्धस्य, भारे अतिशये, तुमुले एतस्मिन् संग्रामे इत्यर्थः, भूरि प्रभूतं यथा स्यात्तथा, स्फुरन्ति देदीप्यमानानि, करालानि भीषणानि, कराः हस्ताः, कन्दल्यः इव गुल्मभेदा इव, [इत्युपमितसमासः] ताभिः, गुल्मविशेषसदृशसुविशालैः सुदृढैश्च करैरित्यर्थः,

सुमन्त्रः । वत्स ! एभिः समस्तैरपि किमस्य ? किं पुनर्व्यस्तैः ? (ग)

"करायां कन्दलीभिः प्ररोहैः शाखाभिः अङ्गुलीभिरित्यर्थः" इति केषाञ्चित् व्याख्यानं न मनोरमं, कोषादौ प्ररोहार्थे कन्दलीशब्दस्य प्रयोगादर्शनात्, तथाहि,—("कन्दलं त्रिषु कपालेऽप्युपरागे नवाङ्कुरे। कलध्वनौ कन्दली तु मृगगुल्मप्रभेदयोः ॥" इति मेदिनी)। कलितानि परिगृहीतानि, शस्त्रजालानि आयुधवृन्दानि यैः तथाविधैः, अपिच, क्वणन्तीभिः शब्दायमानाभिः, कनकस्य सुवर्णस्य, किङ्किणीभिः क्षुद्रघण्टिकाभिः, झणझणायिताः अझणझणाः झणझणाः भूताः, झणझणेत्यव्यक्तं शब्दं कुर्वन्तः इत्यर्थः, ["अव्यक्तानुकरणाद्—" (५।४।५७पा०) इति डाचि, "डाचि विवक्षिते—" (वा०) इति द्वित्वे च स्थितात् झणझणाशब्दात् "लोहितादिडाज्भ्यः—" (३।१।१३पा०) इति क्यषि कृते सिद्धस्य झणझणायेति नामधातोः कर्त्तरि निष्ठायां रूपमेतदिति ज्ञेयम्)। स्यन्दनाः रथाः येषां तैः, रथकिङ्किणीशब्दानां झणझणेत्याकारकाव्यक्तनिनादेन सर्व्वाः दिशः वधिरीकुर्व्वद्भिः इत्यर्थः, अमन्दैः प्रभूतैः, मदैः दानवारिभिः, दुर्द्दिनानीव मेघाच्छन्नानि अहानीव, रणोन्मत्ततया अनियतमेव मदजलक्षरणात् मेघाच्छन्नदिवसवत् प्रतीयमाना इत्यर्थः, ये द्विरदाः हस्तिनः, ते एव वारिदाः मेघाः येषु तैः, वर्षासु मेघाच्छन्नेषु अहःसु नवजलधराः यथा निरन्तरमेव जलानि वर्षन्ति, तथैवाऽमीद्विरदा हि दानवारिभिः भूमितलमभिषिञ्चन्तीति समुदितार्थः। अमन्दः अनल्पः, मदः मदस्रावः, दुर्द्दिनं वर्षमिव येषां तादृशाः, द्विरदाः गजाः, वारिदाः मेघा इव येषु तथोक्तैः इति वा विग्रहः। बलैः असमत्सैन्यैः, आवृतः आच्छादितः, अभूदिति शेषः; एकं हि बालकं पराभवितुं प्रभूतानामस्मत्सैनिकानामुपरोधः निरतिशयां मे लज्जां जनयतीति भावः। (अत्र करैः सह कन्दलीनां तथा दुर्द्दिनैः सह द्विरदानाञ्च साम्योपदेशात लुप्तोपमा, एवं द्विरदेषु मेघानामभेदाध्यासात् निरङ्गरूपकमलङ्कारः, एतेषान्तु नैरपेक्ष्येण संस्थितः संसृष्टिः]। पृथ्वी वृत्तम् ॥ ५ ॥

(ग) समस्तैरपि—निखिलैरपि, सम्मिलिततया स्थितैरपीत्यर्थः, एभिः,—सैनिकैः, अस्य—शिशोः लवस्य, किम्—फलम् ; एते सेनासमुदायाः सम्मिलिताः सन्तः युध्यमाना अपि एकाकिनः अस्य शिशोः किमपि कर्त्तुं न शक्नुवन्तीति भावः। व्यस्तैः,—विभक्तैः, किं पुनः ?—विभज्य स्थितानां कथा दूरत एवास्तामिति भावः।

चन्द्र । आर्य्य ! त्वर्य्यताम्, अनेन हि महानाश्रितजन-प्रमाथोऽस्माकमारब्धः । (घ) तथाहि,—

आगुञ्जद्गिरिकुञ्जकुञ्जरघटाविस्तीर्णकर्णज्वरं
ज्यानिर्घोषममन्ददुन्दुभिरवैराध्मातमुज्जृम्भयन् ।
वेल्लद्भैरवरुण्डमुण्डनिकरैर्वीरो विधत्ते भुवः
तृप्यत्कालकरालवक्त्रविघसव्याकीर्य्यमाणा इव ॥ ६ ॥

(घ) आर्य्य !—पूज्य सुमन्त्र !, त्वर्य्यतां—त्वरा क्रियतां, त्वयेति शेषः, सत्वरं रथः चाल्यतामिति भावः । अनेन—एतेन शिशुना, महान्—अतिशयः, आश्रितजनानाम्—उपजीविसैनासमूहानां, प्रमाथः,—ध्वंसः, आरब्धः,—अनुष्ठितः; अयोन्मुखानामस्मत्सैनिकानां संरक्षणाय मया सत्वरं युद्धस्थलं गन्तव्यम्, अतो भवता तूर्णं सवेगं रथः नीयतामित्याशयः ।

अथ बालकस्यालौकिकं युद्धपाटवं व्याचष्टे, आगुञ्जदिति ।—आगुञ्जन्त्यः ज्यानिर्घोषश्रवणेन प्राणभयात् अतीव गभीरं बृंहितध्वनिं कुर्व्वन्त्यः, गिरीणां पर्व्वतानां, ये कुञ्जाः लतागृहाः, तेषु याः कुञ्जराणां हस्तिनां, घटाः घटनाः, समुदायाः इत्यर्थः, ("करिणां घटना घटा" इत्यमरः) तासां विस्तीर्णः भूयस्तया उत्पादितः, कर्णानां श्रवणानां, ज्वरः पीड़ेति यावत्, येन तथाविधं, मौर्व्वीटङ्कारमुपश्रुत्य प्राणभयात् समन्तात् बृंहितं कुर्व्वतां गिरिचराणां नागानामपि श्रवणेन्द्रियपीड़ां जनयन्तमित्यर्थः; आगुञ्जतां सम्यक्तया गर्ज्जतां, गिरिकुञ्जकुञ्जराणां पर्व्वतनिकुञ्जचराणां हस्तिनां, घटाभ्यः समूहेभ्यः, विस्तीर्णः प्रदत्तः, कर्णज्वरः कर्णव्यथा येन तयोक्तम् इति वा विग्रहः, निभृतस्थानप्रियेभ्यः वन्यगजेभ्योऽपि दुःश्रवरवेण श्रवणपीड़ां संयच्छन्तमित्यर्थः, अमन्दैः अनल्पैः, गम्भीरैरित्यर्थः, दुन्दुभीनां रणवाद्यविशेषाणां, रवैः शब्दैः, आध्मातं परिपूर्णं, प्रवर्द्धितमिति यावत्, ज्यानिर्घोषं शिञ्जिनीनिनादम्, उज्जृम्भयन् आविष्कुर्व्वन्, उत्पादयन्निति यावत्, वीरः शूरः लवः, वेल्लद्भैरवेति ।—वेल्लतां विचेष्टमानानां, समन्तात् चलतामित्यर्थः, भैरवाणां भीषणानां, रुण्डानां कबन्धानाम्, अपमूर्द्धक्रियायुक्तकलेवराणामित्यर्थः, ("कबन्धः कथ्यते रुण्डः" इति हलायुधः) ये मुण्डनिकराः शिरःसमूहाः, आयुधसमूहैः निकृत्ताः सन्तः स्वदेहात् विभिन्नस्थानपतिताः मस्तकनिवहाः इत्यर्थः, तैः, (यद्यपि मुण्डविरहितक्रिया-युक्तकलेवराणामेव रुण्डशब्दवाच्यतया रुण्डेषु मुण्डयोगो न घटते इति शङ्क्यते,

सुमन्त्रः । [स्वगतम्] । कथमीदृशेन सह वत्सस्य चन्द्रकेतोर्द्वन्द्वसम्प्रहारमनुजानीयाम् ? [विचिन्त्य ।] अथवा इक्ष्वाकुगृहवृद्धाः खलु वयं, प्रत्युपस्थिते च का गतिः ? (ङ)

तथाऽपि तेषां योद्धृशरीराणामायुधादिभिः छिन्नेषु मुण्डेषु कबन्धभावो जनितः, तेषान्तु मृतदेहानां पिशाचोपहतानामिव अधुना कबन्धभावमापन्नत्वात् तत्र प्राक्तनमुण्डयोगमभिप्रेत्य "रुण्डमुण्डनिकरैः" इत्युक्तमिति ज्ञेयम्) भुवः रणभूमीः, तृप्यदिति ।—तृप्यतः प्रभूतभक्ष्यभक्षणेन तृप्तिमापन्नस्य, कालस्य कृतान्तस्य, यत् करालं भीषणं, वक्त्रं मुखं, तस्य विघसैः भुक्तावशिष्टैः, ("भक्तं विघसो यज्ञशेषभोजनशेषयोः" इत्यमरः) व्याकीर्य्यमाणाः इव समाच्छाद्यमानाः इव, व्याप्यमाना इवेत्यर्थः, बिभर्त्ति करोति । जगद्ग्रसितुमभ्युद्यतस्य कृतान्तस्य यथेच्छमुपभोगात् परितृप्ततया भयङ्करात् तदाननविवरात् विगलितैः अस्मत्सैन्यानां शिरोभिः रणभूमिरियं समाच्छन्नेव प्रतीयते इति भावः । अहो ! सुमहानस्मत्सैन्यसंचयः क्षियते वीरेणानेन, तत् त्वरितमेव मया यातव्यम् एतेषामस्मत्सैनिकानां संरक्षणायेति तात्पर्य्यम् । [अत्र कुञ्जरघटानां कर्णज्वरासम्बन्धेऽपि तत्सम्बन्धोक्तेः असम्बन्धे सम्बन्धरूपातिशयोक्तिरलङ्कारः, तथा भुवः व्याकीर्य्यमाणत्वस्य सम्भावनयोत्कीर्त्तनादुत्कटैककोटिकसंशयसमुदयेन वाच्यां क्रियोत्प्रेक्षाऽलङ्कारः, एतयोश्च नैरपेक्ष्येण स्थितेः संसृष्टिः । गुञ्जतेः भ्रमररुतार्थकतया प्रसिद्धेः कुञ्जरध्वनौ तथा प्रसिद्धेरभावात् तत्र तत्प्रयोगकृतः ख्यातिविरुद्धतादोषः "आगुञ्जद्भिरि" इत्यत्र "आबृंहद्भिरि" इति पाठेन समाधेयः, "बृहि शब्दे च" इति भौवादिकबृहिधातुना सिद्धेः, "बृंहितं करिगर्जितम्" इत्यमरोक्तेश्चेति ज्ञेयम्] । शार्दूलविक्रीडितं वृत्तम् ॥ ६ ॥

(ङ) कथं—केन प्रकारेण, ईदृशेन—अद्भुतशौर्य्यशालिना अमुना लवेन इत्यर्थः, वत्सस्य—आयुष्मतः, द्वन्द्वसम्प्रहारं—द्वन्द्वस्य—एतयोः द्वयोरित्यर्थः, सम्प्रहारः,—युद्धः तं, द्वन्द्वयुद्धमिति यावत्, अनुजानीयाम् ?—अनुमोदयानि ? अनुमन्येयेत्यर्थः ; अमितपराक्रमशालिनाऽनेन सह युद्धे यदि काऽपि चन्द्रकेतोः क्षतिः स्यात् तर्हि महाननर्थः उत्पद्येतेति भावः । इक्ष्वाकुगृहवृद्धाः,—इक्ष्वाकूणाम्—इक्ष्वाकुवंशीयानां, गृहे—भवने, वृद्धाः,—वृद्धत्वं गताः, अत्र स्थित्वा वर्षीयांसः सम्भूताः इत्यर्थः, प्रत्युपस्थिते—सम्मुखमापतिते अस्मिन् संग्रामे इति यावत्, का

चन्द्र। [सविस्मयलज्जासम्भ्रमम्]। धिक्, प्रतिनिवृत्तानि सर्वतः सैन्यानि मम!! (च)

सुमन्त्रः। [रथवेगमभिनीय]। आयुष्मन्! स एष वाग्विषयीभूतस्ते प्रवीरः। (छ)

चन्द्र। [विस्मृतिमभिनीय]। आर्य्य! किं तन्नामधेयमाख्यातमाख्यायकैः? (ज)

गतिः?—कः अभ्युपायः? युद्धकरणात् कथममुं निवारयामः? यतः निखिलसैन्यसंहारकारिणा अनेन बालेन सह युद्धोपदेशं विना कोऽप्यन्यः विधिरत्र न दृश्यते इत्यर्थः, वयमाशैशवात् इक्ष्वाकूणां भवने स्थित्वा सदैव संग्रामानिवर्त्तनरूपं तेषां कुलधर्म्मं पश्यामः, एवञ्च यद्यपि तद्भवतु एव, तत्सदाचाराचतये अवश्यमेव कुलधर्म्मं विजानता मया चन्द्रकेतवे समरकरणोपदेशः प्रदातव्यः इति भावः।

(च) सविस्मयलज्जासम्भ्रमं—लवस्यासामान्यं युद्धकौशलं दृष्ट्वा विस्मयः, एकाकिना लवेन सह युद्धं कर्त्तुमसमर्थानां स्वसैनिकानां विमुखीभावं दृष्ट्वा लज्जा, अपिच स्वयमुपस्थाय युद्धे तेषां साहाय्यं कर्त्तुं सम्भ्रमः,—त्वरा, तैः सह वर्त्तमानं यथा तथेत्यर्थः, आहेति शेषः। सर्व्वतः,—सर्व्वाभ्यः दिग्भ्यः, सर्वतोभावेनेत्यर्थो वा, प्रतिनिवृत्तानि—विमुखीभूतानि, सर्व्वासु दिक्षु पलाय्य गतानीत्यर्थो वा, सैन्यानि—बलानि, धिक्—निन्दामीत्यर्थः; एकाकिना अमुना वीरेण पराजितान् रणभूमेश्च परावर्त्तिनः अस्मद्वीरपुरुषान् अतश्च तिरस्करोमीति भावः; युद्धभूमौ स्वचमूयाणां पृष्ठप्रदर्शनस्य घृणीकरत्वादित्याशयः।

(छ) रथवेगं—स्वकीयस्यन्दनस्य जवम्, अभिनीय—नाटयित्वा, आहेति शेषः। आयुष्मन्!—चिरजीविन्!, स एषः,—पुरतोऽयं दृश्यमानः इत्यर्थः, एतावन्तं कालं यद्विषयिणीं कथामावां कथयावः इति यावत्, प्रवीरः,—महायोद्धा लवः, वाग्विषयीभूतः,—वाचां—संलापानां, विषयीभूतः,—गोचरीभूतः; तव कथोपकथनयोग्यस्थलवर्त्ती वीरोऽयमिदानीं सञ्जातः, अतोऽमुना सहाधुना त्वं यथेच्छमालपितुं शक्नोषीति भावः।

(ज) विस्मृतिं—लवस्यालौकिकं युद्धकौशलं विलोक्य तत्परिचयविस्मरणम्, अभिनीय—नाटयित्वा, आहेति शेषः। आर्य्य—पूज्य!, सुमन्त्र! इति यावत्, तन्नामधेयम्—एतस्य वीरस्य नाम, किम् आख्यातं—कथितम्? आख्यायकैः,—सन्देश-

सुमन्त्रः। वत्स! लव इति। (ऋ)

चन्द्र। भो भो लव! महाबाहो! किमेभिस्तव सैनिकैः?।
एषोऽहमेहि मामेव, तेजस्तेजसि शाम्यतु॥ ७॥

सुमन्त्रः। कुमार! पश्य पश्य।—

व्यपवर्त्तत एष बालवीरः पृतनानिर्मथनात् त्वयोपहूतः।
स्तनयित्नुरवादिभावलीनामवमर्दादिव दृप्तसिंहशावः॥ ८॥

हारिभिः, दूतैरित्यर्थः; चरैः युद्धारम्भसमये एतस्यार्भकस्य किं नामाभिहितं तन्नु अहं विस्मरामि, स्मरसि चेत् तत् कथयेति भावः। एतेन धर्म्म-युद्धसमये दूताः स्वपरपक्षीयाणां योद्धृपुङ्गवानां परिचयं सम्पादयन्ति स्मेति प्राचीना प्रथा आसीदित्यनुमीयते।

(ऋ) वत्स!—आयुष्मन्!, लव इति—लव इत्याकारकं, लवेत्यानुपूर्व्यवच्छि-न्नमित्यर्थः, अस्य बालकस्य नामधेयमिति शेषः।

अथादौ लवं सम्मानं सम्बोध्य संवर्द्ध्य च तेन सह वीरजनानुरूपं युद्धं कर्त्तुं प्रार्थयते, भो भो लवेति।—भो भो महाबाहो! लव। आजानुलम्बितभुज! लव!, तव एभिः सैनिकैः मदीयैः सेनासमूहैः, किम्? अलम्, एभिः सामान्यसैनिकपुरुषैः सह महावीरस्य तव युद्धं न शोभते इत्यर्थः; सामान्यसैनिकावमर्दनात् विरमतु इत्याशयः। एषोऽहम् अयमहं तव समकक्षः प्रतियोद्धेत्यर्थः, मामेव एहि मामेव आगच्छ, मया सह युध्यस्वेत्यर्थः। अथ फलितमाह, तेजः इति।—तेजः त्वदीयं शौर्य्यं, तेजसि मदीये अमिते चात्रे प्रभावे, शाम्यतु निर्व्वाण-मधिगच्छतु, यथा अकिञ्चित्करं वह्निज्योतिः महति तपनतेजसि शममेति, तथैव ते तेजः मदीये महति तेजसि विलीयतामिति भावः। एतेन स्वस्याधिकबलत्वं व्यक्तीकृतमिति ज्ञेयम्। [अत्र तेजःपदार्थस्य श्लिष्टतया वह्न्यर्थकत्वात् वह्नि-पराक्रमयोर्भेदेऽपि अभेदाध्यवसायमूलाऽतिशयोक्तिरलङ्कारः]। पथ्यावक्त्रं वृत्तम्॥७॥

अथ युद्धाद्विरम्य लवः चन्द्रकेतुवाक्यानुसारतः स्वसमीपमागच्छतीत्याह, व्यपवर्त्तत इति।—एषः अयं पुरतः स्थितः, बालवीरः अमितपराक्रमसम्पन्नः शिशुः, लवः इत्यर्थः, त्वया उपहूतः पूर्व्वोक्तप्रकारेण आकारितः सन्, दृप्तसिंहशावः मदोद्धतः केशरिशिशुः, स्तनयित्नुरवात् मेघगर्ज्जनात्, मेघध्वनिमाकर्ण्येत्यर्थः, ["ल्यब्लोपे कर्म्मण्यधिकरणे च" (वा०) इति पञ्चमी] इभावलीनां हस्ति-

[ततः प्रविशति त्वरितोद्धतक्रमो (ञ) लवः]।

लवः। साधु, राजपुत्र! साधु, सत्यमैक्ष्वाकः खल्वसि। तदयं परागत एवास्मि। (ट)

[नेपथ्ये महान् कलकलः]।

लवः। [सावेगं परावृत्य]। कथम्!! इदानीं भग्ना अपि प्रतिनिवृत्य युद्धाभिसारिणः पर्य्यवष्टभ्य निघ्नन्ति मां चमूपतयः!!! धिग् जाल्मान्। (ठ)—

यूथानाम्, अवमर्द्दादिव हननादिव, पृतनानिर्म्मथनात् पृतनानां सैन्यानां, निर्म्मथनात् संचयात्, सैन्यसङ्घविनाशादित्यर्थः, व्यपवर्त्तते विरमति, सैन्यनाशं परिहृत्य इत एवागच्छतीत्यर्थः; यथा गर्व्वितः सिंहशिशुः घनध्वनिमुपश्रुत्य गजकुलसंचयोद्योगं परिहृत्य ततोऽप्यधिकबलं मत्वा मेघं समाक्रमितुकामः क्रमनन्बध्नाति, तथैवायं शौर्य्योद्दीप्तः वीरपोतः भवतः अतिदृप्त समाह्वानमाकर्ण्य इत एवाभिवर्त्तते इति समुदितार्थः। [अत्र दृप्तसिंहशावेन सह बालवीरस्य वैधर्म्यसाम्योपदेशात् उपमाऽलङ्कारः]। मालभारिणी वृत्तम्;—"विषमे ससजा यदा गुरू चेत् सभरा येन तु मालभारिणीयम्।" इति लक्षणात्। औपच्छन्दसकन्तु अस्यैव वृत्तस्य नामान्तरमिति ज्ञेयम्॥ ८॥

(ञ) त्वरितोद्धतक्रमः,—त्वरितः,—सत्वरः, उद्धतः,—गर्व्वितश्च, क्रमः,—पदविक्षेपः यस्य तथाभूतः सन्, अत्र समकक्षवीरलाभजनितौत्सुक्यात् त्वरा, स्ववीर्य्यातिशय्याच औद्धत्यं क्रमस्येति ज्ञेयम्।

(ट) राजपुत्र!—राजकुमार!, चन्द्रकेतो!, साधु साधु—समीचीनम्, अभिहितं भवतेति शेषः; समपक्षेनैव वीरेण योद्धव्यमित्यभिप्रेत्य यदुक्तं तत् सुशोभनमेवेति भावः; [हर्षे द्विर्व्वचनम्]। सत्यं—यथार्थम्, ऐक्ष्वाकः,—इक्ष्वाकुकुलसम्भूतः, खलु—निश्चितम्, असि—भवसि; इक्ष्वाकुवंशीयानां वीराणामनुरूपवीर्य्यभूयिष्ठवाचां व्याहरणादिति भावः। तत्—तस्मात्, इक्ष्वाकुवंशीयस्य प्रतिपक्षवीरस्य भवतः लाभादित्यर्थः, अयम्—एषोऽहमित्यर्थः, परागतः,—प्रतिनिवृत्तः, भवत्समीपमुपस्थित इति यावत्, अस्मि—भवामि, अतो मया सह यथेप्सितं युध्यस्वेत्याशयः।

(ठ) सावेगं—सौत्कण्ठं, परावृत्य—पराङ्मुखीभूय, भूयः सैन्यानामभिमुखः

अयं शैलाघातक्षुभितवडवावक्त्रहुतभुक्-
प्रचण्डक्रोधार्चिर्निचयकवलत्वं व्रजतु मे।
समन्तादुत्सर्पन् घनतुमुलसेनाकलकलः
पयोराशेरोघः प्रलयपवनास्फालित इव ॥ ९ ॥

[इति परिक्रामति]।

भूत्वेत्यर्थः, आहेति शेषः। कथं—किम !! इदानीम्—अधुना, भग्ना अपि—मया निर्जिताः सन्तः युद्धभूमेः पलायनपरा अपि, चमूपतयः,—सेनान्यः, प्रतिनिवृत्य—पुनः युद्धस्थलमुपागम्य, मम युद्धविरतिं दृष्ट्वा पुनः प्रत्यावर्त्तनं कृत्वेत्यर्थः, युद्धाभिसारिणः,—समराभिलाषिणः, भूयः योद्धुमभीप्सवः इति यावत्, पर्य्यवष्टभ्य—वेष्टयित्वा, परिवार्य्येत्यर्थः, मम समन्तात् सदर्पमवस्थायेति भावः; मां निघ्नन्ति—प्रहरन्ति, मामभिलक्ष्य बाणान् विकिरन्ति इति यावत्। जाल्मान्—मूर्खान्, अतिनीचान् सेनान्य इति भावः। धिक्—निन्दामि; पराजयात् परमपि पुनः योद्धुमभिमनसः असमीक्ष्यकारिणः निर्लज्जान् वीरापसदानेतान् शतशो निन्दामीति भावः।

अथ सेनासमूहानां दुर्व्यवहारमभिसमीक्ष्य तत्संक्षयाभीप्सुः सकोपमाह, अयमिति।—समन्तात् परितः, सर्वा दिशः अभिव्याप्येत्यर्थः, उत्सर्पन् उद्गच्छन्, अयं श्रूयमाण इत्यर्थः, घनेति।—घनः निविडः, तुमुलः सङ्कुलः, भयावहः इत्यर्थः, सेनाकलकलः सैन्यानां कोलाहलः, प्रलयेति।—प्रलय-पवनेन कल्पान्तवायुना, क्षयकालोत्थसंहारपवनेनेत्यर्थः, आस्फालितः आलोडितः, उद्वेलितः इत्यर्थः, पयोराशेः समुद्रस्य, ओघ इव प्रवाह इव, मे मम, शैलेति।—शैलानां पर्व्वतानां, समुद्रान्तर्वर्त्तिनामिति यावत्, आघातेन सङ्घर्षेण, जल-मग्नशैलमङ्गप्रतिघातेनेत्यर्थः, क्षुभितः उद्दीपितः, यः वडवावक्त्रहुतभुक् अश्वावदन-विनिर्गतवह्निः, वाडवाग्निरिति यावत्, तद्वत् प्रचण्डः भयावहः, यः क्रोधार्चि-र्निचयः कोपानलशिखासमूहः, तस्य कवलत्वं ग्रासत्वं, व्रजतु प्राप्नोतु; समुद्रगर्भस्थशैलैः प्रतिघातं प्राप्य प्रवर्द्धितः वाडवाग्निः यथा प्रलयकालोदितसंहारवायुसञ्चालिततया वीचिमालाकुलं पयोधिसलिलराशिं विशोषयति, तथैव मदीयः क्रोधः क्षणेनैव प्रोद्धतानाममीषां सैनिकानां समन्तात् श्रूयमाणमेतं कलकलनादं समूलमेवोपशमयतु इति भावः। एतेन सर्व्वानेवैतान् नीचान् सैनिकानचिरादेव हनिष्यामीत्यर्थः स्फुटीकृत इति ज्ञेयम्। [पुरा किल और्व्वस्य महर्षेः समुद्भूतः वह्निः सर्वाणि जगन्ति दग्धुं प्रवृत्ते,

चन्द्र । भो भोः कुमार !—

अत्यद्भुतादसि गुणातिशयात् प्रियो मे,
तस्मात् सखा त्वमसि, यन्मम तत्तवैव ।
तत् किं निजे परिजने कदनं करोषि ?
नन्वेष दर्पनिकषस्तव चन्द्रकेतुः ॥ १० ॥

तद्दृष्ट्वा भगवान् ब्रह्मा तं वड़वामुखे संस्थाप्य तस्य समुद्रसलिलभक्ष्यत्वं प्रकल्पितवान्, तदवध्यसौ पारावारान्तरवस्थाय प्रवर्द्धितजलराशिं विशोषयतीति पौराणिकी वार्त्ता, तथाच मत्स्यपुराणे,—"वड़वामुखेऽस्य वसतिः समुद्रे वै भविष्यति ।……एषोऽग्निरन्तकाले तु सलिलाशी मया कृतः ॥" इत्याद्यनुसन्धेयम् । अत्र पयोराशिरोधेन सह सैनाकलस्यावैधर्म्यसाम्योपदेशादुपमाऽलङ्कारः, तथा हुतभुजा सह प्रचण्डकोपाग्निपां साम्यात् लुप्तोपमा च, इत्यनयोः निरपेक्षतया स्थितेः संसृष्टिः]। शिखरिणी वृत्तम् ॥ ९ ॥

अथास्यालौकिकं शौर्य्यं विलोक्य परितुष्यन् चन्द्रकेतुः सामवादेन तथौद्धत्यभूयिष्ठं व्यवहारं परिहर्त्तुममुं प्रणोदयति, अत्यद्भुतादिति ।—अत्यद्भुतात् अतिविस्मयकरात्, एकाकिना बालेन असंख्यातानां योद्धृपुरुषाणां पराभवजननादिति भावः, गुणातिशयात् शौर्य्यातिरेकात्, मे मम, प्रियः अतिवल्लभः, असि भवसि, तस्मात् प्रियत्वादेव, त्वं सखा मित्रम्, असि भवसि ; यद्यपि भवानस्मत्पक्षीयसैन्यानां वृथा संचयकरणात् शत्रुभूत एव भवति, तथाऽपि मया वीरेण वीरत्वगौरवरिरक्षिषुणा, तं वीर्य्यातिशयञ्च पश्यता परितुष्टेन सता, भवान् प्रियसख इत्यभिनन्द्यते इति भावः । अत एव यत् वस्तु, मम मत्सम्बन्धं, तत् वस्तु, तवैव भवत्संसृष्टमेव ; सखिभावस्य संस्थापनात् त्वां मामन्तरा कियतोऽपि पार्थक्यस्याभावादिति भावः । तत् तस्माद्धेतोः, मम त्वदीयत्वेन हेतुनेत्यर्थः, किं कथं, निजे स्वीये, परिजने परिवारे, अतीवान्तरङ्गजने इत्यर्थः, कदनं विमर्द्दनं, हननमित्यर्थः, करोषि विदधासि, स्वपक्षानेव निहंसीत्यर्थः, स्वाश्रितपरिजनानां निहिंसनं भवादृशानां महाबलानां सर्व्वथैवानुचितमिति भावः । प्रागतिविनीतव्यवहारेण कथञ्चित् परितोष्येदानीं वीरोचितभावं प्रदर्शयन्नाह, नन्वेष इति ।—ननु भो लव !, एष चन्द्रकेतुः चन्द्रकेतुनामाहं, तव भवतः, दर्पनिकषः दर्पस्य वीरत्वगर्व्वस्य, निकषः परीक्षास्थानमित्यर्थः ; निकषप्रस्तरे यथा गुणज्ञैः सुवर्णस्य साराऽसारवत्त्वस्य परीक्षा क्रियते, तथा अहमेव तव वीरत्वातिशयस्य सारतां सर्व्वथा सम्परीक्षिष्ये,

लवः। [सहर्षसम्भ्रमं परावृत्य]। अहो! महानुभावस्य प्रसन्नकर्कशा वीरवचनप्रयुक्तिर्विकर्त्तनकुलकुमारस्य। तत् किमेभिः? एनमेव तावत् सम्भावयामि। (ड)

[पुनर्नेपथ्ये कलकलः]।

लवः। [सक्रोधनिर्वेदम्]। आः!! कदर्थितोऽहमेभिर्वारं वारं वीरसंवादविघ्नकारिभिः। [तदभिमुखं परिक्रामति]। (ढ)

तदेहि, निष्फलसैन्यसंचयात् विरम्य मया सह युध्यस्व, अत्रैव ते रणकण्डूया निर्वापिता भविष्यतीति भावः। [अत्र चन्द्रकेतौ दर्पनिकषत्वस्याभेदारोपात् निरङ्गं रूपकमलङ्कारः]। वसन्ततिलकं वृत्तम्॥ १०॥

(ड) प्रतिपक्षवीरस्य लाभात् हर्षः, युद्धौत्सुक्यात् सम्भ्रमः,—त्वरा, ताभ्यां सह वर्त्तमानं यथा तथा, परावृत्य—चन्द्रकेतोरभिमुखीभूय, आहेति शेषः। अहो—इति विस्मये, महानुभावस्य—महान्—विपुलः, अनुभावः,—महत्त्वं यस्य तथाविधस्य, महामहिमशालिन इत्यर्थः। विकर्त्तनकुलस्य—सूर्य्यवंशस्य, कुमारस्य—सन्तानस्य, चन्द्रकेतोरित्यर्थः। प्रसन्नकर्कशा—प्रसन्ना—निर्म्मला, धीरस्निग्धा इत्यर्थः, कर्कशा—परुषा च; महावंशप्रसूततया अस्य वचनानां स्वतःसिद्धमेव कोमलत्वं, शौर्य्यभूयिष्ठ-भूषिततया स्वाभाविकमेव औद्धत्यसम्पृक्तत्वञ्चेति ज्ञेयम्। वीरवचनप्रयुक्तिः,—वीरस्य—शूरस्य, यानि वचनानि—वाक्यानि, तेषां प्रयुक्तिः,—प्रयोगः; वीरा हि यथा सदा वीरत्वव्यञ्जकानि वचांसि समुदीरयन्ति, तथैवायं श्रवणाभिरामां वाचं व्याचष्टे इति भावः। तत्—तस्मात्, समबलयोद्धृलाभादित्यर्थः, एभिः,—नीचैः रक्षिसैनिकैः, किम्?—अलम्; एतेषां दुर्बलानां सैन्यानां कदनं विफलमिति भावः। एनमेव—अमुं वीरं लवणैव, सम्भावयामि—सम्मानयामि, तावदिति—वाक्यालङ्कारे। वीरेण सह वीरोचितं संयुध्य वीरगौरवरक्षां करोमि, रणपिपासाञ्च अमुष्य निवर्त्तयामि इति भावः।

(ढ) क्रोधेन—कोपेन, निर्वेदेन—स्वावमाननया च सह वर्त्तमानं यथा तथेत्यर्थः, आहेति शेषः; पुनः पुनः निर्जितानामपि सैनिकानां युद्धप्रवृत्तिदर्शनात् क्रोधः, तेषां वराकाणामत्यर्थसंचयकरणेऽपि तत्तत्सामान्यसैनिकव्रातस्वनिर्यातन-प्रयासदर्शनात् आत्मनि कथञ्चित् घृणाया उदयात् निर्वेद इति ज्ञेयम्। आः,—इति कोपसूचकमव्ययम्, ("आस्तु स्यात् कोपपीड़योः" इत्यमरः)। वीरसंवादविघ्न-कारिभिः,—वीरेण शूरेण चन्द्रकेतुना सह, यः संवादः,—संग्रामकालोचितः

चन्द्र। आर्य्य ! दृश्यतामेतद्द्रष्टव्यम्। (ग)—

दर्पेण कौतुकवता मयि बद्धलक्ष्यः
पश्चाद्बलैरनुसृतोऽयमुदीर्णधन्वा।
द्वेधासमुद्धतमरुत्तरलस्य धत्ते
मेघस्य माघवतचापधरस्य लक्ष्मीम्॥ ११॥

संलापः इत्यर्थः, तस्य विघ्नं—प्रतिबन्धं कुर्व्वन्ति ये तैः; हथा युद्धकोलाहलं कृत्वा वीरेण चन्द्रकेतुना सह मयासि मम निरन्तरं वाधामुत्पादयद्भिरिति भावः। एभिः,—सैनिकैः, वीरापसदैरित्यर्थः। कदर्थितः,—उत्पीडितः, [कु कुत्सितः, अर्थः प्रयोजनमिति "कोः कत्तत्पुरुषेऽचि" (६।३।१०१ पा०) इति कुशब्दस्य कादादेशः, कदर्थः कृतः इति "तत्करोति—" (ग०) इति णिचि निष्ठायां रूपम्] लाञ्छित इति यावत्, अस्मीति शेषः; एते पामराः सेनासमूहाः मम वीरत्वप्रकाशने निरन्तरमन्तरायमुत्पादयन्तः मानत्यर्थमेवोद्वेजयन्ति, अतः एतान् समूलघातं हनिष्यामीति भावः। तदभिमुखं—तेषां क्षुद्राणामन्तरायकारिणां सैन्यानां सम्मुखं, परिक्रामति—धावति।

(ग) आर्य्य !—पूज्य सुमन्त्र !, दृश्यताम—अवलोक्यताम्, एतत्—पुरोवर्त्ति, द्रष्टव्यं—दर्शनयोग्यं वस्तु, लवस्यास्मत्सैनिकसंचयार्थं समन्तात् केशरिसुतवदभिधावनमित्यर्थः।

अथ रणभूमिषु प्रकटीकृतां लवस्य तामेव विस्मयावहां चेष्टां विशदीकृत्य व्याचष्टे, दर्पेणेति।—कौतुकवता अतिविस्मयकरेण, दर्पेण गर्व्वेण, मयि ममोपरि, बद्धलक्ष्यः बद्धं निविष्टं, लक्ष्यं दृष्टिविक्षेपः येन तथाविधः, अतिविस्मयावहदर्पेण सार्द्धं मयि निहितदृष्टिः सन् मदभिमुखमभिधावित इत्यर्थः; यद्वा,—चन्द्रकेतोः कीदृक् शौर्य्यमस्तीति ज्ञातुं यत् कौतुकं स्वकीयं कौतूहलं तदस्यास्तीति तेन, दर्पेण वीरत्वगर्व्वेण हेतुना, अपरेषां वीर्य्यज्ञानार्थं यत् कौतुकं तत्सहितस्य स्वकीयासामान्यवीरत्वदर्पस्य सत्त्वादित्यर्थः, बद्धलक्ष्यः कृतदृष्टिपातः, मद्वीरत्वदर्शनौत्सुक्यात् सदर्पं मयि कटाक्षं विनिक्षिपन्नित्यर्थः, पश्चात् पृष्ठतः, बलैः सैन्यैरस्मदीयैः, अनुसृतः अनुधावितः, उदीर्णम् उद्धृतं, शरनिक्षेपाय उत्तोलितमिति यावत्, धनुः कार्म्मुकं येन तथाविधः, मदीयतानामस्मत्सैनिकानां संचयार्थं शरासने शरं समारोपयन्नित्यर्थः, अयं वीरः लवः, द्वेधा द्विप्रकारेण, पुरतः

सुमन्त्रः। कुमार एवैनं द्रष्टुमपि जानाति, वयन्तु केवलं परवन्तो विस्मयेन। (त)

चन्द्र। भो भो राजानः!—

संख्यातीतैर्द्विरदतुरगस्यन्दनस्थैः पदाता-
वत्रैकस्मिन् कवचनिचितैर्मध्यचर्मोत्तरीये।

पश्चाच्चेत्यर्थः, समुद्धतेन प्रचण्डं प्रवहता, कदाचित् पुरतः कदाचित् पश्चाच्चेत्येवं पर्य्याकुलं चलतेत्यर्थः, मरुता वायुना, तरलस्य चपलस्य, चालितस्येत्यर्थः; वात्यया छभयतो नीयमानस्येति भावः; माघवतचापधरस्य माघवतस्य ऐन्द्रस्य, चापस्य धनुषः, धरस्य धारकस्य, मेघस्य वारिवाहस्य, लक्ष्मीं शोभां, धत्ते धारयति; इन्द्रधनुष्मत् बलाहकः यथा प्रतिकूलवायुना कदाचित् पुरतः कदाचित् पश्चाच्चाभिताड़ितः रम्यां शोभां विधत्ते, तथैवायं जलदश्यामवपुः बालकः मारुतसमैरस्मद्बलैः विताड़ितः ऐन्द्रशरासनवन्नोपमं कार्म्मुकं वहन् सदर्पं मयि निहितकटाक्षः सन् क्षणं मामेवाक्र-मितुकामः पुरतः परिक्रामन् क्षणञ्च निर्यातनैषिणः मत्सैनिकान् तर्ज्जयितुं पश्चादभिधावन् परितः प्रसृतामनिर्व्वचनीयां नैसर्गिकीं श्रियं विभर्त्तीति सरलार्थः। [अत्र एकस्य लक्ष्मीनपरः कथं वहतीत्यसम्भवती वस्तुसम्बन्धस्य विम्बानुविम्बभावेन तत्सदृशलक्ष्म्याः धारणेन सामञ्जस्यात् निदर्शनाऽलङ्कारः, मेघमाघेति छेकानुप्रास-श्चेत्यनयोः संसृष्टिः]। वसन्ततिलकं वृत्तम्॥ ११॥

(त) कुमार एव—भवानेव, नापरे इत्येवशब्दार्थः, एनं—लवं, द्रष्टुमपि—सम्यक् समीक्ष्यावधारयितुमपि, का कथा यथोचिततद्गुणादिपरीक्षाप्रयासाना-मित्यपिकारार्थः; वीरा एव हि वीरान् परीक्षितुं शक्नुवन्ति, नान्ये इत्याशयः। तु—किन्तु, वयम्—अस्मादृशाः उदासीनाः जनाः इत्यर्थः, विस्मयेन—आश्चर्य्येण, अस्य बालस्याद्भुतरणकर्म्मदर्शनेनेत्यर्थः, परवन्तः,—पराधीनाः, सञ्जाताः इति शेषः; एकश्चन्द्रकेतुरेवैतस्य वीरत्वादिकं विनिर्णेतुं शक्नोति, वयन्तु केवलमस्याभूतपूर्वं विक्रमं विलोक्य विस्मयविवशाः सञ्जाता इति भावः।

अथ पदातिनम् एकं बालं पराभवितुं भूयसा आयासेन सम्प्रवर्त्तमानान् अगणि-तान् सामन्तनृपतीनवलोक्य घृणया शतशः एतान् धिक्करोति, संख्यातीतैरिति।— संख्यां परिमाणम्, अतीतैः अतिक्रान्तैः, ["द्वितीयाश्रितातीत—" (२।१।२४ पा०) इति द्वितीयासमासः] अगणनैरित्यर्थः, द्विरदेत्यादि।—द्विरदेषु हस्तिषु,

कालज्येष्ठैरचरमवयःकाम्यकाये भवद्भि-
र्योऽयं बद्धो युधि परिकरस्तेन वो धिग् धिगस्मान् ॥१२॥

लवः। [सक्षोभम्]। कथम्, अनुकम्पते नाम? [विचिन्त्य]। भवतु, कालहरणप्रतिषेधाय जृम्भकास्त्रेण तावत् सैन्यानि संस्तम्भयामि। [इति ध्यानं नाटयति]। (थ)

तुरगेषु वाजिषु, तथा स्यन्दनेषु रथेषु च तिष्ठन्ति ये तैः, निषादिभिः अश्वारोहिभिः रथचारिभिश्चेत्यर्थः, अपि च कवचैः वर्म्मभिः, निचितैः आवृतैः, सुदृढवारबाणसंरचितशरीरैरिति यावत्, कालज्येष्ठैः कालेन वयसा, ज्येष्ठैः वृद्धतमैः, अतिवर्षीयोभिरित्यर्थः, भवद्भिः युष्माभिः, पदातौ पादचारिणि, पदातिके इत्यर्थः, एकस्मिन् असहाये, मेध्य पवित्रं, चर्म्म अजिनम्, उत्तरीयम् उत्तरासङ्गः यस्य तस्मिन्, कोमलमृगत्वगाच्छादितगात्रे इत्यर्थः; सम्पूर्णतया असंरक्षितकलेवरे इति भावः; अचरमेण अभिनवेन, नूतनेन इत्यर्थः, ("अचरम" इत्यत्र "अभिनव" इति पाठान्तरम्); वयसा बाल्येन, काम्यः रमणीयः, कायः कलेवरः यस्य तथाविधे, अत्र अस्मिन् कुमारे लवे, युधि समरे, योऽयं परिकरः कटिबन्धः, रणव्यापारे अध्यवसाय इत्यर्थः, बद्धः धृतः, तेन हेतुना, वः युष्मान्, धिक् निन्दामि, अस्मान्, अपीति शेषः, धिक् निन्दामि चेत्यर्थः; एवंविधमस्मदीयसेनानां जुगुप्सितं संग्रामकर्म्म विलोक्य एतासां नेतृत्वेन वृताः वयमपि अत्यधिकं विलज्जिताः जाता इति भावः। पदातिना सह अश्वारोहिणाम्, असंवृताङ्गेन सह कवचिनां, तथा बालेन सह प्रवयसां संग्रामक्रिया अतीव घृणाकरीति तात्पर्य्यम्। [अत्र विरूपाणामिव वस्तूनामैक्य सङ्घटनात् विषमालङ्कारः]। मन्दाक्रान्ता वृत्तम् ॥ १२ ॥

(थ) क्षोभेण—चित्तचाञ्चल्येन, मानसव्यथयेति यावत्, सह वर्त्तमानं यथा तथा, आहेति शेषः। चन्द्रकेतोः प्रोक्तदयार्द्रवचसां श्रवणात् चित्तसंक्षोभः ज्ञेयः। कथं—किम्, अनुकम्पते—दयते, नाम—कोपे; मां किमु असमर्थं विभाव्य चन्द्रकेतुः ईदृशं सदयभावं प्रदर्शयति? तत्तु दुःसहम् इति भावः। विचिन्त्य—क्षणं विभाव्य, पुनराहेति शेषः। भवतु—एवमस्तु इत्यर्थः। कालहरणप्रतिषेधाय—कालस्य—समयस्य, यत् हरणं—क्षेपण, तस्य प्रतिषेधाय—निराकरणाय, वृथाकालक्षेपविनिवृत्तये इत्यर्थः; अल्पवीर्य्यैः एभिः सैनिकैः सह युद्धेन वृथा कालक्षेपस्य वारणायेति भावः। जृम्भकास्त्रेण—जृम्भकाख्यास्त्रविशेषस्य प्रयोगेणेत्यर्थः, सैन्यानि—

सुमन्त्रः। तत्किम्!! अकस्मात् अस्मत्सैन्यघोषः प्रशाम्यति ? (द)

लवः। पश्यास्येनमधुना सप्रगल्भम्। (ध)

सुमन्त्रः। [ससम्भ्रमम्]। वत्स ! मन्ये, कुमारेणानेन जृम्भकास्त्रमामन्त्रितम्। (न)

चन्द्र। अत्र कः सन्देहः ?—

व्यतिकर इव भीमस्तामसो वैद्युतश्च
प्रणिहितमपि चक्षुर्ग्रस्तमुक्तं हिनस्ति।

सर्व्वाणि बलानि, संस्तम्भयामि—सम्मोहयामि, विचेतनानि करोमीत्यर्थः। ध्यानं—मन्त्रैः जृम्भकास्त्रप्रयोगानुचिन्तनं, नाटयति—अभिनयति।

(द) तत् किम्!!—किमेतत्!! इत्यर्थः, अकस्मात्—सहसा, अस्मत्सैन्यघोषः,—मदीयसैन्यानां कलकलध्वनिः, प्रशाम्यति ?—निर्व्वाति ?; आश्चर्य्यम्!! सहसा सेनाकलकलः कथं निवृत्तः ? कश्चित् अभिनवः अन्तरायः सैन्येषु समुदितः किमु ? इति भावः।

(ध) एनं—चन्द्रकेतुं, सप्रगल्भं—प्रगल्भः,—प्रगल्भता, अत्र लक्षणया धर्म्मपरत्वादिति ज्ञेयं, गर्व्व इत्यर्थः, तेन सह वर्त्तमानः तम्, अतिदृप्तमित्यर्थः; (यद्यपि "प्रगल्भः प्रतिभान्विते" इत्यमरोक्तेः प्रगल्भशब्दस्य विशेषणत्वात् तेन सह बहुव्रीहिर्नोपपद्यते इति मन्यते, तथाऽप्यस्य लक्षणया प्रगल्भत्वरूपधर्म्मपरत्वमङ्गीकृत्य प्रोक्तसमासः सङ्गमनीयः इति ज्ञेयम्। अत एव कुत्रचित् "सुप्रगल्भं" "प्रगल्भम्" इति च पाठान्तरं दृश्यते, अर्थस्तु तत्पक्षे सुगम एवेत्यवधेयम्)। पश्यामि—अवलोकयामि; स्वप्रभावातिशय्यप्रतिपादकानां प्रागुक्तवचसां प्रयोगेण अस्तुमतिगर्व्वितं मन्ये, तदिदानीमस्य गर्व्वमपनोदयामि इति भावः।

(न) ससम्भ्रमं—सत्वरं, सोत्कण्ठमित्यर्थः, आहेति शेषः, अनेन कुमारेण—एतेन मुनिबालकेन, जृम्भकास्त्रं—जृम्भकनामधेयं कृशाश्वतनयभूतं समन्त्रकमायुधम्, आमन्त्रितं—मन्त्रोच्चारणपूर्वकं समाहूतं, प्रयुक्तमित्यर्थः,. मन्ये—सम्भावयामि; नो चेदेवं तर्हि कथमकस्मात् सेनाकलकलविनिवृत्तिरित्याशयः।

अथ चन्द्रकेतुः स्वयमपि सैन्यमण्डलानामवस्थावर्णनमुखेन जृम्भकास्त्राणां प्रयोगं समर्थयन् तत्प्रभावं विशिष्य व्याचष्टे, व्यतिकर इति।—तामसः तमःसम्बन्धी, वैद्युतश्च विद्युत्सम्बन्धी च, भीमः भयङ्करः, व्यतिकरः सम्पर्कः, विद्युतां तमसाञ्च सर्वप्राणि-

अथ लिखितमिवैतत् सैन्यमस्पन्दमास्ते
नियतममितवीर्य्यं जृम्भते जृम्भकास्त्रम् ॥ १३ ॥

आश्चर्य्यमाश्चर्य्यम् !!—

पातालोदरकुञ्जपुञ्जिततमःश्यामैर्नभो जृम्भकै-
रुत्तप्तस्फुरदारकूटकपिलज्योतिर्ज्वलद्दीप्तिभिः ।

भयङ्करः युगपत समवाय इत्यर्थः. पिण्डीभूता सौदामनीतमःसन्ततिः इति यावत्, इह अस्मिन् सैन्यसमुदाये, प्रणिहितमपि सप्रणिधानं समीचितुं नियोजितमपि ; किमर्थं मदीयाः सैनिकाः सहसा नीरवाः सञ्जाताः इति परीचितुं समन्तात् विनिपातितमपीति भावः ; चक्षुः मदीयं नयनं, ग्रस्तमुक्तं तमःसम्बन्धेन आदौ ग्रस्तं विद्युत्सम्बन्धेन च पश्चात् मुक्तं परित्यक्तम् ; प्रथमतः प्रगाढतमोभिः समावृतं पश्चात् विद्युज्ज्योतिर्भिः विमुक्तीकृतमित्यर्थः ; प्रागन्धीकृत्य पश्चात् दर्शनशक्तिसमुद्भासितं कृत्वेति भावः ; हिनस्ति निपीडयति, शक्तिहीनं करोतीत्यर्थः । अथ अनन्तरं; सान्धकारज्योतिःपुञ्जप्रकाशात् परमेवेत्यर्थः, यद्वा,—अथशब्दोऽत्र समुच्चयार्थकः, किञ्चेत्यर्थः, ("अथाथो संशये स्यातामधिकारे च मङ्गले । विकल्पानन्तरप्रश्नकार्त्स्न्या-रम्भसमुच्चये ॥" इति मेदिनी)। एतत्सैन्यम् अस्मादलसमुदायः, लिखितमिव चित्रितमिव, चित्रपटार्पितमिवेत्यर्थः, अस्पन्दं स्पन्दरहितं, निश्चेष्टं सदित्यर्थः, आस्ते वर्त्तते, अत एव नियतं निश्चितम्, अमितवीर्य्यम् अपरिमितसामर्थ्यम्, अपौरुषेय-शक्तिकमित्यर्थः, जृम्भकास्त्रं जृम्भकाख्य कृशाश्वतनयभूतं समन्त्रप्रयोगसंहारम् आयुधं, जृम्भते स्फुरति, समुदेतीत्यर्थः ; मन्ये, नूनं जृम्भकास्त्राणि प्रादुरभूवन्निति, अन्यथा कथमस्मच्चक्षुषां चणमुपरोधः, कियत्कालात्परं प्रकाशश्च समजनि ? सैनिकसङ्घश्च चित्रार्पितारम्भ इवावतिष्ठते ? इति भावः । [अत्र सैन्यानां लिखित-वदवस्थानस्य सम्भावनया उत्कटैककोटिकसंशयसमुदायादुत्प्रेक्षाऽलङ्कारः, अपिच सैन्यानां समूहेषु जृम्भकास्त्रकृतनिष्पन्दीभावादेः सत्त्वात् तदस्त्रजविकारादे-रनुमानात्, तथा विच्छित्तिवशात् साधनीभूतसैन्यगतविक्रियाभिः साध्यीभूतस्य जृम्भकास्त्रप्रादुर्भावस्य ज्ञानाच्च अनुमानालङ्कारः, एतयोरङ्गाङ्गिभावेन स्थितेः सङ्करः]। मालिनी वृत्तम् ॥ १३ ॥

अथ तदस्त्राणां प्रसारं प्रभावञ्च विशदीकृत्य प्रतिपादयति, पातालो-दरेति ।—पातालस्य अधोभुवनस्य, स्वाङ्गिकघनान्धकारसमावृतस्येत्यर्थः, उदरे

कल्पाक्षेपकठोरभैरवमरुद्व्यस्तैरवाकीर्य्यते
मीलन्मेघतडित्कडारकुहरैर्विन्ध्याद्रिकूटैरिव ॥ १४ ॥

अभ्यन्तरे, मध्यदेशे इत्यर्थः, ये कुञ्जाः लताप्रतानावृतस्थानानि, लतागृहाः इत्यर्थः, तेषु पुञ्जितानि पुञ्जीभूय संस्थितानि, घनीभूतानीत्यर्थः, यानि तमांसि अन्धकाराः, तैरिव श्यामैः अतिकृष्णवर्णैः ; अन्धकाराणामतितीव्रत्व-प्रतिपादनार्थं पातालोदरकुञ्जस्योपादानं ज्ञेयम् ; अपिच, उत्तप्तं दृढतरवह्निसंयोगात् पावकसमवर्णतां सम्प्राप्तमित्यर्थः, अत एव स्फुरत् दीप्यमानं, प्रभातरल-ज्योतिर्म्मयमिति यावत्, यत् आरकूटं पित्तलं, ("रीतिः स्त्रियामारकूटम्" इत्यमरः) तस्य यानि कपिलानि पिङ्गलवर्णानि, ज्योतींषि प्रभाः, तद्वत् ज्वलन्त्यः देदीप्यमानाः, दीप्तयः प्रभाः येषां तथाविधैः, अनलतापेन द्रवीभूतपित्तलानां तरलप्रभाभास्वरैरित्यर्थः ; एतत्तु विद्युद्विलासप्रकटीकरणार्थमिति ज्ञेयम् ; कल्पे-त्यादि ।—कल्पस्य ब्रह्मणो दिवसस्य, ("कल्पः शास्त्रे विधौ न्याये संवर्त्ते ब्रह्मणो दिने" इति मेदिनी) युगरूपस्येत्यर्थः, आक्षेपः क्षयः, अवसानमिति यावत्, यस्मिन् तथाभूते काले, युगान्तसमये इत्यर्थः, कल्पावसाने इति यावत्, ये कठोराः दारुणाः, दुर्निवारा इत्यर्थः, भैरवाः भयङ्कराः, मरुतः समवेतोदिताः उनपञ्चाशत् वायवः, तैः व्यस्तैः विक्षिप्तैः, विन्ध्याद्रिगात्रात् उत्पाट्य स्थानान्तरं नीतैरित्यर्थः, मीलन्तः सततमेव संसज्जन्तः, मेघाः पयोवाहाः येषु तथाविधाः, अत एव तडिद्भिः तदीयविद्युद्भिः, कडाराणि पिङ्गलवर्णानि, ("कडारः कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ" इत्यमरः) कुहराणि गुहा येषां ते, ततः मीलन्मेघाश्च ते तडित्कडारकुहराश्चेति [विशेषणकर्म्मधारयः] तैः तादृशैः, विन्ध्याद्रिकूटैरिव विन्ध्यगिरिशिखरैरिव, जृम्भकैः जृम्भकाख्यास्त्रविशेषैः, नभः गगनम्, अवाकीर्य्यते व्याप्यते, सर्व्वतः समाच्छन्नं क्रियते इत्यर्थः ; निविड़ान्धतमसाच्छन्ने महाप्रलयसमये समुदितैः संवर्त्तकादिभिः प्रचण्डपवनैः निर्दयं समाहतानि विच्छिन्नमूलानि विन्ध्यगिरिशिखराणि समन्तात् समुड्डीय यथा प्रचण्ड-तथाविधमेघाघातं संप्राप्य विद्युन्मालाः परितः प्रकिरन्ति सन्ति जगज्जीवानां संचयं नाशयन्ति, तथैव क्षिप्रमूर्ति जृम्भकास्त्राणि अस्मद्बलसमुदायेषु समुदितानीति भावः । [अत्र प्रलयपवनेन छिन्नतया समुत्क्षिप्तैः विन्ध्याद्रिकूटैः सार्द्धं जृम्भकास्त्राणामवैधर्म्य-साम्योपदर्शनात् उपमाऽलङ्कारः एव, नोत्प्रेक्षा, प्रलयसमये सृष्टिविलोपस्य शास्त्र-सिद्धत्वेन तात्त्विकतया, विन्ध्याद्रिकूटानामपि प्राकृतरूपतया वर्णनीयत्वस्य सुसङ्गततया

सुमन्त्रः। कुतः पुनरस्य जृम्भकाणामागमः स्यात् ? (प)

चन्द्र। भगवतः प्राचेतसादिति मन्यामहे। (फ)

सुमन्त्रः। नास्य व्यवहारोऽस्त्रेषु, विशेषतो जृम्भकेषु। (ब)

यतः,—

कृशाश्वतनया ह्येते कृशाश्वात् कौशिकं गताः।
अथ तत्सम्प्रदायेन रामभद्रे स्थिता इति ॥ १५ ॥

सुसिद्धत्वात् अकालनिकत्वाच्च कथञ्चिदप्यत्र विषये सम्भावनाया अभावादिति ज्ञेयम्। शार्दूलविक्रीडितं वृत्तम् ॥ १४ ॥

(प) कुतः,—कस्मात् पुरुषात्, अस्य—लवस्य, ["शेषे विभाषा" (वा०) इति कर्त्तरि षष्ठी वैकल्पिकी, "केचिदविशेषेण विभाषामिच्छन्ति" इति दीक्षितवचनात्]। जृम्भकाणाम्—एतेषां दैवानामायुधानाम्, ["उभयप्राप्तौ कर्म्मणि" (२।३।६६ पा०) इति कर्म्मणि षष्ठी]। आगमः,—लाभः, प्राप्तिरित्यर्थः, स्यात् ?—भवेत् ? ; भगवान् रामस्तु महर्षेः विश्वामित्रात् इमानि अधिगतवान्, अयन्तु कुतः ? इति भावः।

(फ) प्राचेतसात्—वाल्मीकेः, आगमः इति शेषः। इति—एवं, मन्यामहे—अनुमिनुमः ; अस्यैव महर्षेः शिष्यत्वादित्याशयः।

(ब) अस्य—महर्षेः वाल्मीकेः, अस्त्रेषु—आयुधेषु, व्यवहारः,—स्वेनैव प्रयोगः, शिष्येभ्यो वा उपदेशः इति यावत्, न—नास्तीत्यर्थः ; यद्यपि महर्षिः सर्व्वज्ञतया निखिलं वेत्ति, तथाऽप्ययं केषाञ्चिदप्यस्त्राणां स्वयं सम्प्रयोगं न करोति, शिष्येभ्यश्च वा एतत् नोपदिशति इति भावः ; विशेषतः,—विशेषेण, जृम्भकेषु—कृशाश्वतनयप्रभृतिषु अस्त्रेषु, व्यवहार इति शेषः ; सामान्यतः अस्त्रव्यवहाराणामदर्शनात् जृम्भकास्त्राणान्तु कथैव नास्तीति भावः।

अथैतेषां जृम्भकास्त्राणां सम्प्रदायं विवृणोति, कृशाश्वेति।—एते जृम्भकाख्याः अस्त्रविशेषाः, हि इति सम्भ्रमार्थकमव्ययम् ; महौजसः प्रजापतेः कृशाश्वस्य तनयत्वादेव जृम्भकाणामादरातिशयप्रकटनार्थमेव हिशब्दप्रयोगः बोध्यः। ("हि पादपूरणे हेतौ विशेषेऽप्यवधारणे। प्रश्ने हेत्वपदेशे च सम्भ्रमासूययोरपि ॥" इति मेदिनी) कृशाश्वतनयाः कृशाश्वेन प्रजापतिना सृष्टाः इत्यर्थः, कृशाश्वानां पूर्व्वतनानां गुरूणां तपसां तेजोभ्यः सम्भूताः इति यावत् ; कृशाश्वात् तस्मादेव महापुरुषात् ; तस्यैव तपस्तेजोभ्यः समुत्पद्येति भावः ; कौशिकं महर्षिं विश्वामित्रं, गताः सङ्क्रान्ताः ; गुरुपरम्पराक्रमेण कौशिकं महर्षिमुपाश्रिताः इति भावः ; अथ

चन्द्रः। अपरेऽपि परमोपचीयमानसत्त्वप्रकाशाः स्वयं हि मन्त्रद्रष्टारः पश्यन्ति। (भ)

सुमन्त्रः। वत्स! सावधानो भव, परागतः प्रवीरः। (म)

कुमारौ। [अन्योऽन्यं प्रति]। अहो प्रियदर्शनः कुमारः !!। [सस्नेहानुरागं निर्वर्ण्य]। (य)—

अनन्तरं, तत्सम्प्रदायेन तेषामस्त्राणां गुरुपारम्पर्य्यक्रमादुपदेशेनेत्यर्थः, कौशिकोपदेशेनेति यावत्, रामभद्रे श्रीरामचन्द्रे, स्थिताः सङ्क्रान्ताः, रामभद्रमुपाश्रिता इत्यर्थः, इतीति वाक्यसमाप्तौ; ("व्यवस्थिताः" इति पाठान्तरम्)। इत्थं हि एतेषामस्त्राणां गुरुपरम्परासंस्थितिः सुप्रसिद्धा, एतेभ्योऽन्यत्र नास्त्येतेषां सन्निधिगतिः, अतो वाल्मीकौ महर्षौ तस्य उपसङ्क्रमः न हि सम्भवतीति तात्पर्य्यम्। [अत्र जृम्भकास्त्राणामनेकेषु सङ्क्रमणात् पर्य्यायालङ्कारः; तथा तच्छब्देनैव कृशाश्वस्य उपस्थितिसम्भवे पुनः कृशाश्वपदोपादानात् कथितपदत्वदोषः, स च "कृशाश्वात्" इत्यत्र "तस्माच्च" इति पाठे समाधेयः इति]॥ १५॥

(भ) अपरेऽपि—कृशाश्वादिभ्यः अन्येऽपि, परमोपचीयमानसत्त्वप्रकाशाः,—परमम्—अत्यर्थम्, उपचीयमानः,—परिवर्द्धमानः, सत्त्वस्य—सत्त्वगुणस्य, प्रकाशः,—आविर्भावः येषु ते, विशुद्धसत्त्वगुणोद्रेकात् समुद्भासिततेजसः इत्यर्थः, यद्वा,—परमं—सातिशयम्, उपचीयमानः,—परिवर्द्धमानः, सत्त्वस्य—बलस्य, आर्षस्य तेजसः इति यावत्, प्रकाशः,—उदयः येषां ते, मन्त्रद्रष्टारः,—मन्त्रसाक्षात्कर्त्तारः ऋषयः, उग्रेण तपसा श्रुतीनां प्रत्यक्षीकर्त्तार इत्यर्थः, स्वयं हि—अन्योपदेशं विनैवेत्यर्थः, पश्यन्ति—जृम्भकादीन् जानन्ति इत्यर्थः, ज्ञानचक्षुषा सर्वं विज्ञाय दिव्यास्त्राणि लब्धुं शक्नुवन्ति इति यावत्; अतः मन्ये कृशाश्वादिव्यतिरिक्तेभ्यः प्राचेतसादिभ्यः महर्षिभ्योऽपि एतादृशास्त्राणां लवेन लाभः सम्भवेदिति भावः।

(म) सावधानो भव—आत्मरक्षणाय अप्रमत्तो भव, लवस्याक्रमणं प्रति मनः सन्निधेहीत्यर्थः, प्रवीरः,—प्रकृष्टः वीरः, लव इत्यर्थः, परागतः,—समुपस्थितः; यतोऽयं शूरः आक्रमितुकामः इत एव सत्वरं समायाति, अतस्त्वया इदानीमनलसेन सता स्थातव्यमिति भावः।

(य) अन्योऽन्यं प्रति—परस्परमवलोक्य, प्राहतुरिति शेषः। अहो!—इति विस्मयार्थकमव्ययम्; प्रियदर्शनः,—प्रियं—मनोज्ञं, दर्शनम्—अवलोकनं यस्य सः, सौम्यमूर्त्तिरित्यर्थः, कुमारः,—लवः चन्द्रकेतुश्च। सस्नेहानुरागं—स्नेहेन—प्रेम्णा,

यदृच्छासंवादः किमु ? किमु गुणानामतिशयः ?
पुराणो वा जन्मान्तरनिविडबन्धः परिचयः ? ।
निजो वा सम्बन्धः किमु विधिवशात् कोऽप्यविदितः ?
ममैतस्मिन् दृष्टे हृदयमवधानं रचयति ॥ १६ ॥

अनुरागेण—अत्यन्तासक्त्या च सह वर्त्तमानं यथा तथा, निर्वर्ण्य—दृष्ट्वा, आहतुरिति शेषः ; उभयोः प्रियदर्शनत्वादेव अन्योऽन्यं प्रति स्नेहः, समवयस्कत्वेन सखित्वादेव चानुराग इति ज्ञेयम् ।

अथान्योन्यं प्रति स्निह्यन्तौ अनुरज्यन्तौ च कुमारौ विविधं तत्कारणमनुसन्दधानौ, यदृच्छेति ।—यदृच्छया हेतुं विनाऽपि, अकस्मादित्यर्थः, संवादः समागमः, किमु ? किम् ; दैववशादेव आवयोः य एषः समागमः सञ्जातः, स एव किमेतस्मिन् हृदयावधानरचनायां हेतुः; तत्र किमपि अन्यत् कारणं नास्ति किम् ? इति भावः ; गुणानां शौर्य्यगाम्भीर्य्यसौजन्यादिगुणसमूहानाम्, अतिशयः आधिक्यम्, उत्कर्ष इत्यर्थः, किमु ? किम् ; ईदृशासामान्यगुणनिचयानां प्रभावस्यात्र सत्त्वादेव तद्वशात् एवं किं समजनीति भावः, गुणाधिक्ये सत एव प्रीतिः समुत्पद्यते इत्याशयः ; वा अथवा, जन्मान्तरे अन्यस्मिन् जन्मनि, निविडः दृढः, बन्धः स्नेहमयं बन्धनं यस्य तादृशः, पूर्व्वस्मिन् जन्मनि सुदृढं स्नेहमयपाशेन संयमिततया संस्थित इत्यर्थः, पुराणः प्राक्तनः, परिचयः भ्रातृत्वबन्धुत्वादिरूपः सम्बन्धः, किमु ? इति शेषः ; जन्मान्तरीयसुदृढमैत्र्यादिबन्धनं किमु एतस्मिन् जन्मनि एवं जनयति ? इति भावः ; वा अथवा, विधिवशात् भाग्यवशात्, अदृष्टविवर्त्तनादित्यर्थः, अविदितः अविज्ञातः, कोऽपि अनिर्व्वचनीयः, निजः स्वीयः, सम्बन्धः भ्रातृत्वादिरूपः सम्पर्कः, किमु ? किम् ; अस्मिन् मे भ्रातृत्वादिरूपात् कस्माच्चित् सम्बन्धादेव ईदृशः किमु साहजिकः प्रीतिभावः समुदितः ? यो हि सम्बन्धः दुर्द्दैवप्रभावादेव इदानीं सम्यक्तया नाव-बुध्यते इति भावः ; दृष्टे अवलोकिते, एतस्मिन् प्रियदर्शने कुमारे, मम हृदयं मानसम्, अवधानम् ऐकाग्र्यं, प्रीतिप्रवणतामित्यर्थः, रचयति गमयति, प्रणय-विह्वलतामासादयतीत्यर्थः ; नूनमनेन बालकेन सह मे कश्चित् जन्मान्तरीयः स्वजन-सम्पर्कः आसीत्, यत्प्रभावादेव मम चेतः सहसा ईदृक् विकलं सञ्जातमिति भावः । [अत्र नरस्वरावलोकनात् परं स्वस्वहृदयावधानं प्रति प्रतिभावशेन विविधानां हेतूनामुपन्यस्तानां तुल्यबलतया एकतरविनिश्चयाभावात् शुद्धः सन्देहा-लङ्कारः, अपिच, चतुर्थपादस्थवाक्यार्थं प्रति पादत्रितयानां हेतुत्वेनोपन्यासात्

सुमन्त्रः। भूयसा जीविधर्म एषः, यद्रसमयी कस्यचित् क्वचित् प्रीतिः, यत्र लौकिकानामुपचारस्तारामैत्रकं वा चक्षूराग इति, तमप्रतिसंख्येयमनिबन्धनं प्रेमाणमामनन्ति। (र)—

वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः, एतयोरङ्गाङ्गिभावतया स्थितेः सङ्करः]। शिखरिणी वृत्तम ॥ १६ ॥

(र) भूयसा—बाहुल्येन, प्रायश इत्यर्थः, एषः,—वक्ष्यमाणप्रकार इत्यर्थः, जीविधर्मः,—जीविनां—प्राणिनां, धर्मः,—स्वभावः ; किं तदिति प्रश्ने आह, यदिति।—यत् कस्यचित्—जनस्य, क्वचित्—कुत्रचित् जनविशेषे, रसमयी—अनुरागात्मिका, प्रीतिः,—स्नेहः, जायते इति शेषः ; कञ्चित् जनं दृष्ट्वैव नैसर्गिक-प्रीत्युदयात् कस्यचिज्जनस्य चित्तं यत् समाकृष्टं भवतीति दृश्यते, स एव जीविधर्मः इति भावः। कथमेतज्जायते तत्र लौकिकोक्तिमाह, यत्रेति।—यत्र—यस्यां प्रीतौ, लौकिकानां—लोकाचाराभिज्ञानां जनानाम्, उपचारः,—व्यवहारः, मानव-समूहाः तद्विषये एवं हि व्याहरन्तीत्यर्थः ; ("उपचारः" इत्यत्र "व्याहारः" इति पाठान्तरम्)। तारामैत्रकं—ताराणाम्—अक्षिकनीनिकानां, मैत्रकं—मित्रत्वम्, अविसन्निकर्षात्परमेव परस्परतारकातेजःसम्पर्कजनितम् अकृत्रिमं सख्यं हि भवति इत्यर्थः ; नयनरागभरादेव अहेतुकः केषाञ्चित् सुदृढः प्रणयः इह जगति दृश्यते इति भावः ; यद्वा,—ताराणाम्—उभयेषां द्रष्टॄणां जन्मतारकादीनां, मैत्रमेव मैत्रकम्, [स्वार्थे कप्रत्ययः]। परस्परेषां जन्मतारातो गणने यत्र मित्रामित्रतार-कादिकं भवति, स एव प्रेमाप्रेमादिहेतुरिति भावः ; वा—पक्षान्तरे, चक्षूरागः,—चक्षुषां—नयनानां, रागः,—अनुरागः, विशुद्धं हि प्रेम किमपि निमित्तान्तरमनपेक्ष्यैव समुदीय अन्योऽन्यावलोकनमात्रं द्वयोरेव मानसमावर्जयति स्नेहप्रवणञ्च करोतीति भावः ; एष हि वङ्गभाषया "चखेर देखा" इत्याख्यायते ; ईदृशानुरागस्य केवलं ताराचक्षुर्भिरेव प्राधान्येन निष्पाद्यतया, तारामैत्रकसंज्ञया चक्षूरागसंज्ञया वाऽयं निर्दिश्यते लोकैरिति ज्ञेयम् ; तं—तादृशम्, इह लोके तारामैत्रकादिनाम्ना उप-चरितमित्यर्थः, प्रेमाणं—प्रणयं, सखिभावमिति यावत्, ("प्रेमा ना वासवे वाते प्रेमाख्यो स्नेहनर्मणोः" इति मेदिनी)। अप्रतिसंख्येयं—प्रतिसंख्यातुम्—इयत्तया अवधारयितुमशक्यम्, अतिगभीरतया अप्रतिमेयस्वरूपमित्यर्थः, अनिबन्धनं—नास्ति निबन्धनं—किमपि कारणं यस्य तथोक्तम्, अहेतुकमित्यर्थः, आमनन्ति—कथयन्ति ; भवता ईदृशाकस्मिकप्रीतिभावस्य प्राक् यानि यानि कारणानि आशङ्कितानि, तेभ्यः

अहेतुः पक्षपातो यस्तस्य नास्ति प्रतिक्रिया।
स हि स्नेहात्मकस्तन्तुरन्तर्मर्म्माणि सीव्यति॥ १७॥

कुमारौ। (अन्योऽन्यं प्रति)।—

एतस्मिन् मदकलमल्लिकाक्षपक्ष-
मोक्तव्याः कथमिव सायकाः शरीरे।

विनाऽपि लोके केवलम् ईश्वरेच्छयैव निर्निमित्तस्य एतादृशप्रणयस्य समुदयो दृश्यते तत्त्वदर्शिभिः परीक्षकैः इति भावः।

एतेषान्तु निर्हेतुकानां प्रेम्णां स्वरूपं फलञ्च विशदीकृत्य विवृणोति, अहेतुरिति।—अहेतुः निर्निमित्तः, प्रागुक्तभ्रातृत्वादिसम्बन्धविशेषविनिर्मुक्त इत्यर्थः, कमपि कारणविशेषमनपेक्ष्य एव जायमान इति यावत्, यः पक्षपातः पक्षे पातः, परस्परं प्रति आसक्तिविशेष इति यावत्, तस्य प्रतिक्रिया प्रतीकारः, निवृत्तिः कारकः कोऽप्यभ्युपायः इत्यर्थः, नास्ति न वर्त्तते; तस्य साहजिकतया अकृत्रिमत्वादित्याशयः; उपकारादिरूपकारणजन्यस्य तु कृत्रिमतया तद्रूपकारणादेरसमवधानदशायान्तु स्थायित्वादर्शनात्, सहजस्य तु प्रणयस्य सर्व्वस्मिन् काले समभावेनैव सत्त्वम्, इत्येतावानेवानयोर्भेद इति ज्ञेयम्। स्वरूपमुपवर्ण्य तत्फलमिदानीं विवृणोति, स हीति।—हि यस्मात्, सः तादृशः सहजपक्षपातरूपः अतिविशुद्धः प्रणयः इत्यर्थः, स्नेहात्मकः स्नेह एव आत्मा स्वरूपं यस्य तादृशः, स्नेहमय इत्यर्थः, तन्तुः सूत्रं, प्रणयसूत्रसन्तान इति यावत्, अन्तर्मर्म्माणि हृदयादिसन्धिस्थलानि, उभयोरेव अन्तःकरणमित्यर्थः, सीव्यति—ग्रथ्नाति, सुदृढ़ं बध्नातीत्यर्थः; सौचिकः वस्त्रद्वयं सूत्रसूत्रेण यथा सीव्यति, तथा कोऽप्यविज्ञातपूर्वः कारणविशेषः प्रणयिनोः अन्तःकरणद्वयं दुर्च्छेद्यप्रणयतन्तुना ग्रथित्वा एकीकरोतीति भावः। [अत्र कारणेन कार्य्यसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः, अपिच, स्नेहे तन्तोरभेदारोपात् रूपकमलङ्कारः, अनयोरङ्गाङ्गिभावेन सङ्करः] ॥ १७॥

अथ परस्परं प्रत्यनुरक्तौ कुमारौ स्वस्वहृदयभावं प्रकटयतः, एतस्मिन्निति।—मदकलः क्षतः मदकलितः ["तत्करोति—"(ग०) इति णिचि कर्म्मणि क्तः] संस्कारेण चिक्कणीकृतः, यो राजपट्टः कान्तपाषाणापरपर्य्यायः मणिविशेषः, यद्वा,—पट्टेषु वस्त्रेषु राजा राजपट्टः [राजदन्तादिवत् पूर्व्वनिपातः] विचित्रं रम्यं वस्त्रं, तद्वत् कान्तं मनोहरं तस्मिन्, सौम्यदर्शने इत्यर्थः, एतस्मिन् पुरोवर्त्तिनि, शरीरे देहे, कथमिव केन वा प्रकारेण,

यत्प्राप्तौ मम परिरम्भणाभिलाषात्
उन्मीलत्पुलककदम्बमङ्गमास्ते॥ १८॥
किन्त्वाक्रान्तकठोरतेजसि गतिः का नाम शस्त्रं विना?
शस्त्रेणापि हि तेन किं, न विषयो जायेत यस्येदृशः?।

सायकाः बाणाः, नोक्तव्याः? त्यक्तव्याः, प्रहाराय निक्षेप्तव्याः इत्यर्थः, नयेति शेषः; एतस्मिन् मृदुनि कमनीये च शरीरे कठोराः शराः केनापि प्रकारेण मया हननाय निक्षेप्तुं न शक्यन्ते इति भावः; यत्प्राप्तौ यस्य शरीरस्य, प्राप्तौ लाभे सति, परिरम्भणाभिलाषात् परिरम्भणस्य समालिङ्गनस्य, अभिलाषात् स्पृहावशात्, आलिङ्गितुम् अत्यधिकवासनोदयेन हेतुनेत्यर्थः, मम अङ्गम् अवयवम्, उन्मीलत् उद्गच्छत्, पुलकानां रोमाञ्चानां, कदम्बं समूहः यस्मिन् तथाविधं, यद्वा,—उन्मीलन्तः उद्यन्तः, पुलकाः रोमाञ्चाः, कदम्बानि इव कदम्बकुसुमानीव यस्मिन् तथाविधम्, आस्ते वर्त्तते; यतः एतच्छरीरस्य परिष्वङ्गाय मदीयशरीरं पुलकाञ्चितं भवति, अतः कथमेतस्मिन् सुतीक्ष्णान् शरान् निपातयेयम् इति भावः; तथा च एतदतिकमनीयं वपुः शरनिक्षेपस्य नितरामेवानर्हम् इति फलितम्। [अत्र पूर्वार्द्धगतवाक्यस्थितं शरीरे सायकाविमोचनं प्रति परार्द्धगतवाक्यस्थस्य पुलकोद्गमजनितालिङ्गनाभिलाषस्य हेतुतया उपन्यासात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः, तथा पक्षान्तरव्याख्याने पुलकेन सह कदम्बकुसुमानां साम्योपदेशाच्च लुप्तोपमाऽलङ्कारः, इत्यनयोरङ्गाङ्गिभावेन सङ्करः]। प्रहर्षिणी वृत्तम्॥ १८॥

अथ निरतिशयप्रमदोदयात् अन्योऽन्य प्रति स्निह्यन्तौ कुमारौ परस्परकमनीयाङ्गेषु शरसन्धानस्य नितान्तानर्हतां प्रतिपादयन्तावपि वीरजनसमाचारवशात् सायकसम्प्रयोगस्यापरिहार्य्यतां व्याचक्षाते, किन्त्विति।—किन्त्विति पक्षान्तरे, परन्तु इत्यर्थः;‌ यद्यपि एतस्मिन् कमनीये वपुषि शरान् सन्धातुं कियत्यपि इच्छा न विद्यते, तथाऽपीति भावः; आक्रान्तकठोरतेजसि आक्रान्तं प्रतिपन्नं, कठोरम् उग्रम्, अतिदुःसहमित्यर्थः, तेजः शौर्य्यं येन तस्मिन्; एकत्र हयमेधीयाश्वग्रहणात् प्रतिपक्षभूते, अपरत्र च समरभूमौ सगर्व्वं मामाह्वयमाने इति भावः; लवे चन्द्रकेतौ चेत्याशयः; शस्त्रं विना आयुधप्रयोगादृते, समरक्रियामन्तरेणेति यावत्, का नाम गतिः? को हि उपायः सम्भवति?; उपायान्तरं नास्तीति सम्भाव्यते इति भावः। शरीरसौभाग्यं परीक्ष्य शस्त्रक्रियाकरणे शस्त्रशिक्षावैफल्यमेवेत्याह, शस्त्रेणेति।—यस्य शस्त्रस्य, ईदृशः एवंविधः महाबलः वीरः, विषयः प्रयोगगोचरः, परीक्षास्थान-

किं वक्ष्यत्ययमेवमद्य विमुखं मामुद्यतेऽप्यायुधे ?
वीराणां समयो हि दारुणरसः स्नेहक्रमं बाधते ॥ १९ ॥

सुमन्त्रः। [एवं निवर्ण्य साश्रमात्मगतम्]। हृदय ! किमन्यथा परिकल्पसे ? (ल)—

मित्यर्थः, न जायेत न भवेत, तेन शस्त्रेणापि आयुधेनापि, हि नूनं, किम् ? किं फलम् ? लभ्यते इति शेषः ; यदि ईदृशलोकातिशायिवीर्य्यशालिना वीरेण सार्कं न युध्ये, तर्हि मम एतादृशास्त्रशिक्षाकौशलं विफलमेव सञ्जातमिति भावः। अथ युद्धात् विरम्य सामसम्प्रयोगे दोषमुद्भावयति, किमिति।—आयुधे शस्त्रे, उद्यतेऽपि मामेवाभिहन्तुं समुत्क्षिप्तेऽपि, न केवलं युद्धाय क्वतक्रमे, अपि तु शौर्य्यं परीक्षितुं प्रवृत्तुकामेऽपि, इत्यपेरर्थः, युद्धविमुखं रणकर्म्मणः निवर्त्तमानं, सङ्ग्राम-पराङ्मुखमित्यर्थः ; स्नेहप्रवणमपि इत्याशयः ; माम् अयमेव एष सत्प्रतिपक्षसुतः वीरपोत एवेत्यर्थः ; का कथा अन्येषामिति भावः ; किं वक्ष्यति ? किं कथयिष्यति ? ; दुर्ब्बलत्वेन कापुरुषत्वेन वा भयात् सङ्ग्रामविरतिमनुमाय मम युद्धापाटवमेवाभि-धास्यति इति भावः। अतः प्रेमप्रदर्शनस्य नायमवसर इति समाधत्ते, वीराणा-मिति।—दारुणरसः दारुणः निष्ठुरः, भयङ्करः इत्यर्थः, रसः क्रौर्य्यरूपम् आस्वाद्य-मानं वस्तु यस्य तथाविधः, अतिकठोर इत्यर्थः, वीराणां शूराणां, समयः आचारः, ("समयाः शपथाचारकालसिद्धान्तसंविदः।" इत्यमरः) वीररस इत्यर्थः, परस्परनिदारुणरणकर्म्मरूपः व्यवहार इति यावत्, स्नेहक्रमं स्नेहप्रसरं, प्रणयानुवृत्तिमिति यावत्, बाधते हि रुणद्धि खलु ; युद्धे समुद्यतैः वीरैः स्नेहः प्रकाशयितुं न शक्यते इति भावः। [अत्र सामान्येन वीराणां समयरूपेण वस्तुना विशेषस्य स्वकीयसमाचाररूपस्य वस्तुनः समर्थनात्, सामान्येन विशेष-समर्थनरूपोऽर्थान्तरन्यासालङ्कारः ; किञ्च यत्रात्र यच्छब्दस्यान्ते प्रयोगात् विधेयाविमर्ष-दोषः, तथा हिशब्दस्य पादपूरणमात्रार्थकत्वात् निरर्थकत्वदोषश्च इति केषाञ्चिन्मतं, तत्रास्माकमेवमभिमतं यत्,—यत्तदोः नित्यसम्बन्धात् प्राक् निर्द्दिष्टेन दूरान्वितेनापि तच्छब्देनान्वयबलात् पश्चादुपात्तस्यापि यच्छब्दस्याकाङ्क्षायाः सहजत एव विनिवृत्तेः, यत्तच्छब्दद्वयघटितवाक्यद्वितयस्य अर्थप्रतीतेः तादृशविघाताकरणात्, नात्र यच्छब्दस्य प्रागनिर्द्देशकृततद्दोषावसरः, एवं हिशब्दस्यापि निश्चितार्थकतया न तदुपादानकृत-निरर्थकत्वदोष इति ज्ञेयम्]। शार्दूलविक्रीड़ितं वृत्तम् ॥ १९ ॥

(ल) निर्वर्ण्य—निरूप्य, सविशेषं विलोक्येत्यर्थः, साश्रम्—सखेदम्—वाष्पेण

मनोरथस्य यद्बीजं तद्दैवेनाऽऽदितो हृतम्।
लतायां पूर्वलूनायां प्रसूनस्याऽऽगमः कुतः ?॥ २०॥

चन्द्र। अवतरामि अहमार्य्य सुमन्त्र! स्यन्दनात्। (व)

सह वर्त्तमानं यथा तथा, अश्रूणि विसृज्येत्यर्थः, ("अस्रः कोणे कचे पुंसि क्लीवमश्रुणि शोणिते।" इति मेदिनी) आत्मगतं—स्वगतम्, आहेति शेषः। हृदय!—चेतः, किं—कथम्, अन्यथा—अन्यविधं, नायमृषिकुमारः, परं रामचन्द्रस्यैव इत्येवंरूपमित्यर्थः, परिकल्पयसि?—वितर्कयसि, चिन्तयसीत्यर्थः; एतस्मिन् ऋषिकुमारे रामचन्द्रस्य भूयः साधर्म्यं विलोक्य रघुमणिसुतत्वेनामुं कथं विभावयसि? सर्वथैवासम्भवात् ईदृशी परिकल्पना त्वया न कार्य्येति भावः।

रामभद्रस्य प्रत्यवयवसाम्यमेतस्मिन् कुमारे विलोक्य तत्सुतोऽयं किमु? इति प्राक् समाशङ्क्य पश्चात् तथाविधाशङ्कायाः अमूलकत्वमाह, मनोरथस्येति।— मनोरथस्य अयं वीरपोतः सीतागर्भसम्भूतः भगवतो रामचन्द्रस्यैव तनयः एवंविधाभिलाषस्येत्यर्थः, यत् बीजं मूलं कारणं, सीतारूपं निदानमित्यर्थः, तत् सीतारूपं बीजमिति यावत्, दैवेन प्रतिकूलादृष्टेन, आदितः प्रथमत एव, हृतं विनाशितम्; एकाकिन्याः गर्भभारमन्थरायाः वैदेह्याः श्वापदसङ्कुले सर्व्वप्राणिभयङ्करे जनस्थाने निर्वासनात् परं क्षणमपि तस्या जीवनस्थित्यसम्भवात् दुरदृष्टेन तथाविधाऽऽशा समूलमेवोन्मूलिता इति भावः। एतदेव व्यतिरेकदृष्टान्तेन विशदीकरोति, लतायामिति।— लतायां व्रतत्यां, पूर्व्वलूनायां पूर्व्वं प्राक्, प्रथमत एवेत्यर्थः, लूनायां छिन्नायां सत्यां, प्रसूनस्य कुसुमस्य, आगमः समुत्पत्तिः, कुतः? कस्मादेव हेतोः भवेत्? नैव कथमप्येतत् सम्भवतीत्यर्थः; विलूनायां वल्ल्यां यथा कुसुमानि कदाऽपि न उत्पद्यन्ते, एवमेव निर्वासनात्परं दण्डकारण्ये श्वापदभक्षितायाः सीतायाः सुतोत्पत्तिपरिकल्पना सुदूरपराहतैवेति भावः। [अत्र गर्भभारालसायाः सीतायाः विनाशात् परमपि, तस्या एवायं तनयः अवयवसाम्यात् प्रतिभाति, इत्थं हि परिकल्पनं, छिन्नमूलायाः लतायाः कुसुमोत्पत्तिः यथा न सम्भवति, तथैवासम्भवमेवेति व्यतिरेकेण बीजभूतया सीतया सह लूनलतायाः, मनोरथेन च सह प्रसूनस्य विम्बप्रतिविम्बभावावबोधात् वैधर्म्येण दृष्टान्तालङ्कारः]॥ २०॥

(व) आर्य्य!—पूज्य!, सुमन्त्र!—भोः सुमन्त्राख्यसारथे!, स्यन्दनात्—रथात्, अवतरामि—अवरोहामि। सुमन्त्राभिमतग्रहणार्थमुक्तिरियं चन्द्रकेतोः।

सुमन्त्रः। तत्कस्य हेतोः ? (अ)

चन्द्र। यतस्तावदयं वीरपुरुषः पूजितो भवति। अपिच खलु आर्य्य ! क्षात्त्रधर्मः परिपालितो भवति। न रथिनः पादचारमायोधयन्तीति शास्त्रविदः परिभाषन्ते। (ब)

सुमन्त्रः। [स्वगतम्]। कष्टं वतानुप्रपन्नोऽस्मि। (स)—

कथं न्याय्यमनुष्ठानं मादृशः प्रतिषेधतु ?।
कथं वाऽप्यनुजानातु साहसैकरसां क्रियाम् ?॥ २१॥

(अ) तत्—अवतरणं, कस्य हेतोः ?—किमर्थम् ? ; तुमुले एतस्मिन् सङ्ग्रामे कस्मै कार्य्याय त्वं पदातिः भवितुमिच्छसीति भावः। [अत्र "सर्व्वनाम्नस्तृतीया च" (२।३।२७पा०) इति सूत्रेण पाक्षिकी षष्ठी विज्ञेया]।

(ब) यतः,—यस्मात् कारणात्, भूमाववरोहणरूपादित्यर्थः, अयं—पुरो वर्त्तमानः, पादचारीत्यर्थः, वीरपुरुषः,—अलौकिकवीर्य्यविभूषितः कुमारो लवः, पूजितो भवति—सत्कृतो भवति ; यतोऽयं पादचारी, अतः पदातिनैव सता मया अनेन सह योद्धव्यं, तेन हि मे विनयः प्रकटीकृतः भवेत्, अयञ्च महावीरः यथायोग्यं सत्कृतोऽपि स्यादिति भावः। कारणान्तरमाह, अपिचेति।—अपिच—अन्यच्च, खलु—निश्चितं, क्षात्त्रधर्म्मः,—क्षत्त्राणामयं क्षात्त्रः, स चासौ धर्म्मश्चेति, क्षत्त्रियजातिनियम इत्यर्थः, युद्धनीतिरिति यावत्, परिपालितः,—संरक्षितः, विधिवदनुसृत इति यावत्, भवति—सम्पद्यते ; रथावतरणेन सुक्षत्त्रियाणां सदाचारोऽपि यथायोग्यं समादृतः भवेदिति भावः। अत्र शास्त्राभिमतमाह, नेति।—रथिनः,—रथचारिणः, स्यन्दनारूढा योधाः इत्यर्थः, पादचारं—पादेन चारः,—भ्रमणं यस्य तं पदातिं, न आयोधयन्ति—न अभियुञ्जते, न सङ्ग्रामयन्तीत्यर्थः, इति—एवं, शास्त्रविदः,—शास्त्राभिज्ञाः, क्षत्त्रधर्म्मानुशासितारः मन्वादयः इत्यर्थः, परिभाषन्ते—ब्रुवन्ति, आमनन्तीत्यर्थः। "न च हन्यात् स्थलारूढं न क्लीवं न कृताञ्जलिम्।" इति मनुः ; "स्वयं रथस्थो रथं त्यक्त्वा स्थलारूढं न हन्यात्" इति च तद्व्याख्याने कुल्लूकभट्टः। अत्र सुस्फुटमाह चतुर्वर्गचिन्तामणिः, यथा—"रथी च रथिना सार्द्धं पदातिश्च पदातिना। कुञ्जरस्थो गजस्थेन योद्धव्यो भृगुनन्दन !॥" इति।

(स) वत—खेदे, अव्ययमिदम्। कष्टं—कृच्छ्रम्, अनुप्रपन्नः,—प्राप्तः, अस्मि—भवामि, इदानीं कर्त्तव्यं निर्णेतुमपारयन् अतिव्याकुलः संवृत्तोऽस्मीति भावः।

अथ कष्टहेतुं विनिर्द्दिशति, कथमिति।—मादृशः युद्धनीतितत्त्वज्ञः रघुकुल-

चन्द्र। यदा तातमिश्रा अपि पितुः प्रियसखं धर्मार्थसंशयेषु आर्य्यमेव पृच्छन्ति, तत्किमार्य्यो विमृशति ?। (ह)

सुमन्त्रः। आयुष्मन्! एवं यथाधर्ममभिसन्धसे। (क)—

स्थित्यभिज्ञयातिहद्धो जनः इत्यर्थः, न्याय्यं न्यायादनपेतं, शास्त्रविहितमिति यावत्, अनुष्ठानम् आचरणं, रथावतरणरूपं सुचत्रियोचितं व्यवहारमिति यावत्, कथं केन प्रकारेण, प्रतिषेधतु ? निवारयतु ; मद्विधजनानां शास्त्रविरुद्धकार्य्यानुष्ठानोपदेशनमतीव विगर्हितमिति भावः। पक्षान्तरमाह, कथमिति।—कथं वाऽपि केन प्रकारेण च, कया युक्त्या वेत्यर्थः, साहसैकरसां साहसम् अविमृश्यकारित्वं, वीरेणानेन सह पादचारी भूत्वा युद्धकरणरूपमिति यावत्, एकः केवलः, रसः रागः, युद्धप्रवर्त्तको रागविशेषः इति यावत्, यत्र तादृशीं, क्रियां कर्म्म, पादचारयुद्धमिति यावत्, अनुजानातु ? अनुमोदयतु ? अनुमन्तुं शक्नुयादित्यर्थः ; रथादवतीर्य्यानेन वीरबालकेन सहास्मिन् युद्धे चन्द्रकेतोः भाविनीं महतीं विपदं समाशङ्कमानोऽप्यहं रघुकुलस्थितिपरम्परां चत्रियाचारञ्चाभिजानन् कथममुं स्वकुलाचारपालनाभिलाषिणं कुमारं धर्म्मयुद्धात् निवर्त्तयितुमुपदिशामि इति भृशं चिन्ताकुलः विषमायां दशायां समापतितोऽस्मीति भावः॥ २१॥

(ह) यदा—यतः, तातमिश्राः अपि—पूज्यपादाः पितरः रामचन्द्रादयोऽपीत्यर्थः, अतीव नयविदः विचक्षणाः मद्गुरवोऽपि इत्यपिशब्दार्थः, धर्म्मार्थसंशयेषु—धर्म्मश्च अर्थश्च तौ धर्म्मार्थौ, तयोः संशयेषु—"अत्र धर्म्मशास्त्रानुशिष्टः पन्थाः कीदृशः ?" "किमु चात्र सन्दिग्धे वस्तुनि कर्त्तव्यम् ? कथं वा अत्र प्रवर्त्तितव्यम् ?" ईदृशेषु धर्म्मसन्देहेषु कर्त्तव्यविषयसंशयेषु च समुपस्थितेषु इत्यर्थः, पितुः प्रियसखं—तेषां जनकस्य दशरथस्य परमं मित्रम्, आर्य्यमेव—पूज्यतमं भवन्तमेव, पृच्छन्ति—जिज्ञासन्ते, कर्त्तव्यावधारणाय भवतोऽभिमतिं प्रार्थयन्ते इत्यर्थः ; सर्व्वत्र, विशेषतः सांशयिकविषयेषु तत्रभवतो निरतिशयप्रावीण्यादिति भावः ; तत्—ततः, पित्रादीनामपि संशयापनोदकत्वेन भवतः अतिविचक्षणत्वादित्यर्थः, किं—कथम्, आर्य्यः,—तत्रभवान् भवानित्यर्थः, विमृशति ?—विचिन्तयति।

(क) आयुष्मन्!—दीर्घायो!, एवम्—इत्थं, रथादवतीर्य्य क्रियमाणमायोधनमित्यर्थः, यथाधर्म्मं—यथाशास्त्रं, धर्म्मशास्त्रानुमोदितमिति यावत्, अभिसन्धसे—अवबुध्यसे ; रथादवतीर्य्यैव युद्धमुचितमिति यदिच्छसि तद्धर्म्मोचीनमेवेति भावः।

एष साङ्ग्रामिको न्याय एष धर्मः सनातनः।
इयं हि रघुसिंहानां वीरचारित्रपद्धतिः ॥ २२ ॥

चन्द्र। प्रतिरूपं वचनमार्य्यस्य। (ख)—

इतिहासं पुराणञ्च धर्मप्रवचनानि च।
भवन्त एव जानन्ति रघूणाञ्च कुलस्थितिम् ॥ २३ ॥

भवदभीप्सितं जन्यं हि धर्म्मशास्त्रानुमतमेव, एवं हि रघुभिरेतत् सुचिरमनुपाल्यते इत्युक्त्वा समर्थयति, एष इति।—एषः भवतोऽभीप्सितः पदातिर्भूत्वा पदातिना सह सङ्ग्राम इत्यर्थः, साङ्ग्रामिकः सङ्ग्रामे भवः, युद्धशास्त्रसम्मतः इत्यर्थः, न्यायः नियमः, एष सनातनः चिरन्तनः, धार्म्मिकैः महावीरैः सुचिरमनुपालित इत्यर्थः, धर्म्मः आचारः, शश्वदेवासङ्कुचितचेतसा अनुसृतः पन्था इति यावत्। न केवलमन्ये योधाः एवमनुसरन्ति, परन्तु भवतः पूर्व्वपुरुषाः अपि सततमेवमनुसृतवन्तः इत्याह, इयमिति।—इयं हि निश्चितं, रघुसिंहानां [रघवः सिंहा इवेत्युपमितसमासात्] रघुश्रेष्ठाः इत्यर्थः, तेषां, रघूत्तमानां शूराणामिति यावत्, वीरचारित्रस्य वीरोचिताचारस्य, पद्धतिः पन्थाः ; ईदृशेनैव सदाचारपथेन रघुपुङ्गवा अनिशं समचरन्त, इयमेव तेषामनुमता आसीदिति भावः ॥ २२ ॥

(ख) आर्य्यस्य—पूज्यस्य भवतः, वचनं—पूर्व्वोक्तं वाक्यं, प्रतिरूपम्—अनुरूपं, विधिसङ्गतमित्यर्थः ; भवादृशाः धार्म्मिकाः धर्म्मशास्त्रसङ्गतमेव वचनं सततमभिभाषन्ते इति भावः।

अथ स्वकुलक्रमागतसारथेः सुमन्त्रस्य न्याय्यवचनप्रयोगे हेतुं प्रतिपादयति, इतिहासमिति।—भवन्त एव भवादृशाः विज्ञा एव ; नान्ये साधारणपुमांस इति भावः ; इतिहासं पुरावृत्तं, "धर्म्मार्थकाममोक्षाणामुपदेशसमन्वितम्। पुरावृत्तकथायुक्तमितिहासं प्रचक्षते ॥" इत्युक्तलक्षणं पारम्पर्य्योपदेशेन अतीतघटनावलीप्रकाशकं ग्रन्थविशेषमिति यावत्, पुराणञ्च पञ्चलक्षणान्वितं शास्त्रविशेषञ्च, "सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च। वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम् ॥" इत्युक्तलक्षणसमन्वितं ग्रन्थविशेषमित्यर्थः, धर्म्मप्रवचनानि च वर्णाश्रमाणां कर्त्तव्यादिविधायकानि मन्वादिधर्म्मशास्त्राणि च, तथा, रघूणां रघुकुलसन्तानानां, कुलस्थितिं वंशमर्य्यादाञ्च, चिरानुशीलितसदाचारपद्धतिमित्यर्थः, जानन्ति विदन्ति ; इह भुवि भवादृशाः विज्ञतमाः अतिविरला एवेति भावः। [अत्र प्रस्तुताप्रस्तुतपदार्थानामेकयैव जानन्ति इति क्रियया अभिसम्बन्धात् दीपकालङ्कारः; उपात्तवाक्यस्य

सुमन्त्रः। [सस्नेहास्रं परिष्वज्य]। (ग)—

जातस्य ते पितुरपीन्द्रजितो निहन्तु-
र्वत्सस्य वत्स! कति नाम दिनान्यमूनि।
तस्याप्यपत्यमनुगच्छति वीरवृत्तं
दिष्ट्या गतं दशरथस्य कुलं प्रतिष्ठाम्॥ २४॥

जानन्तीति क्रियया परिसमाप्तावपि रघूणाञ्चेत्यनेन पुनरुपात्तत्वात् समाप्तपुनरात्तता-ऽऽख्यो दोषः "कुलस्थितिं रघूणाञ्च भवन्त एव जानते" इत्यनेन समाधातव्यः॥ २३॥

(ग) स्नेहेन—वात्सल्येन, अस्रेण—आनन्दाश्रुणा च सह वर्त्तमानं यथा स्यात्तथेत्यर्थः, परिष्वज्य—आलिङ्ग्य, आहेति शेषः।

अथ चन्द्रकेतोः वीरोचितां प्रवृत्तिं विलोक्य प्रीतः सुमन्त्रः तं सस्नेहप्रीतिवचसा परितोषयति, जातस्येति।—वत्स! आयुष्मन् चन्द्रकेतो!, इन्द्रजितः सङ्ग्रामे देवराज-स्यापि विजयिनः मेघनादनाम्नः रावणपुत्रस्य, निहन्तुः निसूदनस्य, ("निहन्तुः" इत्यत्र "विजेतुः" इति पाठान्तरम्) वत्सस्य निरतिशयस्नेहास्पदस्य, ते पितुरपि तव जनकस्य लक्ष्मणस्यापि, जातस्य समुत्पन्नस्य सतः, अमूनि एतानि, जन्मत आरभ्य अद्य पर्यन्तानीत्यर्थः, कति नाम कियन्ति एव, नामेति सम्भावनायां, दिनानि दिवसाः, संवृत्तानीति शेषः, स्नेहास्पदस्य सौमित्रेः जन्मतः प्रभृति अत्यल्पसंख्यकानि खलु दिनानि समतीतानीत्यर्थः; एतस्य तु वयः एतावदेव अल्पीयः, यदस्माभिः इतः किञ्चित्पूर्व्वमेव तत् परिदृष्टमित्यनुमीयते, सोऽपि वृत्रहन्तृविजयिनं वीरप्रकाण्डं मेघनादं विनाशितवानिति अतीवाश्चर्य्यम् इति भावः; तस्यापि एतादृगत्यल्पवयसः शिशोर्लक्ष्मणस्यापीत्यर्थः, अपत्यं तनयः, शिशोरपि शिशुः भवान् चन्द्रकेतुरित्यर्थः, वीरवृत्तं वीरपुरुषाचारम्, अनुगच्छति अनुसरति, परिपालयतीत्यर्थः, दिष्ट्या भाग्येन, आह्लादसूचकमव्ययमेतत्, ("दिष्ट्या हर्षे मङ्गले च" इति मेदिनी) दशरथस्य कुलं वंशः, प्रतिष्ठां स्थितिं, गतं प्राप्तं, सगौरवावस्थितिं लब्धमित्यर्थः; अहो! सुदिवसः अस्माकं समुदितः, यद्दशरथस्य महाराजस्य कुलस्थितिः, सुयोग्येनापत्येन सततमनुष्ठितवीराचारेण त्वया अविचलभावेन सुसंरक्ष्यते, तेनैव हेतुना जगति चायं वंशः अविच्छिन्नां ख्यातिं समधिगतवानिति भावः। [अत्र चतुर्थपादगतवाक्यार्थं प्रति पूर्व्वोक्तपादत्रितयस्थवाक्यार्थानां हेतुभूततयो-पन्यासात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः]। वसन्ततिलकं वृत्तम्॥ २४॥

चन्द्र। [सकरुणम्]।—

> अप्रतिष्ठे रघुज्येष्ठे का प्रतिष्ठा कुलस्य नः।
> इति दुःखेन तप्यन्ते त्रयो नः पितरोऽपरे॥ २५॥

सुमन्त्रः। अहह! हृदयमर्मदारुणानि एतानि चन्द्रकेतोर्वचनानि। (घ)

लवः। हन्त! मिश्रीकृतो रसक्रमो वर्त्तते। (ङ)—

अथ रघुकुललक्ष्म्याः सीतायाः पूर्णगर्भायाः निर्वासनात् परमत्यर्थमनुतप्तानां स्वपितॄणां दुःखायमानं मानसमनुभवन् नितरां निर्विण्णः चन्द्रकेतुः तदभावादेव स्वकुलस्थितेरकिञ्चित्करतामाह, अप्रतिष्ठे इति।—रघुज्येष्ठे रघुकुलोद्वहे, रामचन्द्रे इत्यर्थः, अप्रतिष्ठे प्रतिष्ठामनधिगतवति सति, अपत्याभावे तद्वंशरक्षायाः अभावात् कुलस्थितिमलभमाने सतीत्यर्थः, नः अस्माकं, कुलस्य वंशस्य, प्रतिष्ठा स्थितिः, का? कीदृशी, भवेदिति शेषः; सर्व्वगुणविभूषिते ज्येष्ठे रामचन्द्रे सन्तति-विरहिते अस्मद्रूपाणां सन्तानानां सतामपि असद्रूपत्वमेवेति भावः; इति अस्माद्धेतोः, अनेनैवेत्यर्थः, दुःखेन शोकेन, नः अस्माकम्, अपरे अन्ये, रामचन्द्रभिन्नाः इत्यर्थः, त्रयः पितरः त्रिसंख्यकाः पितृपादाः, भरतलक्ष्मणशत्रुघ्ना इत्यर्थः, तप्यन्ते दह्यन्ते, मर्म्मव्यथामनुभवन्तीत्यर्थः। [अत्र करुणो रसः रामविषयकरतिभावस्याङ्गमिति रसव-दलङ्कारः] ॥ २५॥

(घ) अहह—इति खेदसूचकमव्ययम्। एतानि—इतः प्रागेवोक्तानि इत्यर्थः, चन्द्रकेतोः वचनानि—लक्ष्मणात्मजस्य वाक्यानि, हृदयमर्मदारुणानि—हृदयस्य—अन्तःकरणस्य, मर्मणां—जीवस्थानानाञ्च; यद्यपि "सप्तोत्तरं मर्मशतमायुर्वेदविदो भाषन्ते, तेषु वस्तिहृदयशिरांसि त्रीणि प्रधानमर्माणि" इति वैद्यकोक्त्या मर्मशब्देनैव हृदयं लभ्यते, तथाऽपि मर्मान्तरापेक्षया विशेषेण दारुणद्योतनार्थं तस्य पृथगुपा-दानम्; यद्वा,—हृदयम्—अन्तःकरणरूपं, मर्म तस्य; यद्वा,—हृदयस्य मर्मणां—सन्धिस्थानानां, दारुणानि—दार्य्यन्ते—विपाट्यन्ते एभिरिति तथोक्तानि, भवन्तीति शेषः, चन्द्रकेतोः वचांसि अस्माकं मर्माणि विदारयन्तीत्यर्थः।

(ङ) हन्त—इति हर्षे, ("हन्त हर्षेऽनुकम्पायाम्" इत्यमरः) मिश्रीकृतः,—अमिश्रः मिश्रः कृतः,—रसान्तरेणासम्भिन्नीकृतः, स्वविरुद्धैः रसैः एकीभावमापादित इत्यर्थः, रसक्रमः,—रसयोः,—वात्सल्यवीरयोः शृङ्गारवीरयोर्वा, क्रमः,—पर्य्यायः,

यथेन्दावानन्दं व्रजति समुपोढे कुमुदिनी
तथैवास्मिन् दृष्टिर्मम, कलहकामः पुनरयम्।
झणत्कारक्रूरक्वणितगुणगुञ्जद्गुरुधनु-
र्धृतप्रेमा बाहुर्विकचविकरालोल्बणरसः॥ २६॥

परस्परविरुद्धरसद्वयमिति यावत, वर्त्तते—विद्यते; असुं वीरमवलोक्य मम यथा हि स्नेहाधिक्यात् वात्सल्यरसातिरेकः सञ्जायते, तथैव अमुष्य वीरस्य मया सह युद्धे अत्यधिकोत्साहदर्शनात् वीररससमुद्रेकश्च भवतीति दृश्यते इति भावः।

अथ रत्युत्साहस्थायिभावयोः शृङ्गारवीररसयोः एकत्र समये स्वस्मिन् कथं हि सम्मिश्रणभावः समुदितः, तदेव विशदीकृत्य विवृणोति, यथेति।—इन्दौ चन्द्रे, समुपोढे समुदिते सति, कुमुदिनी कैरविणी, यथा यद्वत्, आनन्दं हर्षं, विकाशमित्यर्थः, व्रजति प्राप्नोति, अस्मिन् पुरोवर्त्तिनि, कुमारे चन्द्रकेतौ इति यावत्, मम दृष्टिः नेत्रं, तथैव तादृगेव, आनन्दं व्रजति इत्यन्वयः, प्रीति-प्रफुल्लतां यातीत्यर्थः; कुमारमिममवलोक्य हर्षातिशय्योदयात् मदीये नयने अनिर्व्वचनीयमानन्दमनुभवत इति भावः। इत्थं शृङ्गाररसाविर्भावमुपवर्ण्य वीर-रसोद्रेकमाह, कलहेति।—पुनः किन्तु, कलहकामः कलहम् अनेन चन्द्र-केतुना सह सङ्ग्रामं, कामयते अभिलषति यस्तथोक्तः, समराभिलाषुक इत्यर्थः, अयं बाहुः एष मदीयः भुजः, झणदिति।—झणत्कारेण झणझणेत्याकार-काव्यक्तध्वनिना, क्रूरम् अतिकर्कशं यथा स्यात्तथा, क्वणितः शब्दितः, यो गुणः मौर्वी, यद्वा,—झणत्कारं झणत्काररूपं, झणझणेत्याकारकमव्यक्तमित्यर्थः, क्रूरम् अतिकठोरं, क्वणितं निनादः यस्य तथाविधः यो गुणः ज्या, तेन गुञ्जत् शब्दायमानं, गुरु महत्, धनुः कार्मुकं, तस्मिन् धृतं बद्धं, प्रेम प्रणयः, स्पृहाभिलाष इति यावत्, येन तथोक्तः सन्, भीषणनिनादेन शरासनस्य ज्यां निरन्तरमास्फालयितुमभिलाषुकः सन्नित्यर्थः, विकचविकरालोल्बणरसः विकचः सुव्यक्तः, विकरालः अतिभीषणः, अतिभयावहः इति यावत्, ("करालो दन्तुरे तुङ्गे भीषणे चाभिधेयवत्।" इति मेदिनी) उल्बणरसः उद्धतरसः, वीररसः इति यावत् यस्मिन् तथाविधः, सञ्जात इति शेषः; यद्यपि इमं सौम्यदर्शनं कुमारमवलोक्य सपदि मे नेत्रद्वयं प्रीतिविस्फारितं भवति, तथाऽपि पुरतः महावीरमेतमासाद्य योद्धुमना मदीयो बाहुः ज्यायाः टङ्कारेण दिशं विदिशश्चापूर्य्य शरान् विमोचयितुमभिलषतीत्यहो!

चन्द्र । [अवतरणं रूपयन्] । आर्य्य ! सावित्रश्चन्द्रकेतुः अभिवादयते । (च)

सुमन्त्रः । अजितं पुण्यमोजस्वि काकुत्स्थस्येव ते महः ।
श्रेयसे शाश्वतो देवो वराहः परिकल्पताम् ॥ २७ ॥

विरुद्धयोः द्वयोरिव रसयोरेकत्र विचित्रसमावेशः इति परं विस्मितोऽस्मीति भावः । [अत्र परस्परं विरुद्धयोः स्नेहवैरयोरेकत्र सङ्घटनात् विषमालङ्कारः, तथा कुमुदिन्या सह अवैधर्म्यमात्योपदेशाच्च श्रौतोपमाऽलङ्कारः, इत्यनयोरङ्गाङ्गिभावेन सङ्करः । किञ्च एतस्मिन् रसस्य स्वशब्देनैवाभिधानात् स्वशब्दोक्तिनिबन्धनो दोषः, "रसस्योक्तिः स्वशब्देन स्थायिसञ्चारिणोरपि" इति दर्पणोक्तेः । एवमेव गुञ्जनस्य भ्रमरकृते एव प्रसिद्धत्वात् तदन्यत्र धनुर्निस्वनादौ तथाप्रसिद्धिविरहेण ख्यातिविरुद्धतादोषश्च "गुञ्जत्" इत्यत्र "गर्ज्जत्" इत्यादि शब्दप्रयोगेण परीहारः करणीय इति । श्लोकस्यास्य पूर्व्वार्द्धे रतिस्थायिभावकः शृङ्गारो रसः, प्रसादो गुणः, कैशिकी रीतिश्च, उत्तरार्द्धे तु उत्साहस्थायिभावको वीरो रसः, ओजो गुणः, आरभटी च रीतिः, इत्युभयोः रसयोरेकत्र समावेशात् सन्मिश्रणमिति ज्ञेयम्] । शिखरिणी वृत्तम् ॥ २६ ॥

(च) आर्य्य !—पूज्य सुमन्त्र !, सावित्रः,—सवितुः,—सूर्य्यस्यापत्यं पुमान्, सवितृकुलसम्भूतः इत्यर्थः, चन्द्रकेतुः,—तदाख्यः लक्ष्मणात्मजः, अभिवादयते—प्रणमति, भवन्तमिति शेषः ; "नामधाहमभिवादयेत्" इत्यादिस्मृतेः स्वनामग्रहणपूर्व्वकाभिवादनं कृतमिति ज्ञेयम् ।

अथ कुलक्रमागतसारथिः सुमन्त्रः अभिवादयमानं कुमारं समुचितेन आशिषा संवर्द्धयति, अजितमिति ।—शाश्वतः नित्यः, उत्पत्तिविनाशरहितः इत्यर्थः, देवः द्योतमानः, भगवानित्यर्थः, वराहः शूकररूपेणावतीर्णः, स्वीकृतवराहशरीरः भगवान्नारायण इत्यर्थः, काकुत्स्थस्येव काकुत्स्थगोत्रसम्भूतस्य जगत्पतेः रामभद्रस्येवेत्यर्थः, ते तव, अजितं परैरनभिभूतं, पुण्यं पवित्रम्, ओजस्वि अतिप्रबलं, सर्व्वत्राप्रतिहतमित्यर्थः, महः तेजः, श्रेयसे शुभाय, विजयमङ्गलायेति यावत्, परिकल्पतां सम्पादयतु, सर्व्वतोभावेन विदधातु इत्यर्थः । ["कॢपि सम्पद्यमाने च" (वा०) इति चतुर्थी ; केचित्तु "तादर्थ्ये चतुर्थी वाच्या" (वा०) इति सूत्रेण चतुर्थीं मन्वशासत । पुरा भीषणसङ्ग्रामे आदिदैत्यस्य हिरण्याक्षस्य निहन्तुः आदिवराहमूर्त्तिधरस्य भगवतो नारायणस्य अपौरुषेयप्रभावं संस्मृत्य सुमन्त्रः कुमारस्य उपस्थिते सङ्ग्रामे तस्मादेव भगवतो विजयाशिषं सम्प्रार्थितवानिति ज्ञेयम् । पुरा हि त्रेतायां

अपिच,—

> देवस्त्वां सविता धिनोतु समरे गोत्रस्य यस्ते पिता
> त्वां मैत्रावरुणोऽपि नन्दतु गुरुर्यस्ते गुरूणामपि।
> ऐन्द्रं वैष्णवमाग्निमारुतमथो सौपर्णमोजोऽस्तु ते
> देयादेव च रामलक्ष्मणधनुर्ज्याघोषमन्त्रो जयम्॥ २८॥

देवासुरयुद्धे भगवतो नारायणस्य तेजसा आप्यायितः पुरञ्जयो नाम सूर्य्यवंशीयः कश्चित्पराक्रान्तः नरपतिः इन्द्रादिभिः देवसङ्घैः भृशमभिप्रार्थितः वृषभरूपधारिणः इन्द्रस्य ककुदमास्थाय सर्व्वमेवासुरबलं निजघान, तेन चासौ ककुत्स्थसंज्ञामवापेति ककुत्स्थशब्दप्रवृत्तिनिमित्तभूता पौराणिकी कथा अत्रानुसन्धेयेति]॥ २७॥

मङ्गलान्तरेण विजयाशिषा कुमारं पुनः संवर्द्धयति, देवस्त्वामिति।—देवः द्योतमानः, सविता भगवान् सूर्य्यः, समरे सङ्ग्रामे, त्वां भवन्तं, धिनोतु प्रीणयतु, असामान्यं तेजः सम्प्रदाय त्वां संवर्द्धयत्वित्यर्थः, ["धिवि प्रीणने" इति धातोः लटि रूपम्]। यः भगवान् सविता, ते तव, गोत्रस्य वंशस्य, पिता जनयिता, प्रवर्त्तकः इत्यर्थः, आदिपुरुष इति यावत्, मैत्रावरुणोऽपि वशिष्ठोऽपि, [मित्रश्च वरुणश्चेति द्वन्द्वे मित्रावरुणाविति पदात् "देवताद्वन्द्वे च" (६।३।२६ पा०) इत्यानङ्विधानात्, ततः तयोरपत्यं पुमानित्यर्थे शैषिकः अण्प्रत्ययः, "शिवादिभ्योऽण्" (४।१।११२पा०) इति वा अण्प्रत्ययः, शिवादेराकृतिगणत्वादिति ज्ञेयम्। अत्र "अत इञ्" (४।१।९५पा०) इति इञ्प्रत्ययस्य विधानात् "मैत्रावरुणिः" इत्येव भवितुं युक्तमित्युत्पश्यामः]। एकस्मिन् कल्पे मित्रस्य कल्पान्तरे च वरुणस्य पुत्रत्वेनास्य ईदृशी संज्ञा सम्प्रवृत्तेति ज्ञेयम्। त्वां भवन्तं, नन्दतु विजयाशिषा प्रीणयतु, यः मैत्रावरुणः, ते तव, गुरूणामपि पित्रादीनामपि, गुरुः पूजनीयः, भवतीति शेषः, ऐन्द्रम् इन्द्रस्येदम्, इन्द्रसम्बन्धीत्यर्थः, वैष्णवं विष्णोरिदं, विष्णुसम्बन्धीत्यर्थः, आग्निमारुतम् अग्निमरुतोरिदम्, अग्निसम्बन्धि मरुत्सम्बन्धि चेत्यर्थः, वैश्वानरं वायव्यञ्चेति यावत्, ["देवताद्वन्द्वे च" (७।३।२१ पा०) इति पूर्व्वोत्तरपदवृद्धिः। "इद्वृद्धौ" (६।३।२८पा०) इति अग्नेरिदादेशश्च]। अथो अपिच, ("अथाथो संशये स्यातामधिकारे च मङ्गले। विकल्पानन्तरप्रश्नकार्त्स्न्यारम्भसमुच्चये॥" इति मेदिनी) सौपर्णं सुपर्णस्य गरुड़स्येदं, गरुड़सम्बन्धीत्यर्थः, ओजः तेजः, ते तव, अस्तु भवतु, इन्द्रादीनां देवानां सदृशं भवतः तेजः भवत्वित्यर्थः; रामेति।—

लवः। कुमार! अति हि नाम शोभसे रथस्थ एव, कृतं कृतमत्यादरेण। (छ)

चन्द्र। तर्हि महाभागोऽप्यन्यं रथमलङ्करोतु। (ज)

लवः। [सुमन्त्रं प्रति]। आर्य्य! प्रत्यारोपय रथोपरि राजपुत्रम्। (झ)

रामलक्ष्मणयोः राघवसौमित्र्योः, धनुषः शरासनस्य, या ज्या मौर्व्वी, तस्याः घोषः टङ्कारध्वनिः, स एव मन्त्रः ब्रह्मास्त्रप्रयोगार्थम् आम्नायसमुदाय इत्यर्थः, जयं सङ्ग्रामेऽस्मिन् विजयलक्ष्मीमिति यावत्, देयाद्देव च ददात्वेव; अमितविक्रमौ रामलक्ष्मणौ यथा सङ्ग्रामे भीषणकार्मुकस्य ज्याशब्देनैव सर्व्वान् रिपून् समूलमुन्मूल्य विजयलक्ष्म्या नियतं शुशुभाते, एवमेव भवानेतस्मिन् सङ्ग्रामे जयश्रियं लभतामिति भावः। [अत्रान्येषां तेजः कथमन्यो वहत्विति वस्तुसम्बन्धः सर्व्वथा असम्भवन्नपि बिम्बप्रतिबिम्बभावेन इन्द्रादीनां तेजःसदृशमेव तेजोऽस्त्वित्येवमेवावगमयतीत्यतोऽसम्भवद्वस्तुसम्बन्धरूपो निदर्शनाऽलङ्कारः। इह पूर्व्वार्द्धस्थितयच्छब्दयोः तच्छब्देन ताद्दशापेक्षाविरहादेव न विधेयाविमर्षाख्यो दोषः इत्यवधेयम्। देयाद्देवेत्यत्र एवकारस्य स्वार्थायोगव्यवच्छेदकार्थकतया नियमेन नियतसम्बन्धस्यैवावबोधनात् न अनियमे नियमाख्यदोषः इत्यवधेयम]। शार्दूलविक्रीड़ितं वृत्तम् ॥ २८ ॥

(छ) रथस्थ एव—स्यन्दनाधिरूढ़ एवेत्यर्थः, अति हि—अत्यर्थमेव, नूनमिति यावत्, शोभसे—राजसे, शोभान्वितो भवसीत्यर्थः, नाम—सम्भावनायाम्, इत्यहं सम्भावयामीत्यर्थः; अतः अत्यादरेण—रथावतरणरूपबहुमानप्रदर्शनेनेति यावत, कृतं कृतम्—अलमलम्; [सम्भ्रमे द्विर्वचनम्] अधुना रथादवतीर्य्य त्वया सम्मानप्रदर्शनं न करणीयमिति भावः।

(ज) तर्हि—तदा, त्वयि रथस्थे सतीत्यर्थः, महाभागोऽपि—महान्—अत्यधिकः, भागः,—भाग्यं, वीरत्वसौभाग्यमिति यावत् यस्य तथाविधः, भवानपीत्यर्थः, अन्यं रथम्—अपरं स्यन्दनम्, अलङ्करोतु—भूषयतु, आरोहणेनेति शेषः; भवति महावीरे पादचारिणि मम रथारोहणं न युज्यते इति भावः।

(झ) आर्य्य!—मान्य सुमन्त्र!; चन्द्रकेतौ मैत्रीसंस्थापनात् तत्कृतं सुमन्त्रे बहुमानं विलोक्यैव स्वयमपि तस्मिन्नत्यादरं प्रदर्शितवानिति ज्ञेयम्। रथोपरि—रथस्य—स्यन्दनस्य, उपरि—ऊर्द्ध्वं, स्यन्दने इत्यर्थः, राजपुत्रं—कुमारं चन्द्रकेतुं, प्रत्यारोपय—आरोहय।

सुमन्त्रः। त्वमप्यनुरुध्यस्व चन्द्रकेतोर्वचनम्। (ञ)

लवः। को विचारः स्वेषु उपकरणेषु? किन्तु अरण्यसदो वयमनभ्यस्तरथचर्य्याः। (ट)

सुमन्त्रः। जानासि वत्स! दर्पसौजन्ययोर्यथोचितमीरयितुम्; यदि पुनरीदृशं त्वामैक्ष्वाको रामभद्रः पश्येत्, तदा अस्य स्नेहेन हृदयमभिष्यन्देत। (ठ)

(ञ) त्वमपि—भवानपि, चन्द्रकेतोः,—कुमारस्य, वचनं—वाक्यं, त्वयि रथारोहणप्रार्थनामित्यर्थः, अनुरुध्यस्व—अनुपालय; रथारोहणेन एतन्मनोरथं प्रपूरयेति भावः।

(ट) को विचारः?—कः विवेकः, को वितर्क इति यावत्, स्वेषु—स्वकीयेषु, आत्मभूतेष्विति यावत्; एतस्मिन् कुमारे मैत्रीसंस्थापनात् अमुष्य सर्व्व द्रव्यं मदीयमेव सञ्जातम्, अतः स्वद्रव्यमिव एतद्द्रव्यमपि यथेच्छमेव मया ग्रहणीयं, न हि केनचित् कियानपि संशयः स्वद्रव्यव्यवहारे क्रियते इति भावः; यद्वा,—स्वेषु—निजप्रयोजनीयेषु, उपकरणेषु—उपकारसाधनीभूतवस्तुषु, सङ्ग्रामोपयोगिरथादिषु इति यावत्, किन्तु—परन्तु, अरण्यसदः,—अरण्ये—वने, सीदन्ति—निवसन्ति ये तथोक्ताः, वनवासिन इत्यर्थः, वयम्—अहमित्यर्थः, [अस्मदः एकत्वे बहुत्वप्रयोगादिति] अनभ्यस्तरथचर्य्याः,—अनभ्यस्ता—न शिक्षिता, रथेन—स्यन्दनेन, चर्य्या—सञ्चरणं यैस्तथोक्ताः, अविज्ञातरथारोहणादिव्यवहारा इत्यर्थः, भवान इति शेषः; अहं हि आरण्यकः, तेन इतः प्राक् कदापि रथं नारोहयमतोऽधुना रथमारुह्य योद्धुं नाभिलषामि इति भावः।

(ठ) जानासि—वेत्सि, वत्स!—आयुष्मन् लव!, दर्पसौजन्ययोः,—अहङ्कारविनययोः, यथोचितम्—उचितमनतिक्रम्य [इत्यव्ययीभावः] यथोपयुक्तमित्यर्थः, औचित्यस्यापरिहारपूर्व्वकमिति यावत्; ईरयितुम्—अभिधातुं, व्यवहर्त्तुमित्यर्थः; यादृशेन वाग्विन्यासेन ओजस्विता सुजनता च व्यक्तीभवति, तादृशीं वाचमभिधातुं त्वं सम्यगभिज्ञो भवसीति भावः; स्वेषामरण्यनिवासित्वाद्यभिधानेन वन्योऽप्यहं पदातिर्भूत्वैव रथचारिणा भवता सह योत्स्ये, त्वत्तः ईषदपि न बिभेमि, इत्यस्मात्मनः निर्भीकतायाः तेजस्वितायाश्च प्रकटीकरणात् स्वकीयगर्व्वभावः कियद्धि व्यक्तीभूतोऽभूत, एवमेव चन्द्रकेतोः रथे "स्वेषूपकरणेषु" इत्युक्त्वा आत्मीयत्वप्रतिपादनात् स्वस्याति-

लवः। मान्य! सुजनः स राजर्षिः श्रूयते। (ड)

[सलज्जमिव]। (ढ)—

वयमपि न खल्वेवम्प्रायाः क्रतुप्रविघातिनः
क इह च गुणैस्तं राजानं न वा बहु मन्यते ?।
तदपि खलु मे स व्याहारस्तुरङ्गमरक्षिणां
विकृतिमखिलक्षत्राक्षेपप्रचण्डतयाऽकरोत् ॥ २९ ॥

विनयित्वञ्च सम्यक्तया स्फुटीभूतमभूदित्यवधेयम्। यदि पुनः,—चेद्यदि, ईदृशं—शौर्य्यसौजन्यादिगुणगणविभूषितमित्यर्थः, सर्व्वगुणाकरमिति यावत्, त्वां—भवन्तम्, ऐक्ष्वाकः,—इक्ष्वाकुवंशसम्भूतः, इक्ष्वाकुकुलालङ्कार इत्यर्थः, रामभद्रः,—रामचन्द्रः, पश्येत्—अवलोकयेत्, तदा—तर्हि, अवलोकनसमकालमेवेति यावत्, अस्य—रामभद्रस्य, स्नेहेन—प्रेम्णा, वात्सल्येनेत्यर्थः, हृदयं—मानसम्, अभिष्यन्देत—द्रवीभूतं भवेत्; गुणग्राही भगवान् रघुमणिः सर्व्वगुणविभूषितं त्वां विलोक्य नूनम् अभूतपूर्व्वां प्रीतिमापत्स्यतेति भावः।

(ड) मान्य!—पूज्य सुमन्त्र!, सुजनः,—सज्जनः, साधुरित्यर्थः; विनयित्वादिगुणशतविभूषितत्वादिति भावः; स राजर्षिः,—राजश्रेष्ठः; राजा चासौ ऋषिश्चेति विग्रहेण, निखिलराजगुणविभूषितोऽप्यसौ रघुमणिः रामः दमनियमादिगुणयोगात् ऋषिकल्प एव भवतीति भावः; श्रूयते—आकर्ण्यते।

(ढ) सलज्जमिव—लज्जया सह वर्त्तमानं यथा स्यात्तथेव, ईषल्लज्जितः सन्निव इत्यर्थः, आहेति शेषः।

ननु सुजनश्चेत् तत्रभवान् रामचन्द्रः भवतामभिमतः, तर्हि कथं तत्क्रतुविघाताय यज्ञीयाश्वमपहृत्य इत्यमसौजन्यमनुतिष्ठसि ? इत्याशङ्कामपनेतुमाह, वयमपीति।—वयमपि अस्मद्विधा जना अपि, अहमपि इत्यर्थो वा, [अविशेषणयुष्मदस्मदोः एकत्वेऽपि बहुत्वे प्रयोगदर्शनात्] एवम्प्रायाः प्रायेण बाहुल्येन एवम् [इति विग्रहे "सह सुपा" (२।१।४ पा०) इति समासः] ईदृशा इत्यर्थः, क्रतुप्रविघातिनः क्रतुं यज्ञं, प्रविघ्नन्ति प्रविनाशयन्ति ये तथोक्ताः, यज्ञहन्तारः इत्यर्थः, न खलु नैव; यथा स राजर्षिः सुजनः, तथा वयमपि, न हि मेध्याश्वापहरणादिक्रियाभिः दुर्वृत्तयः क्रतुविध्वंसकारात्तसप्रायाः वयं भवामः इति भावः। तर्हि किमु रामस्यासौजन्यमवलोक्य विद्वेषवशात तस्याश्वं बलाद्ग्रहीतुमिच्छसि ? तदपि नेत्याह, क इहेति।—इह च अस्मिन् जगति पुनः, कः को जनः, गुणैः

चन्द्र। [सस्मितम्]। किन्नु भवतस्तातप्रतापोत्कर्षेऽप्यमर्षः? (ग)

लवः। अस्त्वमर्षः, मा भूद्वा, एतत्तु पृच्छामि, दान्तं हि राघवं राजानं शृणुमः, स किल नाऽऽत्मना दृप्यति, नाप्यस्य

शौर्य्यौदार्य्यसौजन्यादिभिः हेतुभिः; अशेषगुणविभूषितत्वादिति भावः; तं राजानं स्वाजनममुं रामचन्द्रं, न बहु मन्यते वा? नाद्रियते वा? न सत्करोति वेत्यर्थः; अपि तु सर्व्व एव विपुलगुणविशोभितं रामं तद्गुणाक्रष्टहृदयाः सन्तः नियतं प्रशंसन्ति, वयमपि तथैव भवामः, क्रतुविघातकाः रामविद्वेषिणश्च न इति भावः। युष्माकं सदाचारवत्त्वे भवाज्ञः रामस्य च बहुसम्मानास्पदीभूतत्वे कथमीदृशः विरोधः सञ्जातः? इत्याशङ्कामपनयति, तदपीति।—तदपि तथाऽपि, तस्मिन् बहुमान-सत्त्वेऽपीत्यर्थः, खलु नूनं, तुरङ्गमरक्षिणाम् अश्वमेधीयाश्वरक्षकाणां, स व्याहारः तादृशी उक्तिः, "अयमश्वः पताकेयम्" इत्यादि रामानुमोदितं सगर्व्वमभिधानमित्यर्थः। अखिलेति।—अखिलानां सर्व्वेषां, क्षत्राणां राजन्यानाम्, आक्षेपेण तिरस्कारेण, वीरत्वापकर्षरूपावमाननेनेति यावत्, प्रचण्डतया अत्युग्रतया, अतिदुःसहत्वेन हेतुनेति यावत्, मे मम, राघवानुजातां सर्वेषां वीराणां तादृशीमवज्ञां सोढुमपारयतः इत्यर्थः, विकृतिं विकारं, क्रोधमित्यर्थः, अश्वधारणप्रवृत्तिरूपं चेतसोऽन्यथाभावमिति यावत्, अकरोत् उत्पादयामास; निखिलवीराणां निन्दाकरं रक्षिजनानां वचनं निशम्य क्रोधेनैवाहमश्वमिममवरुद्धवान्, न विजयप्रेप्सया, न वा दौर्ज्जन्येनेति मन्तव्य-मित्याशयः। [अत्राप्रस्तुतेन "कः" इति पदोपस्थाप्यसामान्यार्थेन प्रस्तुतस्य विशेषस्य वक्तुः लवस्य प्रतीतेरप्रस्तुतप्रशंसाऽलङ्कारः]। हरिणी वृत्तम् ॥ २९ ॥

(ग) सस्मितम्—ईषद्धास्यसहितम्, आहेति शेषः। भवतः,—तव, तात-प्रतापोत्कर्षेऽपि—तातस्य—पितृस्थानीयस्य रामचन्द्रस्य, प्रतापः,—प्रभावः, कोष-दण्डजं तेज इत्यर्थः, तस्य च उत्कर्षः,—अतिशयः, अतिरेक इति यावत् तस्मिन्नपि, अमर्षः,—असहनम्, असहिष्णुतेति यावत्, किन्नु?—किमु खलु; यद्यपि महावीरस्य भवतः साधारणजनानां वितथा सगर्व्वोक्तिः मर्म्माणि निकृन्तति, तथाऽपि पितृवत्पूज्यस्य तत्रभवतो महारथस्य रघुपतेः राक्षसकुलोच्छेदकस्य ईदृशी तात्त्विकी शौर्य्योक्तिः गुणग्राहिणः गुरुजनानुमतस्य भवादृशस्य चेतः प्रमथ्नातीत्यहो! अतीव हास्यकरं निरतिशयविस्मयजनकञ्चैतदित्याशयः।

(त) अमर्षः,—असहनं, परगुणासहिष्णुतेत्यर्थः, अस्तु—भवतु, मा भूद्वा—न भवतु वा; रामप्रतापोत्कर्षश्रवणविषये कियदपि मे असहनं वर्त्तते न वेति तद्विषयकः

प्रजा ईदृश्यो जायन्ते, तत् किमस्य मनुष्या राक्षसीं वाचं वदन्ति ? (त)—

ऋषयो राक्षसीमाहुर्वाचमुन्मत्तदृप्तयोः।
सा योनिः सर्ववैराणां सा हि लोकस्य निर्ऋतिः॥ ३० ॥

प्रश्नावतरणमिदानीं न युज्यते इति भावः; तु—किन्तु, एतत्—इदं, वक्ष्यमाणं विषयजातमित्यर्थः, पृच्छामि—जिज्ञासे, भवन्तमिति शेषः; किमिति तदेवाह, दान्तमित्यादि।— दान्तं—दमादिसम्पन्नं, जितेन्द्रियमित्यर्थः, अनुद्धतभाषिणमिति यावत्, हि—निश्चितं, राघवं—रामं, राजानं—निखिलप्रजापालकं, शृणुमः,—आकर्णयामः; सर्व्वे हि जनाः सततं रघुमणिं निरहङ्कारं वशिनञ्चामनन्तीति अभीक्ष्णमनुश्रूयते इति भावः; सः,—राघवः, किल—इति वार्त्तायां, ("वार्त्ता-सम्भाव्ययोः किल" इत्यमरः) आत्मना—स्वयं, न दृप्यति—नाहङ्करोति, अस्य—रामस्य, प्रजाः अपि—प्रकृतयोऽपि, ईदृश्यः,—एवंविधाः, गर्व्विता इत्यर्थः, न जायन्ते—न भवन्ति; विनेतुः राज्ञः अतिविनयित्वात् विनेयानां प्रजानां विनीतत्वन्तु सुतरा-मेव सम्पन्नमिति भावः; तत्—तस्मात्, राज्ञः प्रजानाञ्चादृप्तत्वादित्यर्थः; सर्व्वेषा-मेव सौशील्यश्रवणादिति भावः; यद्वा,—तत्—तर्हि, स्वयं राज्ञः प्रजानाञ्च दर्पाभावे सत्यपीत्यर्थः, किं—कथम्, अस्य—राज्ञः रामस्य, मनुष्याः,—अधिकृताः पुरुषाः, सैनिकजनाः इत्यर्थः, राक्षसीं—राक्षससम्बन्धिनीं, दर्पोद्धतामित्यर्थः, वाचं—वाक्यं, वदन्ति ?—भाषन्ते; सुविचक्षणस्यातिविनयिनः नरपतेः अधिकृत-जनानामीदृशं भाषणमतीव लज्जाव्यञ्जकमिति भावः।

का खलु राक्षसी वाक्, किञ्च तस्या अपकारित्वम् इति विवृणोति, ऋषय इति।—ऋषयः मन्वादयः धर्म्मशास्त्रकाराः, उन्मत्तदृप्तयोः उन्मत्तस्य उन्माद-रोगग्रस्तस्य, आसवादिपानेन विभ्रान्तचित्तस्य वेत्यर्थः, दृप्तस्य गर्व्वितस्य च, आत्म-श्लाघानिरतस्येत्यर्थः, वाचं वचनं, राक्षसीं राक्षसजनोचिताम् अतिक्रूरामित्यर्थः, परुषाक्षरभूयिष्ठतया अतिबीभत्सामिति यावत्, आहुः ब्रुवन्ति। तपोधनाः एवं वदन्ति चेत् वदन्तु नाम, तेनास्माकं का क्षतिः ? इत्याक्षेपे तस्या अनिष्टोत्पादकतामाह, सेति।—सा वाक्, सर्वेषां सर्व्वप्रकाराणां, वैराणां विरोधानां, शत्रुभावानामिति यावत्, योनिः कारणम्, उत्पादकहेतुरित्यर्थः, सा हि तादृशी वागेवेत्यर्थः, लोकस्य जनस्य, तादृशमदोद्धतानां वचसां प्रयोक्तुरित्यर्थः, निर्ऋतिः निर्गता ऋतिः कल्याणं यस्याः तादृशी, ("ऋतिः कल्याणवर्त्मनोः" इति मेदिनी) अलक्ष्मीः इत्यर्थः,

इतिह स्म तां निन्दन्ति, अथेतरामभिष्टुवन्ति। (थ)—

कामान् दुग्धे, विप्रकर्षत्यलक्ष्मीं,
कीर्त्तिं सूते, दुष्कृतं या हिनस्ति।
ताञ्चाप्येतां मातरं मङ्गलानां
धेनुं धीराः सूनृतां वाचमाहुः॥ ३१॥

("स्यादलक्ष्मीस्तु निर्ऋतिः" इत्यमरः) अलक्ष्मीर्यथा दुरदृष्टवतः पुरुषस्य विविधानि अशुभानि उत्पादयति, एवमेव क्षुद्राणां जनानां गर्व्विता वाक् अनिशमेवाशुभं प्रसूते इति भावः। [अत्र निर्ऋतौ राक्षस्या वाचः अभेदारोपात् निरङ्गं रूपकमलङ्कारः]॥ ३०॥

(थ) इतिह—पारम्पर्य्योपदेशः, ("पारम्पर्य्योपदेशे स्यादैतिह्यमितिहाव्ययम्।" इत्यमरः) लोकपरम्परयैतदनुश्रूयते इति भावः। किमिति? एतदेवाह, तां निन्दन्ति स्मेति।—तां—पूर्व्वोक्तां राक्षसीं वाचं, निन्दन्ति स्म—तिरस्कुर्व्वन्ति स्म, अथ—अपिच, वाक्यान्तरारम्भार्थकोऽयमथशब्दः, इतराम्—अपरां, सौजन्यविनयादिगुणभूषितां वाचमित्यर्थः, अभिष्टुवन्ति स्म—प्रशंसन्ति स्म, ऋषय इति शेषः; जघन्यां वाचं विहाय सदा साध्वीं वाचं समुदीरयतः जनान् प्राचीनाः महाजनाः आद्रियन्ते स्म इत्यस्माकं पारम्पर्य्योपदेशः इति भावः।

इत्थं राक्षसीं वाचं विनिन्द्येदानीं सूनृतां वाचमभिष्टौति, कामानिति।—या सूनृता वाक्, कामान् मनोऽभिलषितानर्थान्, दुग्धे प्रपूरयति, आनीय ददातीत्यर्थः; यां सूनृतां वाचमुपश्रुत्य हि परितुष्टाः महान्तः श्रोतारः प्रवक्तृभ्यः यथेष्टमभिलषितानि वस्तूनि प्रददतीति भावः; अलक्ष्मीं निर्ऋतिम्, अशुभाधिष्ठात्रीं देवीमित्यर्थः, विप्रकर्षति निरस्यति, दूरीकरोतीत्यर्थः; या च समीरिता सती अमङ्गलं सर्व्वथा निवारयतीति भावः; कीर्त्तिं यशः, सूते जनयति; सन्तो हि तादृशीं वाचं सदैव प्रशंसन्ति, तेन च तद्वाक्यप्रयोक्तुः कीर्त्तिः सर्व्वत्र सुप्रथिता भवतीति भावः; दुष्कृतं पापं, हिनस्ति नाशयति; निरन्तरमभिधीयमाना सा हि अतिपावनी वाक् प्रवक्तॄणां प्राक्तनं पापं समूलमेव उन्मूलयतीति भावः; तां निखिलकल्याणप्रदत्वेन सुप्रसिद्धाम्, अत एव मङ्गलानां शुभानां, मातरं प्रसवित्रीं, सर्व्वमङ्गलनिदानभूतामित्यर्थः, एतां प्रस्तूयमानामित्यर्थः, सूनृतां सत्यां प्रियाञ्चेत्यर्थः, ("सूनृतं प्रिये। सत्ये" इत्यमरः, "सूनृतं मङ्गलेऽपि स्यात् प्रियसत्ये वचस्यपि।" इत्यजयोऽपि) वाचञ्च वाक्यन्तु, धीराः विद्वांसः, पण्डिताः इत्यर्थः, धेनुमपि कामधेनुसदृशीमपि, काम-

सुमन्त्रः। परिपूतस्वभावोऽयं कुमारः प्राचेतसान्तेवासी वदति अभिसम्पन्नमार्षेण संस्कारेण। (द)

लवः। यत् पुनश्चन्द्रकेतो! वदसि, "किन्नु भवतस्तातप्रतापोत्कर्षेऽप्यमर्षः" इति, तत् पृच्छामि, किं व्यवस्थितविषयाः क्षत्त्रधर्मा इति ?। (ध)

दुग्धामित्यर्थः, सर्वाभीष्टपूरयित्रीमिति यावत्, आहुः ब्रुवन्ति ; चकारोऽत्र समुच्चयार्थकः, तथाच, उन्मत्तदुष्टयोः वचनं राक्षसीमाहुः, सूनृतां वाचञ्च धेनुमप्याहुरित्यर्थः ; कामधेनुरिव सूनृता वाणी अभिधातृभ्यः वाञ्छितफलानि प्रयच्छतीति भावः। [अत्र "दुग्धे" इत्यादिक्रियापदानामेकेनैव कर्तृपदेनान्वयात् दीपकमलङ्कारः, तथा धेन्वा सह वाचः अभेदारोपात् निरङ्गं रूपकञ्चेत्यनयोरङ्गाङ्गिभावेन सङ्करः]। शालिनी वृत्तम्॥ ३१॥

(द) परिपूतस्वभावः,—परिपूतः,—अतिपवित्रः, स्वभावः,—प्रकृतिः यस्य तथाभूतः, अतिपवित्रचरित्र इत्यर्थः, प्राचेतसान्तेवासी—प्राचेतसस्य—वाल्मीकेः, अन्तेवासी—शिष्यः, अयं कुमारः,—एषः लवः, आर्षेण—ऋषीणामयमित्यार्षः तादृशेन, ऋषिसम्बन्धिनेत्यर्थः, संस्कारेण—ज्ञानेन, अभिसम्पन्नम्—अभिसम्बद्धम्, अनुगतं यथा तथेत्यर्थः, वदति—भाषते ; ऋषयः खलु यथा अलौकिकज्ञानालोकसमुद्भासितां वाचमुदीरयन्ति, एवमेवासौ कुमारः सुशिक्षिततया सुसंस्कृतं स्वराद्यहीनञ्च यथा तथा अभिदधातीत्यर्थः।

(ध) हे चन्द्रकेतो!—भो कुमार!, पुनः,—किन्तु, यत् वदसि—यद्वाक्यं कथयसि ; किमिति ? तदेवाह, किन्निति।—किन्नु—किमु भोः, प्रश्नार्थकमव्ययम् ; भवतः,—तव, तातप्रतापोत्कर्षे—तातस्य—पितृस्थानीयस्य, पितृवत् पूजनीयस्य रामस्येत्यर्थः, यः प्रतापः,—प्रभावः, कोषदण्डजं तेज इत्यर्थः, तस्य उत्कर्षेऽपि—आधिक्येऽपि, पितृकल्पस्य रामस्य जगत्प्रसिद्धप्रभाववत्त्वेऽपीत्यर्थः, अमर्षः ?—क्रोधः, असहनमित्यर्थः, इति, यत् वदसि इत्यनेनान्वयः ; तत्—तत्रेत्यर्थः, तद्विषये इति यावत्, पृच्छामि—जिज्ञासे, भवन्तमिति शेषः, किं ?—किमु, प्रश्नार्थकमव्ययम् ; व्यवस्थितविषयाः,—व्यवस्थितः,—निर्दिष्टः, नियमितः इत्यर्थः, विषयः,—आश्रयः, वृत्तिरिति यावत्, येषां ते, निर्द्धारिताश्रया इत्यर्थः, केवलं रामचन्द्रनियतवृत्तय इत्याशयः ; क्षत्त्रधर्म्माः—क्षत्त्रस्य—राजन्यस्य, क्षत्त्रियजातेरित्यर्थः, धर्म्माः,—शौर्य्यादिगुणनिचयाः ; क्षत्त्रियजातेः विशिष्टाः गुणाः केवलं व्यक्तिविशेषे महावीरे रामचन्द्रे

सुमन्त्रः । नैव खलु जानासि तं देवमैक्ष्वाकं, यदेवं वदसि ; तद्विरम्यतामतिप्रसङ्गात् । (न)—

सैनिकानां प्रमाथेन सत्यमोजायितं त्वया ।
जामदग्न्यस्य दमने नैवं निर्वक्तुमर्हसि ॥ ३२ ॥

एव पर्य्याप्ताः सन्तः आसते, नान्येषु केषुचिदपि महावीरेषु ? इत्याशयः ; एवं न हि कदाचिदपि सम्भवति यत् गुणानां प्रतिनियतपुरुषवृत्तित्वमिति तात्पर्य्यम् ।

(न) ऐक्ष्वाकम्—इक्ष्वाकुवंशतिलकं, देवं—सम्राजं, तं—रामचन्द्रं, नैव खलु जानासि—निश्चितमेव न वेत्सि, यत्—यस्मात् कारणात्, एवम्—इत्थं, प्रागुक्तरूपमित्यर्थः, वदसि—कथयसि, तत्—तस्मात्, रघुमणेरलौकिकशौर्य्याधारत्वविषये तव निरतिशयानभिज्ञत्वादित्यर्थः, विरम्यतां—निवर्त्त्यताम् ; ("विरम विरम" इति पाठे—विरम—निवर्त्तस्व, सम्भ्रमे द्विर्वचनम्) अतिप्रसङ्गात्—सावज्ञपरिभाषणात्, रघुपतेरवमाननासूचकसमुद्धतवाक्प्रयोगादित्यर्थः ; यदि त्वमपूर्व्वशौर्य्यसौजन्यादिगुणदानविभूषितं रघुमणिं कदाऽपि प्राक् प्रत्यक्षीकुर्य्याः, तर्हि एवं सगर्व्वमभिधातुं नोत्सहेथाः, अतो महाजनत्वादवसूचकं सम्भाषणं सर्व्वथैव परिहर इति भावः ; लोकोत्तरगुणशालिनि तादृशि महावीरे रामचन्द्रे एवं सावलेपवचनं न शोभते, अतः तूर्णमितस्मात् निवर्त्त्यतामिति समुदिताशयः ।

रामलवयोर्विक्रमवैषम्यप्रदर्शनेन लवप्रदर्शितदर्पोद्धतभावस्य अज्ञानविजृम्भितत्वमेव समर्थयमान आह, सैनिकानामिति ।—त्वया भवता, लवेनेत्यर्थः, सैनिकानाम् अस्मत्सेनासमवेतवीराणामित्यर्थः, प्रमाथेन विमर्द्दनेन, विद्रावीकरणेनेत्यर्थः, पराभवेणेति यावत्, सत्यं यथार्थमेवेत्यर्थः, वस्तुत एवेति यावत्, ओजायितम् ओजस्विवदाचरितमित्यर्थः, विक्रमविशेषप्रदर्शनेन स्वस्य वीरत्वं प्रमाणीकृतमिति यावत् ; [ओजायितमिति ओजस्वी इव आचरितमिति विग्रहे ओजःशब्दस्य "ओजःशब्दो वृत्तिविषये तद्वति" इति दीक्षितवचनात् ओजस्विबोधकतया ओजस्विवदाचरितमित्यर्थः लभ्यते, तथाच तदर्थकौजःशब्दात् आचारार्थे "कर्त्तुः क्यङ् सलोपश्च" (३।१।११पा०) इति क्यङि "ओजसोऽप्सरसोर्नित्यमितरेषां विभाषा" (वा०) इति नित्यं सलोपे ओजायनामधातोर्भावे निष्ठाप्रत्ययेन सिद्धम्] अनन्यजनसहायेनैव त्वया असाधारणं साहसं विक्रमश्च प्रदर्श्य वीरविक्रमोद्धता असंख्येया अपि अस्मत्सैनिका सुदूरं विद्राव्य सावहेलं विजिग्यिरे, प्रत्यक्षपरिदृष्टे तस्मिन् नास्त्यस्माकं कोऽपि विसंवाद इति भावः । एवञ्चेत् तर्हि कथं मदुक्तावतिप्रसङ्गः सम्भावितः ?

लवः। [सहासम्]। आर्य्य! जामदग्न्यस्यापि दमनः स राजा इति कोऽयमुच्चैर्वादः! ! ! (प)—

सिद्धं ह्येतद्वाचि वीर्य्यं द्विजानां
बाह्वोर्वीर्य्यं यत्तु तत् क्षत्रियाणाम्।

इत्यताह, जामदग्न्यस्येति।—किन्तु जामदग्न्यस्य जमदग्निपुत्रस्य परशुरामस्येत्यर्थः, [जमदग्नेरपत्यं पुमानिति विग्रहे, जमदग्निशब्दात् "गर्गादिभ्यो यञ्" (४।१।१०५ पा०) इति यञ्] दमने दर्पहारिणि, पराभवितरि रामे इत्यर्थः, [दमयतीति दमनः, दमयतेः "नन्दिग्रहिपचादि—" (३।१।१३४पा०) इति कर्त्तरि ल्युः] इदम् इत्थं, वीरत्वादिक्षत्रधर्म्माः किं राम एव व्यवस्थिताः? इत्येवमौद्धत्याभिव्यञ्जकं वचनमित्यर्थः, निर्वक्तुं निश्चयेन कथयितुमित्यर्थः, नार्हसि न प्रभवसीत्यर्थः; त्वया एकाकिनैव यद्यप्यस्मत्सेनासमवेतवीराणां हेलया विद्रावणेन स्वकीयं वीरत्वगौरवमस्मत्समक्षमेव प्रकटीकृतं, तथाऽपि निःसन्नत्वः क्षत्रियवंशध्वंसकारिणस्त्रिभुवनैकवीरस्य परशुरामस्यापि पराभवितुः रघुपतेः सर्वातिशायिविक्रमेऽपि तव श्ययमनर्थः कदाऽपि न शोभते इति निष्कृष्टार्थः। [अत्र श्रीजायितमिति क्यङ्प्रत्ययेन लवस्य श्रोजस्विपुरुषेण सार्द्धमवैधर्म्यसाम्यप्रतिपादनादुपमाऽलङ्कारः]। पथ्यावक्त्रं वृत्तम् ॥३२॥

(प) सहासं—सुमन्त्रवाक्यस्य असङ्गतत्वबोधादुच्चैर्हाससहितं यथा तथेत्यर्थः, आहेति शेषः; मत्तोऽपि युष्मत्प्रभोः रामचन्द्रस्य विक्रमाधिक्ये प्रदर्शिता या युक्तिः, सैवाद्भिर्वलीयसीति मन्यते, सा मया नैव युक्तिमध्ये परिगण्यते इति हासहेतुर्बोध्यः। सः,—असौ भवतां प्रभुरित्यर्थः, राजा—भूपतीरामचन्द्र इत्यर्थः, जामदग्न्यस्यापि —जमदग्निपुत्रस्य परशुरामस्यापि, का कथा अन्येषामिति अपिकारार्थः; दमनः, —पराभविता, इत्ययम्—एवम्प्रकारः एषः इत्यर्थः, कः उच्चैर्वादः!—किम् असीमवीरत्वमाहात्म्यद्योतकं प्रशंसावचनमित्यर्थः; अपि न किमपीति भावः।

वीरत्वकीर्त्तिमतः परशुरामस्य विजयित्वोत्कीर्त्तनेन यत् रामस्य त्रिभुवनैकवीरत्वं समर्थितं, तदस्माभिर्न युक्तिमध्ये परिगणितमित्युक्तम्, इदानीं तत्र हेतुं प्रदर्शयन्नाह, सिद्धमिति।—एतत् इदं, वक्ष्यमाणरूपं ब्राह्मणक्षत्रिययोर्वीर्य्यस्थाननिरूपणमित्यर्थः, सिद्धं प्रसिद्धं, सर्व्वजनविदितमित्यर्थः, यत् द्विजानां ब्राह्मणानामित्यर्थः, [द्विर्जायते इति व्युत्पत्त्या द्विशब्दोपपदात् जनधातोर्डः, वृत्तिविषये चात्र संज्ञामात्रवाचकस्यापि द्विशब्दस्य वारार्थत्वं बोध्यम्। ननु "जन्मना जायते शूद्रः संस्कारैर्द्विज उच्यते" इति वचनेन द्विजत्वप्रापकस्य उपनयनसंस्कारस्य ब्राह्मणादिवर्णत्रयसाधारणतया

शस्त्रग्राही ब्राह्मणो जामदग्न्य-
स्तस्मिन् दान्ते का स्तुतिस्तस्य राज्ञः ?॥ २३॥

कथं द्विजपदेनाव ब्राह्मणमात्रपरिग्रह इति चेन्न, अनुपदमेव द्विजविशेषाणां क्षत्रियाणां वीर्य्यस्य अन्यथा व्याख्यानेन, अत्र सामान्यशब्दस्य विशेषपरत्वन्यायेन सामान्यवाचिनोऽपि द्विजशब्दस्य द्विजविशेषब्राह्मणवाचकत्वात् न कश्चिद्दोषा-वकाश: इत्यवधेयम्] वीर्य्यं पराक्रमः, परपरिभवसामर्थ्यमिति यावत्, वाचि हि वाक्ये एवेत्यर्थः, प्रतिष्ठितमिति शेषः, [अत्र हिशब्दः अन्ययोगव्यवच्छेदरूप-एवकारार्थे प्रयुक्तः, तेन ब्राह्मणानां वाचि एव वीर्य्यं, न तु क्षत्रियाणामिव बाह्वोरित्यर्थो लभ्यते। ब्राह्मणानां वाक्ये एव वीर्य्यस्थितौ प्रमाणं यथा ताण्ड्यब्राह्मणे,—"तस्माद्ब्राह्मणो मुखेन वीर्य्यं करोति मुखतो हि सृष्टः—" इति] तु किन्तु, बाह्वोः भुजयोः, यत् वीर्य्यं पराक्रमः, सामर्थ्यमित्यर्थः, तत् क्षत्रियाणां ब्रह्मभुजोत्पन्नानां राजन्यानामेवेत्यर्थः। भवतु तावदेवं, तेन प्रकृते कस्तावदुपयोगः? इत्यवाह, शस्त्रग्राहीति।—ब्राह्मणः ब्रह्म-मुखोत्पन्नः द्विज इत्यर्थः, [एतेनास्य निसर्गदौर्बल्यं सूचितम्] जामदग्न्यः जमदग्नि-मुनेस्तनयः परशुरामः, शस्त्रग्राही तपःकर्शनातिदुर्बलेन हस्तेन शस्त्रधारीत्यर्थः; न हि तपस्वी ब्राह्मणः तपोदुर्बलाभ्यां भुजाभ्यां शस्त्रमरक्षादिति कुतस्तस्मात् यस्य कस्यचिदपि क्षत्रियस्य पराजयसम्भावनेति भावः; तस्मिन् परशुरामे इत्यर्थः, दान्ते रामेण विजिते सतीत्यर्थः, तस्य विजेतुरित्यर्थः, राज्ञः नृपतेः, रामस्येति यावत्, का स्तुतिः? कः प्रशंसावादः?, न काऽपीत्यर्थः; ब्राह्मणा हि नियतं तपःक्लेशेन अनशनक्लेशेन च कर्षितकलेवराः स्वत एव दैहिकसामर्थ्यपरिहीनाः केवलं कठोरतपःप्रभावेण वाक्साफल्यमधिगच्छन्तः शापबलेनैव द्वेष्यानभिभवन्तीति ब्रह्ममुखसमुत्पन्नानां ब्राह्मणानां मुखे एव सामर्थ्यं, तद्भुजयुगलसमुत्थानां क्षत्रिया-णान्तु भुजयोः, इति भुजबलोल्लेखावसरे रामस्य ब्राह्मणपरशुराममथनकथोपन्यासेन वीरत्वमाहात्म्यख्यापनं न कथमपि सङ्गच्छते इति भावः; निजभुजबलपराक्रान्तं कञ्चिदन्यं क्षत्रवीरं यदि रामः कदाचित् पराभविष्यत्, तदैवासौ वीरत्वेन प्रशंसा-भाजनमभविष्यदिति हृदयम्। [अत्र क्षत्रियाणामेव बाह्वोर्वीर्य्यमिति कथनेन "ब्राह्मणानां न" इत्यस्य अर्थबललभ्यत्वात्, कथितात् वस्तुनः क्षत्रियात् तादृशान्यस्य ब्राह्मणस्य व्यपोहनात् आर्थी परिसंख्याऽलङ्कारः, सा च परशुरामदमनेनापि रामस्य प्रशंसाया अभावं प्रति ब्राह्मणेति जामदग्न्यविशेषणपदस्य हेतुतयोपन्यासात् काव्य-लिङ्गेन संसृज्यते]। शालिनी वृत्तम्॥ २३॥

चन्द्र। [सोन्माथमिव]। आर्य्य! आर्य्य! कृतमुत्तरोत्तरेण। (फ)—

कोऽप्येष सम्प्रति नवः पुरुषावतारो
वीरो न यस्य भगवान् भृगुनन्दनोऽपि।
पर्य्याप्तसप्तभुवनाभयदक्षिणानि
पुण्यानि तातचरितानि च यो न वेद॥ ३४॥

(फ) सोन्माथमिव—उन्माथेन—अत्यन्तमर्म्मयातनया सह वर्त्तमानं यथा स्यात् तथेत्यर्थः, सक्षोभमिति यावत्, [त्रिलोकपूज्यस्य तातस्य रामस्यापि अवज्ञासूचकवचनस्य स्वकर्णेन श्रवणमेव एवं मर्म्मवेदनाहेतुरिह बोध्यः]। ("उन्माथः कूटयन्त्रे स्यात् मारणे घातके पुमान्" इति मेदिनी)। आर्य्य!—मान्य! [इति सुमन्त्रस्यामन्त्रणपदम्। अत्र सुमन्त्रस्य लवोक्तिप्रत्युत्तरप्रदानप्रतिबन्धकताऽऽचरणार्थं सम्भ्रमे द्विरुक्तिर्बोध्या] उत्तरोत्तरेण—उत्तरस्य—वाक्यस्य, उत्तरेण—प्रत्युत्तरेण इत्यर्थः। कृतम्—अलम्; अयोग्यत्वादीदृशवाक्यस्य उत्तरदानं न विधेयमिति भावः।

रामस्य जामदग्न्यविजयित्वेन सर्व्ववादिसम्मतमपि त्रिभुवनैकवीरत्वमस्वीकुर्व्वतः सुतरामविवेकिनो लवस्योक्तेः प्रत्युत्तरदानस्यापि अनौचित्यमुपपादयितुं सर्व्वथा तस्यार्वाचीनत्वं प्रमापयन्नाह, कोऽपीति।—सम्प्रति इदानीं, कोऽपि अविज्ञातमाहात्म्य इत्यर्थः, अदृष्टाश्रुतपूर्वतया अनिर्वचनीय इति यावत्, नवः नूतनः, अपूर्व्व इत्यर्थः, एषः अयं, लवरूप इत्यर्थः, पुरुषावतारः नररूपेणात्र पृथिव्यामाविर्भूत इत्यर्थः, जात इति शेषः, [पुरुषस्यावतारः, पुरुषरूपेण वा अवतार इति पुरुषावतारः। अवतारः इति अवपूर्वात् तरतेर्भावे "अवे तृस्त्रोर्घञ्" (३।३।१२० पा०) इति घञ्; यद्यप्यस्य सूत्रस्य संज्ञायां तथा करणाधिकरणयोरेव वाच्ययोर्विषयः, तथाऽपि "प्रायानुवृत्तेरसंज्ञायामपि भवति" इति काशिकावचनात् अत्रापि विषयत्वोपपत्तिर्बोध्या]। नन्वस्य अभिनवत्वे किं बीजम्? इत्यत्राह, वीर इति।—भगवान् ऐश्वर्य्यादिषड्गुणसम्पन्नतया अलौकिकसामर्थ्यशालीत्यर्थः, भृगुनन्दनः जमदग्निपुत्रः, अपि त्रिःसप्तकृत्वो जगतीपतीनां निहन्ता परशुरामोऽपीत्यर्थः; का कथा अपरेषामिति भावः; यस्य अपूर्व्वपुरुषावतारस्य सम्बन्धे इत्यर्थः, न वीरः न शूरः, वीरपदवाच्यतया न गणनीय इत्यर्थः, ("वीरः" इत्यत्र "श्लाघ्यः" इत्यपि क्वचित् पाठः) यश्च पर्य्याप्ता सम्पन्ना, सर्व्वतोभावेन पूर्णा इत्यर्थः, सप्तानां भूरादिसप्तसंख्यकानां, [भूरादि-

लवः। को हि रघुपतेश्चरितं महिमानञ्च न जानाति? यदि नाम किञ्चिद्वक्तव्यमस्ति; अथवा शान्तम्। (व)—

सप्तलोका यथा—"भूर्भुवःस्वर्महश्चैव जनश्च तप एव च। सत्यलोकश्च सप्तैते लोकास्तु परिकीर्त्तिताः॥" इति] भुवनानां लोकानाम्, अभयस्य राक्षसादिविघ्नव्यूहविनाशात् अभयदानस्येत्यर्थः, दक्षिणा प्रतिष्ठा येभ्यः तानि, [दक्षिणायाः कर्म्मप्रतिष्ठापकतया अत्र प्रतिष्ठा एव दक्षिणाशब्दार्थो बोध्यः] यद्वा,—पर्य्याप्ते प्रभूते, सप्तानां भुवनानाम् अभये रक्षाकर्म्मणि, दक्षिणानि अनुकूलानीत्यर्थः; अथवा,—पर्य्याप्ता सम्पूर्णा, सप्तभुवनस्य अभयमेव दक्षिणा दानं येषु तानि, [यज्ञादिवैधकर्म्मसाङ्गतार्थं याजकेभ्यो दीयमानस्य धनरत्नादिकस्यैव दक्षिणाशब्दवाच्यतया अत्र दानरूपोऽर्थः लक्षणया बोध्यः। सप्तभुवनमिति सप्तानां भुवनानां समाहार इति विग्रहे समाहारद्विगौ भुवनशब्दस्य पात्राद्यन्तर्गतत्वात् न स्त्रियां ङीप्] पुण्यानि दोषरहितानि, अतिविशुद्धानीत्यर्थः, तातस्य पूज्यस्य, ज्येष्ठतातस्य रामचन्द्रस्येत्यर्थः, चरितानि अनुष्ठानानि, कृतकर्म्माणीति यावत्, न वेद न वेत्ति, नावगच्छतीत्यर्थः; येन हि अनन्यसहायेन निजभुजबलेनैव निःसहायान् भुवनगतानशेषानपि क्षत्त्रवीरानुन्मूल्य, यता जगदिदं निःक्षत्रियनकारि, त्रिलोकविदितालौकिककीर्त्तिः सोऽपि वीरतया यस्य गणनापदवीं नारोढुमर्हति, तथा स्वबलेन वशीकृतदेवासुरनरस्य त्रिलोकतापिनोऽतिशक्तिमतो राक्षसराजस्यापि वंशं समूलमुन्मूलयती जगदेकवीरस्य रघुवंशावतंसस्यापि चरितेषु च यस्य न बहुमानं, सोऽयमलौकिकविक्रमोपेतः अपूर्व्वः कोऽपि पदार्थः कस्माच्चिदज्ञातदेशात् पुरुषरूपेण अत्रावतीर्णः, नो चेत नूनमेवैतयोः कीर्त्तिकलापमयमश्रणोदिति निष्कृष्टार्थः। [अत्र यद्यपि द्वितीयचतुर्थपादयोर्यच्छब्दस्य उत्तरवाक्यगतत्वेन "आत्मा जानाति यत् पापम्" इत्यादिवत् तच्छब्दस्यानपेक्षितत्वान्न विधेयाविमर्षदोषावकाशः, तथाऽपि चतुर्थपादे चकारस्य "यः" इति कर्त्तृपदोत्तरमेव योजनीयतया "हितान्न यः संशृणुते स किं प्रभुः" इत्यादिवत् अस्थानस्थपदतादोषः स्फुट एवास्ति, स च चतुर्थपादं "पुण्यानि तातचरितानि न वेद यश्च" इत्येवं परिवर्त्त्य समाधातुं शक्यः। इह विवक्षणीययोः लवस्य साहङ्कारत्वानभिज्ञत्वयोर्भङ्ग्यन्तरेण कथनात् पर्य्यायोक्तमलङ्कारः, तथा तृतीयपादे तृतीयकल्पोक्तव्याख्याने, निरपह्नवविषये अभये दक्षिणातादात्म्याध्यासात् रूपकञ्चेत्यनयोरलङ्कारयोः परस्परनिरपेक्षतया संसृष्टिः]। वसन्ततिलकं वृत्तम्॥ ३४॥

(व) त्रिलोकविस्तुते तातचरितेऽप्ययमनभिज्ञ इति चन्द्रकेतोः सावज्ञं

वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु किं वर्ण्यते ?
सुन्दस्त्रीदमनेऽप्यखण्डयशसो लोके महान्तो हि ते।

सोल्लुण्ठनवचनमाकर्ण्यातिक्षुब्धः लवः तत्रापि स्वाभिज्ञताप्रदर्शनपूर्व्वकं प्रत्युत्तरमाह, क इति।—को हि क एव वेत्यर्थः। रघुपतेः,—रघुवंशावतंसस्य रामचन्द्रस्येत्यर्थः। चरितम् अनुष्ठितं, कार्य्यमित्यर्थः। महिमानं—माहात्म्यम्। न जानाति ?—न वेत्ति ?, अपि तु सर्व्व एव जानातीत्यर्थः; अलौकिकरामचरितस्य सर्व्वज्ञानविषयत्वात् मयाऽपि तत् सम्यगेव ज्ञातमिति न तच्चरितानभिज्ञतया तथोक्तमिति भावः। ननु जानासि चेत् तदा कथमेवं प्रलपसि ? इत्याशङ्क्याह, यदीति।—यदि—इति पक्षान्तरे अव्ययम्। ("पक्षान्तरे चेद् यदि च" इत्यमरः) नाम—इति कुत्सायाम्। ("नाम कोपेऽभ्युपगमे विस्मये स्मरणेऽपि च। सम्भाव्यकुत्साप्राकाश्यविकल्पेऽपि च दृश्यते॥" इति मेदिनी) किञ्चित्—किमपि। वक्तव्यं—कथनीयं, पर्य्यालोचयितव्यमित्यर्थः; यथाऽस्य चरिते एकतः माहात्म्यख्यापिका दृश्यते भूयसी घटनावली, तथैव कुत्सापक्षेऽप्यस्य कार्य्यपरम्परा नैव दुर्लभेति समुदिततात्पर्य्यम्। कुत्सापक्षीयवक्तव्यं वक्तुमुपक्रममाण एव परनिन्दाया अवाच्यत्वबुद्धा पुनः पक्षान्तरमाह, अथवेति।—शान्तं—विरतम्, अस्तु तदिति शेषः, तत्कीर्त्तनेनालमित्यर्थः। [अत्र वक्तुमिष्टस्य रामनिन्दारूपस्य वस्तुनः अतिगुरुत्वरूपविशेषप्रतिपत्त्यर्थं निषेधस्य आभासनादाक्षेपो नाम अलङ्कारः,—"वस्तुनो वक्तुमिष्टस्य विशेषप्रतिपत्तये। निषेधाभास आक्षेपो वक्ष्यमाणोक्तगो द्विधा॥" इति दर्पणकृदुक्तलक्षणात्]।

नन्वस्ति चेत् अतिविशुद्धे सर्व्ववादिसम्मतेऽपि रामचरिते किञ्चिदालोचनीयं, तदा तदालोचनामेव, किमुपरमेण ? इत्याशङ्क्याह, वृद्धा इति।—वृद्धाः वर्षीयांसः, वयोज्येष्ठा इत्यर्थः, ते प्रसिद्धा रामादय इत्यर्थः, विचारणीयचरिताः विचारणीयं सत् असत् वेति विवेचनीयं, चरितम् आचरणम्, अनुष्ठितं कर्म्मेत्यर्थः, येषां तथोक्ताः, समालोचनीयकर्म्माण इत्यर्थः, न, भवन्तीति शेषः; केवलं वयसा गौरवास्पदानां तेषामनुष्ठितेषु गुणदोषविचारो बालकैरस्माभिर्न विधेय इति भावः; ततः तिष्ठन्तु अविचारितचरिता एव वर्त्तन्तामित्यर्थः। कुत एतत् इत्याह, किमिति।—किं वर्ण्यते ? व्याख्यातव्यं किमस्ति ? इत्यर्थः; वर्ण्यमाने सति दोषबाहुल्यात् तच्चरितस्य दोषोद्घाटनमेव भविष्यतीति ततो विरतिरेव श्रेयसीति भावः। तदेव इङ्गितद्वारेण ज्ञापयति, सुन्देति।—सुन्दस्य जम्भपुत्रस्य, तदाख्यासुरविशेषस्य इत्यर्थः, स्त्रियाः पत्न्याः, ताड़कायाः इत्यर्थः, स्वभावदुर्वृत्तायाः शिशु-

यानि त्रीण्यपराङ्मुखान्यपि पदान्यासन् खराऽऽयोधने
यद्वा कौशलमिन्द्रसूनुनिधने तत्राप्यभिज्ञो जनः ॥ ३५ ॥

स्त्रीहत्याया अपि कस्याश्चित् अवलाया इति यावत्, दमनेऽपि विनाशे अनुष्ठितेऽपि इत्यर्थः, स्त्रीवधनिमित्तके महापातके कृते सत्यपीति यावत्, अखण्डम् अक्षुण्ण, परिपूर्णमित्यर्थः, यशः कीर्त्तिः, माहात्म्यख्यातिरित्यर्थः, येषां ते तथोक्ताः, अक्षुण्णमहिमान इत्यर्थः, ("अखण्डयशसः" इत्यत्र "अकुण्ठयशसः" इति पाठेऽपि स एवार्थः) ते रामाः, [अत्र गौरवे बहुत्वमवगन्तव्यम्] लोके भुवने, ("लोकस्तु भुवने जने" इत्यमरः) महान्तो हि महानुभावा एव, सर्व्वजनपूज्या एवेत्यर्थः, स्वभावदुर्व्वत्ताया: अबलाया: ताड़काया: वधसाधनेन शास्त्रन्यायविरुद्धमतिविगर्हितं कापुरुषोचितं पापं कर्म्म समाचरतोऽपि रघुपतेः त्रिलोकविश्रुतं यशो नांशतोऽपि कलुषितं, परमसौ त्रिलोकीलोकैः माहात्म्यवत्त्वेन सम्पूज्यत एवेति सोत्प्रासोक्तिरियम् । [स्त्रीहत्यायाः पापजनकतामाह याज्ञवल्क्यः,—"शरणागतबालस्त्रीहिंसकान् संवसेन्न तु । चीर्णव्रतानपि सदा कृतघ्नसहितानिमान् ॥" इति । तथा तिथितत्त्वेऽपि—"अवध्याञ्च स्त्रियं प्राहुस्तिर्य्यग्योनिगतेष्वपि ।" इति । वस्तुतस्तु राजधर्म्ममनुतिष्ठतो रामस्य ताड़कावधेऽपि न पातकमिति रामायणे तद्वधप्रकरणे बालकाण्डे पञ्चविंशसर्गे,—"न हि ते स्त्रीवधकृते घृणा कार्य्या नरोत्तम ! । चातुर्व्वर्ण्यहितार्थं हि कर्त्तव्यं राजसूनुना ॥ नृशंसमनृशंसं वा प्रजारक्षणकारणात् । पातकं वा सदोषं वा कर्त्तव्यं रक्षता सदा ॥ राज्यभारनियुक्तानामेष धर्म्मः सनातनः । अधर्म्यां जहि काकुत्स्थ ! धर्म्मो ह्यस्यां न विद्यते ॥" इति । ताड़कावधकथाऽपि तत्रैव षड्विंशसर्गे,—"इत्युक्तः स तु तां यक्षीमश्मवृष्ट्याभिवर्षिणीम् । दर्शयन् शब्दवेधित्वं तां रुरोध स सायकैः ॥ सा रुद्धा बाणजालेन मायाबलसमन्विता । अभिदुद्राव काकुत्स्थं लक्ष्मणञ्च विनेदुषी ॥ तामापतन्तीं वेगेन विक्रान्तामशनीमिव । शरेणोरसि विव्याध पपात च ममार च ॥ तां हतां भीमसङ्काशां दृष्ट्वा सुरपतिस्तदा । साधु साध्विति काकुत्स्थं सुराश्चाप्यभिपूजयन् ॥" इति]। तथा खरस्य खराख्यराक्षसविशेषस्य, आयोधने तेन सह युद्धे, ("नव्यमायोधनं युद्धं प्रधनं प्रविदारणम् ।" इत्यमरः) यानि त्रीणि अपराङ्मुखाणि अपि पश्चाद्देशं अप्रतिनिवृत्तानि अपि इत्यर्थः, असंप्रदर्शितपृष्ठभागान्यपीति यावत्, पदानि पदक्षेपाः, अस्त्रपातभयेन अविमुखान्येव पश्चात् प्रतिनिवृत्तपदविक्षेपा इत्यर्थः ; यद्वा,—पदानि व्यवसायाः, (पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु ." इत्यमरः) चापवर्म्मच्छेदसर्वाङ्गवेधनानन्तरं प्रतिहत-

शक्तिरोपव्याकुलतया दुःखोदया: ते ते सामयिकचेष्टाव्यापारा: इत्यर्थ:, युध्यमान-खरो हि रामस्य धनुश्छेदं कवचपातनं सर्व्वाङ्गवेधनपूर्व्वकरुधिरपातनं कृतवान् इति त्रीणि पदानि लच्यीकृत्य एवमुक्ति: इति। आसन् अभवन्, ("अपराङ्मुखानि" इत्यत्र "अकुतोभयानि" इति पाठे,—नास्ति कुत: कस्मादपि, भयं भीति-प्रकाशो येषु तानि, कथमप्यप्रकाशितभीतिसूचकभावानीत्यर्थ:; न हि पलायितस्य कुतश्चिदपि भयसम्भावनाऽस्तीति भाव:। खराहवे रामस्य पृष्ठत: पादत्रयापसर्पणकथा यथा रामायणे त्रिंशसर्गे,—"विकल: स कृतो बाणै: खरो रामेण संयुगे। मत्तो रुधिरगन्धेन तमेवाभ्यद्रवत् द्रुतम्॥ तमापतन्तं संक्रुद्धं कृतास्त्रो रुधिराप्लुतम्। अपासर्पत् त्रिचिपदं किञ्चित्त्वरितविक्रम:॥.........रामेण धनुरानम्य खरस्योरसि चापतत्॥ स पपात खरो भूमौ दह्यमान: शराग्निना। रुद्रेणेव विनिर्दग्ध: श्वेतारण्ये यथाऽन्धक:॥" इत्यादि। प्रतिद्वन्द्विनि अतिप्रत्यासन्ने अन्तरवकाशाभावात् धनुषि शरसंयोगोऽप्यसुकर इति वेगेन स्वाभिमुखमापतन्तं खरमालोक्य राम: पुरत: किञ्चिदवकाशसम्पत्तये त्रीणि पदानि अपससार, लवेन तु तदेव अपसरणं भीत्या आत्मरचार्थं मन्यमानेन एवं कटाच: कृतो बोध्य:। युद्धे चत्त्रियकृतपृष्ठ-प्रदर्शनस्य अधर्म्महेतुत्वमाह मनु:,—"समोत्तमाधमै: राजा त्वाहूत: पालयन् प्रजा:। न निवर्त्तेत सङ्ग्रामात् चात्त्रं धर्म्ममनुस्मरन्॥" इति)। अपराङ्मुखानीति सोपहासोक्तिर्बोध्या। वा अथवा, इन्द्रसूनोरिन्द्रपुत्रस्य बालिन: इत्यर्थ:, निधने वधे, यत् कौशलं युद्धकार्य्यदचता, आसीदिति शेष:; सुग्रीवेण सह युध्यमानं बालिनं प्रति प्रच्छन्नभावेन बाणचेपात् युद्धनीतिविरुद्धम् अतिजघन्यं यत् अशक्तिप्रकटनमिति निष्कृष्टार्थ:; तत्रापि तस्मिन्नपि, अपिशब्दात् तेषु सर्वेष्वित्यर्थ:, जन: त्रिभुवनगत: सर्व्वो लोक:, अभिज्ञ: ज्ञानवान्, सर्वे एव तत् सर्वं जानन्तीत्यर्थ:; जगद्वासिनो जना: रघुपतेश्चरितमाहात्म्यं न केवलं दशाननहननाद्यलौकिककर्म्मविचित्रं जानन्ति, अपि तु नारीवधरूपेण बीभत्स-कर्म्मणा, प्रतिभटकृताक्रमणात् रणे पृष्ठप्रदर्शनेन, तथा कपटयुद्धेन बालिवधाच्च कलुषीकृतमपि जानन्तीति भाव:। [बालिन: कपटवधवृत्तान्तो यथा रामायणे किष्किन्ध्याकाण्डे त्रयोदशादिसर्गे,—"ततस्तु रामानुजराम-वानरा: प्रगृह्य शस्त्राण्युदितोग्रतेजस:। पुरीं सुरेशात्मजवीर्य्यपालितां वधाय शत्रो: पुनरागतास्त्विह॥......सर्वे ते त्वरितं गत्वा किष्किन्ध्यां बालिन: पुरीम्। वृक्षैरात्मानमावृत्य व्यतिष्ठन् गहने वने॥......चोयमानमथापश्यत् सुग्रीवं वानरेश्वरम्। प्रेचमाणं दिशश्चैव राघव: स मुहुर्मुहु:॥ ततो रामो महातेजा

चन्द्रकेतुः। आः तातपवादभिन्नमर्य्याद ! अति हि नाम प्रगल्भसे। (भ)

आर्त्तं दृष्ट्वा हरीश्वरम्। स शरं मोचते वीरो वालिनो वधकाङ्क्षया॥ ततो धनुषि सन्धाय शरमाशीविषोपमम्। पूरयामास तच्चापं कालचक्रमिवान्तकः॥…… मुक्तस्तु वज्रनिर्घोषः प्रदीप्ताशनिसन्निभः। राघवेण महाबाणो वालिवक्षसि पातितः॥…… ततः शरेणाभिहतो रामेण रणकर्कशः। पपात सहसा वाली निकृत्त इव पादपः॥" इत्यादि]। (क्वचित् पुस्तके च प्रथमचरणस्य "किं वर्ण्यते" इत्यत्र "हुं वर्त्तते" इति पाठो दृश्यते, तत्र हुमिति स्मरणार्थकमव्ययम्; सत्यं तेषाम् महामाहात्म्यसूचकचरितं वर्त्तते इत्येवार्थं स्मारणेन दर्शयति—सुन्दस्त्यादि। [अत्र लवेन गर्व्वातिरेकजनितसम्भ्रमात् पूजनीयस्यापि रामस्य दोषस्मालोचनेन प्रदर्शितः पूज्यपूजाव्यतिक्रमरूपो द्रवो नाम विमर्षसन्धेरङ्गं वेदितव्यम्; तथाच द्रवलक्षणमुक्तं दर्पणकृता,—"द्रवो गुरुव्यतिक्रान्तिः शोकावेगादिसम्भवा" इति। तथा वक्तुमिष्टस्य रामचरितमाहात्म्यापकर्षस्य गुरुत्वरूपविशेषप्रतिपत्त्यर्थं "किं वर्ण्यते" इत्यनेन निषेधस्य आपाततः प्रतीयमानत्वात् प्रथमभेदान्तर्गतः आक्षेपो नाम अलङ्कारः, स च रामादीनामविचारणीयचरितत्वे "वृद्धाः" इति विशेषणपदस्य हेतुविधया उपन्यासात् काव्यलिङ्गालङ्कारेणान्योन्यनिरपेक्षतया संसृज्यते इति बोध्यम्] शार्दूलविक्रीडितं वृत्तम्॥ ३५॥

(भ) आः—इति कोपसूचकमव्ययम्। ("आस्तु स्यात् कोपपीड़योः" इत्यमरः) सर्व्वातिशायिशौर्य्यशालिनः ज्येष्ठतातस्य अतुलनीयमाहात्म्येऽपि दोषार्पणमेवास्य कोपहेतुर्बोध्यः। तातापवादभिन्नमर्य्याद !—तातस्य—ज्येष्ठतातस्य, रामस्येत्यर्थः, अपवादेन—निन्दया, तिरस्कारेणेत्यर्थः, भिन्ना—भग्ना, खण्डितेति यावत्, मर्य्यादा—सदाचारः, सदाचारपद्धतिरित्यर्थः, येन सः, तत्सम्बोधनम्; ["तातापवादभिन्नमर्य्याद!" इत्यत्र "तातापवादिन्! भिन्नमर्य्याद!" इति पृथगामन्त्रणपदद्वयात्मके पाठान्तरेऽप्ययं-स्तुल्य एवेति बोध्यम्] त्रिलोकीलोकसम्मानितस्य रघुपतेः कथायां बालकेन विनीतेनैव वर्त्तितव्यमिति सगर्व्ववचनेन तदुल्लङ्घनात् त्वया न्याय्यपथातिक्रमः कृत इति भावः। अति हि—निरतिशयमेव, अत्र हिशब्दोऽवधारणार्थकः। ("हि हेतावधारणे" इत्यमरवचनात्) प्रगल्भसे—धार्ष्ट्यं प्रकाशयसि, रामस्य अयथार्थनिन्दावादेन स्वस्मिन् गर्वं प्रदर्शयसीत्यर्थः। अत्र नाम—इत्यपि क्रोधव्यञ्जकमेव बोध्यम्। ("नाम कोपेऽभ्युपगमे विस्मये स्मरणेऽपि च।" इति मेदिनी)।

लवः। अये! मय्येव भ्रुकुटीधरः संवृत्तः। (म)

सुमन्त्रः। स्फुरितमनयोः क्रोधेन। (य) तथाहि।—

चूडामण्डलबन्धनं तरलयत्याकूतजो वेपथुः
किञ्चित्कोकनदच्छदस्य सदृशे नेत्रे स्वयं रज्यतः।

(म) अये—इति क्रोधव्यञ्जकम्, अनादृतामन्त्रणार्थकं वा अव्ययम्। ("अये क्रोधे विषादे च सम्भ्रमे स्मरणेऽपि च।" इति मेदिनी। "अये" इत्यत्र "आः!! कथम्" इत्यपि पाठान्तरं दृश्यते) मयि एव—अनतिचिरमेव एतत्सचनसंख्यसैनिकविद्रावणेन प्रदर्शितपराक्रमे एवेत्यर्थः। भ्रुकुटीधरः,—समुत्पादितभ्रूभङ्गः, चन्द्रकेतुकृताधिक्षेपजकोपेन सभ्रूभङ्गीपितवदन इत्यर्थः। [भ्रुवोः कुटी इति भ्रुकुटी, "अभ्रुकुंसादीनाम्" (वा०) इति ह्रस्वस्य वैकल्पिकविधानात् भ्रूकुटीति पदान्तरम्। "अकारोऽनेन विधीयते इति व्याख्यान्तरम्" इति दीक्षितवचनात् भ्रकुटीत्यपि स्यात्। धरतीति धरः, धृधातोः कर्त्तरि "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" (३।१।१३४ पा०) इति पचादित्वादच्, ततश्च भ्रुकुट्या धरः इति षष्ठीसमासः; द्वितीयान्तोपपदसमासे "कर्मण्यण्" (३।२।१ पा०) इत्यस्य बाधाभावात् "प्रायोऽण्विषये च" (वा०) इति अच्प्रत्ययान्तेनोपपदसमास इति पद्मनाभः]। संवृत्तः,—सञ्जातः; वीर्यादिना रामस्य मदपेक्षया अल्पत्वसूचनात् मयि कोपप्रकटनमनुचितमिति भावः।

(य) अनयोः,—एतयोः, चन्द्रकेतोर्लवस्य चेत्यर्थः। क्रोधेन—कोपेन, परस्परस्पर्द्धासम्भूतेन रोषेणेति यावत्। [स्फुरितमिति क्रियापदस्य कर्तृपदमिदम्]। स्फुरितम्—आविर्भूतम्; कुमारयोः क्रोधः सञ्जात इति समुदितार्थः। [स्फुरितमिति स्फुरतेर्भावे निष्ठा]।

अन्योन्यस्पर्द्धया समुपजातरोषयोः कुमारयोः तदानीन्तनावस्थावर्णनमुखेन कोपोत्पत्तिमुपपादयन्नाह, चूडेति।—आकूतं प्रतिद्वन्द्विपराभवविषयकोऽभिप्रायः, ("आकूतं स्यादभिप्रायः" इति हलायुधः) तस्मात् जायते यः तथोक्तः, परस्परदमनेच्छाजनितक्रोधसमुत्थ इत्यर्थः, [आकूतोपपदात् जनेः कर्त्तरि डः] वेपथुः कम्पः, [वेपधातोर्भावे अथुच्] चूडामण्डलस्य शिखासमूहस्य, [रघुवंशीयानां क्षत्रियाणां पञ्चचूडतया चूडायां मण्डलोक्तिः सङ्गच्छते] बन्धनं संयमनं, संयतकेशपाशसमूहमित्यर्थः, तरलयति विधूनयति, किञ्चित् शिथिलयतीति वा, प्रबलकोपोद्रेकेण शिरःकम्पात् संयतोऽपि कुन्तलभारः समन्ततो विस्रंसते इत्यर्थः, [तरलं करोतीति

धत्ते कान्तिमकाण्डताण्डवितयोर्भङ्गेन वक्त्रं भ्रुवो-
श्चन्द्रस्योत्कटलाञ्छनस्य कमलस्योद्भ्रान्तभृङ्गस्य च॥ २६ ॥

तरलयति, तरलशब्दात् तत्करोतीत्यर्थे "तत्करोति तदाचष्टे" (ग०) इति णिच्, ततः तरलीति नामधातोः कर्त्तरि लट्। क्वचित् प्रथमः पादः "क्रोधेनोद्धतधूत-कुन्तलभरः सर्व्वाङ्गजो वेपथुः" इत्येवं पठितो दृश्यते, तत्र सुगम एवार्थः] स्वयम् आत्मना, स्वभावत एवेत्यर्थः, [अत्र स्वयमिति तृतीयान्तमव्ययं, "प्रकृत्यादिभ्यश्चोप-संख्यानम्" (वा०) इति तृतीया] कोकनदच्छदस्य रक्तकमलदलस्य, [अत्र सदृश-शब्दयोगात् "तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्यां (२।३।७२ पा०) इति वैकल्पिकी षष्ठी। "—अथ रक्तसरोरुहे रक्तोत्पलं कोकनदम्" इत्यमरः। कोकान् चक्रवाकान्, नदति अन्तर्भूतण्यर्थतया नादयतीत्यर्थः, यः तथोक्तः, इति कोकोप-पदात् नदतेः कर्त्तरि अच्] किञ्चित ईषत, सदृशे समाने, प्रकृत्यैव ईषल्लोहिताय-ताने इत्यर्थः, नेत्रे नयने, रज्यतः लोहितीभवतः, इदानीं क्रोधोद्रेकात् सम्पूर्णरूपेण रक्तवर्णतामाप्नुतः इत्यर्थः; यद्वा,—कोकनदच्छदस्य किञ्चित् सदृशे नेत्रे स्वयं रज्यत इत्यन्वयः, [रज्यत इति "रञ्ज रागे" इति दैवादिकरञ्जधातोर्लटि रूपम्, "अनिदितां हल उपधायाः क्ङिति" (६।४।२४ पा०) इति नलोपः] तथा वक्त्रम् अनयोर्मुखमण्डलं, कर्तृ। [अत्र कुमारयोर्द्वित्वेऽपि "नेत्रे" इत्यत्र "मुखम्" इत्यत्र च यथाक्रमं द्विवचनैकवचनयोः साधुत्वं जात्यपेक्षया बोध्यम्; तथाच चक्षुःश्रवणादीनां जातेर्द्वित्वावच्छिन्नतया "नेत्रे" इत्यत्र द्विवचनेनैव अनयोर्नेत्रचतुष्टयस्य बोधः, तथा "वक्त्रम्" इत्यत्र एकवचनेनैव उभयोर्वदनद्वयस्य बोधो बोध्यः। उच्यते अनेनेति व्युत्पत्त्या वचधातोः करणे त्रप्रत्ययेन वक्त्रमिति सिद्धम्] अकाण्डे अनवसरे, अकस्मा-दित्यर्थः, ताण्डवितयोः नृत्यन्त्योः, पुनः पुनरूर्द्ध्वाधःप्रचलितयोरिति यावत्, [ताण्ड-वितयोरिति, तण्डुना तन्नाममुनिविशेषेण प्रोक्तमनुष्ठानमिति व्युत्पत्त्या तण्डुशब्दा-दुक्तार्थे अण्प्रत्ययेन सिद्धात् ताण्डवशब्दात् तत् सञ्जातमनयोरित्यर्थे "तदस्य सञ्जातं तारकादिभ्य इतच्" (५।२।३६ पा०) इति इतच्। "पुंनृत्यं ताण्डवं प्रोक्तं स्त्रीनृत्यं लास्यमुच्यते" इति वचनात् भ्रुवोः कम्पने ताण्डवशब्दप्रयोगः तत्र निरतिशयोत्कर्ष-सूचको बोध्यः] भ्रुवोः भ्रूयुगलस्य, भङ्गेन कौटिल्येन, भीषणभ्रूभङ्गविक्षेपेणेत्यर्थः, उत्कटलाञ्छनस्य सुपरिस्फुटकलङ्कस्य, [उत्कटं लाञ्छनं यस्येति बहुव्रीहिः] चन्द्रस्य-हिमांशोः, च तथा, उद्भ्रान्ता उपरि भ्रमन्तः, भृङ्गाः भ्रमरा यस्य तथोक्तस्य, समन्तादुपरि सञ्चरदलिकुलस्येत्यर्थः, कमलस्य सरसिजस्य, कान्तिं शोभां, साम्यमिति

कुमारौ। तदितो विमर्दक्षमां भूमिमवतराव:। (र)

[इति निष्क्रान्ताः सर्वे]।

इति कुमारविक्रमो नाम पञ्चमोऽङ्कः। (ल)

यावत्, धत्ते धारयति, परिपूर्णचन्द्र-स्फुरितारविन्दयोरनुरूपमेतदनयोराननद्वयं समभिव्यक्तक्रोधलक्षणतया भीषणभ्रूभङ्गेन सुधांशुसङ्गतकलङ्कस्य प्रफुल्लकमलोत्पतदलिपटलस्य च श्रियमनुकरोतीति पर्य्यवसितार्थः ; एभिः शिरःकम्प-नेत्रलौहित्य-भीषणभ्रूभङ्गादिभिर्लिङ्गैरेतयोरन्योन्यक्रोधाविर्भावानुमानात् मन्ये अनतिविलम्बेनैवानयोः समरसमारम्भः सम्भवतीति भावः। [अत्र वदने तादृशचन्द्रकमलयोः शोभासम्बन्धस्य असम्भवत्वेऽपि तत्सम्बन्धकथनेन तच्छोभासदृशशोभां धत्ते इति विम्बप्रतिविम्बभावेन उपमायां पर्य्यवसानात् निदर्शनानाम अलङ्कारः, तदुत्थितवैचित्र्यवशेन शिरःकम्प-नेत्रलौहित्यादिभिर्लिङ्गैः कोपस्यानुमानात् अनुमानालङ्कारः व्यज्यते इति अलङ्कारेणालङ्कारध्वनिः]। शार्दूलविक्रीडितं वृत्तम् ॥ ३६ ॥

(र) तत्—तस्मात्, ईदृशौद्धत्यस्य नितान्तमसहनीयत्वादित्यर्थः। इतः,—अस्मात् स्थानात्। विमर्द्दक्षमां—विमर्द्दस्य—युद्धव्यापारस्य, क्षमां—योग्यां, युद्धव्यापारोपयोगिनीमित्यर्थः। भूमिं—भुवम्। अवतराव:,—गच्छाव:।

(ल) इति—समाप्तावव्ययम्। ("इति हेतुप्रकरणप्रकाशादिसमाप्तिषु" इत्यमरः) कुमारविक्रमो नाम—कुमारविक्रम इति नाम्ना प्रसिद्धः। [कुमारयोर्विक्रमो यत्रेति बहुव्रीहिः]। पञ्चमः,—पञ्चसंख्यापूरणीभूतः। अङ्कः,—नाटकीयपरिच्छेदः।

पञ्चमाङ्कस्य सङ्क्षेपः।

अथ नेपथ्ये, विपन्नानामस्माकं साहाय्यकार्थं द्रुतं कुमारचन्द्रकेतुः सुमन्त्रेण सारथिना नुद्यमानैः प्रजविभिर्वाजिभिर्वाहितेन रथेन प्रधनस्थलं समुपैतीति समुद्घोष्याश्वरक्षापुरुषाः स्वावलम्बनलाभात् सहर्षं विनेदुः।

कुमारचन्द्रकेतुस्तु समरभूमौ वीरबालकस्यालौकिकं रणकौशलं विलोक्य परं मुमुदे, रघुकुलाङ्कुरेणैवामुना सुनिशितेन निक्षिप्तानि कुञ्जरकुलकपोलस्थलेषु सुदृढेषु परिपत्य ज्वालामालाकुलानि शरसहस्राणि विलोक्य परं कौतुकमवाप च।

सुमन्त्रस्त्वलौकिकशौर्य्यशालिनमिमं बालं, कौशिकसखे निशाचरनिकरहननोद्यतं साक्षाद्रघुमणिमिवाहं मन्ये इत्याह।

चन्द्रकेतुस्तु तदा वीरशिशुमेकं पराभवितुं भूयसां शस्त्रजालकरालकराणां रथिनां वारिदसन्निभद्विरदारोहिणाञ्च भववलानां युगपत्प्रयासं समवलोक्य नितरामत्रपत। सुमन्त्रोऽपि, समवेता अपि एते सैनिकाः किमप्यस्य कर्त्तुं न शक्ताः, किं पुनर्विभज्य स्थिताः? इत्यमन्यत।

चन्द्रकेतुराह, आर्य्य! लक्ष्यतां लक्ष्यताम्, अयं वीरः ज्यानिर्घोषेण पलाय्य गिरिकुञ्जमध्यलीनानां कुञ्जराणामपि कर्णव्यथां जनयन् तुमुलं युध्यते, रणे निहतानां महोग्रसेनानां कालकवलात् मुक्तैर्दान्तैरिव मुण्डैः कबन्धैश्च रणभूमिं समाच्छादयति च।

तदाकर्ण्य सुमन्त्रः कथमहममुना वीरेण सह चन्द्रकेतुं योद्धुमुपदिशामि इत्येवं चणं स्वगतमनुदध्यौ, सपदि स्थिरीचकार च इक्ष्वाकुकुलाचारः खलु ईदृशः सङ्ग्रामः, तदधुना अमुना वीरेण सह सङ्ग्रामं विना नान्यं कमपि पन्थानं पश्यामीति।

तदा चन्द्रकेतुः रणात् प्रतिनिवृत्तानि स्वसैन्यानि शतशः धिक्कृतवान्, स्वयञ्च नितरां सलज्जो, विस्मयविवशश्च बभूव। सुमन्त्रस्तु त्वरितमेव रथं चालयन् एष हि वीरो लवः ते पुरत एवाभिवर्त्तते इति चन्द्रकेतुमभ्यधात्।

विस्मृतः सन्निव चन्द्रकेतुः पप्रच्छ सुमन्त्रम्, आख्यायकाः किं नामधेयमस्याभिहितवन्तः? इति। सुमन्त्रः लव इत्याह। ततः चन्द्रकेतुः कुमारं समुद्याह, भो लव! सैनिकैरेभिः सह युद्धं किम्? मया सह युध्यस्व, तेजः तेजस्येव शाम्यतिति। सुमन्त्रस्तु तदा कुमारमाह, एष बालवीरः त्वया समाहूतः सन् भवत्सैनिकनिर्मथनं परित्यज्य घनगर्ज्जनमुपश्रुत्य इभावलिमर्द्दनविरतः दृप्तसिंहशिशुरिव इत एवाभिवर्त्तते इति। अत्रान्तरे त्वरितोद्धतपदविक्षेपेण लवः प्रविश्य कुमारमाह, भो राजपुत्र! सत्यं त्वमिक्ष्वाकुकुलालङ्कारभूतोऽसि, अयमहमागच्छामीति।

ततः नेपथ्ये महान् कोलाहलः प्रादुरासीत्। कथमिदानीं पराङ्मुखीभूता अपि चमूपतयः पुनः प्रतिनिवृत्य मां प्रहर्त्तुमभ्युद्यताः!! धिगेतान् नीचान्। भवन्तु, महाप्रलये पवनोद्वेलितः समुद्रप्रवाहः यथा सागरगर्भस्थपर्वताघातसंक्षुब्धाभिः वाडवाग्निशिखाभिः सपदि विशोष्यते, तथैव कोपाग्निना चणाद्देनान् विमर्द्दयिष्यामीत्युक्त्वा लवः परितः सगर्वं परिक्रमितुमारेभे। ततः कुमारचन्द्रकेतुरपि सगर्वं मधुरञ्च लवमाह, भोः कुमार! तवालौकिकं गुणातिशयं विलोक्याहमतीव प्रीतः भवामि, अतस्त्वं मे सखा, सखित्वात् यत् मदीयं, तत् त्वदीयमेव, दस्युः परिजने

कदनं विफलमेव, अहमेव ते वीरदर्पस्य परीक्षास्थलमिति। लवस्तु सहर्षसम्भ्रमं प्रत्याहृत्य स्वगतमाह, अहो! दिवाकरकुलकुमारस्य सुमधुराऽपि वीर्य्यगाम्भीर्य्यपूर्णा वाक्प्रयोगचातुरी, तदेतान् परित्यज्येममेव वीरं सम्भावयामीति।

पुनरपि कलरवः समजनि। लवस्तु, पापैरेभिः मदीयविघ्नकारिभिः सैनिकैः भृशं कदर्थित एवास्मीति सक्रोधनिर्वेदमुक्त्वा तदभिमुखमेव पर्य्यक्रामत्। चन्द्रकेतुस्तु तदा सुमन्त्रमाह, आर्य्य! द्रष्टव्यमेतदवलोकय, दर्पात् कौतुकाच्चैव वीरः कार्मुकमुत्तूल्य परितः परिक्रामन् मदीयसैन्यैरनुधावितः सन्, प्रतिकूलवायुना पर्य्याकुलः इन्द्रधनुःसुशोभितः नवनीरद इव कीदृशीं रम्यां शोभां बिभर्त्तीति। तदाकर्ण्य सुमन्त्रः कुमार एवैनं वीरं द्रष्टुं जानाति, वयन्तु केवलं विस्मयविवशाः संवृत्ता इत्याह।

अथ चन्द्रकेतुः सामन्तान् सम्बुध्याह, भो भो राजानः! वर्म्मभृतोऽसंख्येयाः वर्षीयांसः यूयं तुरगेषु द्विरदेषु रथेषु च समारूढाः सन्तः पादचारिणैकेन चर्म्मोत्तरीयभृता बालकेन सह सङ्ग्रामे बहुपरिकराः संवृत्ताः!! धिग् युष्मानस्मांश्चेति। ततः चन्द्रकेतोरेवंविधं वचनमाकर्ण्य लवः सक्षोभमाह, किं नामैषोऽनुकम्पते मामिति। ततः क्षणं विचिन्त्य स्वगतमाह, भवतु तावत्, वृथा कालक्षयं वारयितुं जृम्भकास्त्रप्रयोगेण सैन्यान्येतानि संस्तम्भयामीति। अथासौ जृम्भकास्त्राणि निध्यातुमारभत, अकस्माच्च सैन्यसङ्क्षोभः प्रशान्तोऽभूत्। समये चैतस्मिन् सुमन्त्रः ससम्भ्रमं कुमारमाह, वत्स! वीरपोतेनामुना जृम्भकास्त्रमभिप्रयुक्तमिति। चन्द्रकेतुस्तु, सत्यमेवैतत्, यतः ममापि चक्षुः वैद्युताग्निसम्मिश्रिते घोरेऽन्धतमसे निपतितमिव शक्तिविहीनं सत् क्षणं विकाशतामेति, सैन्यसमूहश्च चित्रलिखितारम्भ इव निस्पन्दमास्ते; नूनमनितवीर्य्यं जृम्भकास्त्रं जृम्भते एव; आश्चर्य्यमिदं, पातालगर्भस्थितेषु निकुञ्जेषु पुञ्जीभूतैः तमोभिरिव श्यामायमानैरपि पावकोत्तापविगलितपित्तलद्रववद्भास्वरज्योतिर्भिः जृम्भकास्त्रैः कल्पान्तकाले उद्दामोनपञ्चाशत्पवनविक्षिप्तैः पुञ्जीभूतजलदजालैः विद्युत्पुञ्जप्रोद्दीपितकन्दरैः विन्ध्यगिरिशिखरैरिव परिदृश्यमानैः समन्तात् वितानतलं समाच्छाद्यते इत्याह। कुतः खलु जृम्भकास्त्रमधिगतवान् लवः? इति सुमन्त्रे पृष्टे प्रत्याह चन्द्रकेतुः, भगवतः प्राचेतसादेवेति मन्यामहे इति। न ह्ययं महर्षिः शिष्येभ्योऽस्त्रविद्यामुपदिशति, विशेषतस्तु जृम्भकास्त्राणि, यतश्चैतानि कृशाश्वात् प्रादुर्भूय कौशिकं हि महर्षिमुपसङ्क्रम्य तत्सम्प्रदायपरम्परया रामभद्रमेव समधिगतानि इत्याह सुमन्त्रः। अपरेऽपि महर्षयः प्राचेतससदृशाः तपस्तेजसा जृम्भकास्त्राणि लब्धुं शक्नुवन्तीति विभावयामीत्याह चन्द्रकेतुः। अथ सुमन्त्रः आह, वत्स! सावधानो भव, वीरश्चैष समागच्छतीति। अथालोकनमात्रमेव

उ—२७

कुमारावन्योऽन्यं प्रति स्नेहप्रदर्शनं कर्त्तुमारेभाते ; कथं हि अनुं दृष्ट्वा हृदयं मे सपदि विगलितं भवति, कश्चिदविज्ञातः सम्बन्धः किमु एतस्मिन्नस्ति इत्यादिकं बहुधा समालोचयामासतुश्च। तदाकर्ण्य सुमन्त्र आह, जीवानामेष हि धर्मः, यत् कस्यचित् कुत्रचित् या प्रीतिरन्योऽन्यमनुरागभरात् सहसैव सञ्जायते, परस्पर-नयनपातसमकालमेव तस्याः सम्पद्यमानत्वात् तारामैत्रकं चक्षूरागो वा इति संज्ञया तामुपचरन्ति लोकाः, ईदृशं हि प्रेमाणमहेतुकमेवामनन्ति च। यो हि अहेतुकः आसक्तिविशेषः, तस्य कोऽपि निवर्त्तको न दृश्यते, यदसावुभयोरेवान्तर्मर्म्माणि स्यूत्वा किल तिष्ठतीति। अथ कुमारावपि परस्परमनुदध्यतुः, कथं हि सुचिक्कणराजपट्ट-सन्निभे एतस्मिन् शरीरे शरान् विमोचयामीति ; क्षणं निध्याय च, वीराचारवशात् निदारुणस्य मे स्नेहप्रवृत्तिः कुतः ? शस्त्रशिक्षायाः वा किं फलं लभे ? यद्यनेन सह न युध्ये, रणपराङ्मुखं मामसौ भयादेव विनिवृत्तं वा मंस्यते इति बहुधा विकल्पयामासतुश्च।

सुमन्त्रस्तु तदा लवमवलोक्य सास्रं स्वगतमेवेत्थं बहुधा विललाप, हृदय! कथं विविधं पर्य्यालोचयसि ? नासौ रघुमणितनयः, तस्य तु मूलं कारणं वैदेही दुर्द्दैववशादेवास्माकं विनष्टा। छिन्नायां हि लतायां किम् प्रसूनोत्पत्तिः सम्भवतीति। ततश्चन्द्रकेतुः सुमन्त्रमपृच्छत्, आर्य्य ! रथादधुनाऽवतरामीति। कस्य हेतोरिति तु सुमन्त्रः तमाह। तदुत्तरे चन्द्रकेतुराह, वीरोऽयं पदातिः भूत्वैव युध्यते, पादचारिणा पदातिः सन्नेव युध्येतेति धर्म्मशास्त्रविदः आमनन्ति, तेनैवाहमवतरितुमिच्छामीति। सुमन्त्रस्तु तदाकर्ण्य, कथमहमेवं न्याय्यं कर्म्म कर्त्तुं प्रतिषेधामि, कथं वाऽमुना वीरेण सह पादचारिणं कुमारं योद्धुमुपदिशामीति भृशं व्यचिन्तयत्। आर्य्य ! धर्म्मार्थ-संशयिते वस्तुनि गुरवोऽपि समाधानाय सततं भवन्तमेवापृच्छन्, तत् कथं भवा-निदानीं विमृशतीत्याह चन्द्रकेतुः। तदाकर्ण्य सुमन्त्र आह, आयुष्मन् ! यथाधर्म्ममेव भवानभिभाषते, एष हि साङ्ग्रामिको न्यायः, रघुसिंहास्तु इमामेव पद्धतिं चिरमनु-पालयामासुरिति। चन्द्रकेतुरप्याह, भवन्त एव रघुवंशीयानां कुलस्थितिं धर्म्मशास्त्र-मितिहासञ्च सम्यक्तया जानन्तीति। सुमन्त्रस्तु तदा कुमारं सस्नेहास्रं परिष्वज्याह, अत्यल्पवयसोऽपि इन्द्रजिद्विजयिनः कुमारलक्ष्मणस्यापत्यं भवान् वीरवृत्तमनुसरति, दिष्ट्या राज्ञः दशरथस्य कुलं प्रतिष्ठामागतमिति। तदाकर्ण्य चन्द्रकेतुः सखेदमाह, रघुवंशप्रधाने रामभद्रे प्रतिष्ठामनधिगतवति सति, अस्माभिरधन्यैः का हि नाम रघुकुलस्य स्थितिः ? तेन च वयः पितरः निरन्तरमेव दुःखायन्ते। तदाकर्ण्य सुमन्त्र आह, अहह ! हृदयमर्म्मविदारकाणि चन्द्रकेतोः वचनानि भवन्तीति।

लवस्तु तदा, कुमुदबान्धवे कुमुदिनीव मे दृष्टिः कथं हि एतस्मिन् नितरामभिरज्यति ? कथं वा मदीयोऽयं बाहुः कलहकामः भवतीति विविधं विकल्पितवान्। चन्द्रकेतुः रथादवतीर्य्य सुमन्त्रं ससम्भ्रममाह, आर्य्य ! त्वामहमभिवन्दे इति। सुमन्त्रस्तु भगवान् वराहरूपी ते श्रेयः विदधातु, भवद्गुरु इव भवान् सर्व्वत्र विजयलक्ष्मीं लभतामित्याशीः प्रददौ। रथस्थ एव भवानतीव शोभते, अतः अत्यादरप्रदर्शनं मा कृत इति लवेनोक्तः, तर्हि महानतिरपि रथमन्यमलङ्करोतु इति चन्द्रकेतुरभिदधे। तदा लवः सुमन्त्रमाह, आर्य्य! रथे राजपुत्रं समारोहयेति। त्वमपि कुमारवचनमनुपालयेति सुमन्त्रोऽपि लवमभिहितवान्। स्वं हि द्रव्यं यथेच्छमेवोपभुज्यते जनैरिति स्वेषां रथानामारोहणे नास्ति दोषः यद्यपि, तथाऽपि वयं रथारोहणे सम्यगनभ्यस्ततया सपदि स्वीकर्त्तुमेतत् नाभिलषामः। तद्वचनं श्रुत्वा सुमन्त्र आह, दर्पसौजन्ययोः यथायथमभिधातुं भवान् जानाति, भगवान् रघुमणिः त्वामेवंविधं पश्येद्द यदि, तदा तस्य हृदयं नूनं द्रवीभूतं स्यादिति। तच्छ्रुत्वा लव आह, स हि राजर्षिः अतीव सुजनः श्रूयते, वयमपि यज्ञविघातकाः न भवामः, गुणवन्तं तं राजानं वयं समाद्रियामहे एव, परन्तु तुरङ्गरक्षिणां निखिलराजन्याक्षेपसूचिकां सुदुःसहां प्रोद्धतां वाचमाकर्ण्यैवं हि विकृतिमधिगता इति। तदाकर्ण्य सविस्मयमाह चन्द्रकेतुः, गुरुजनानां प्रतापोत्कर्षमुपश्रुत्यापि भवन्तः किमु दुःखायमानमानसाः संवृत्ताः ? इति। तत्र मेऽमर्षः अस्ति, नास्ति वेति तादृशप्रश्नस्य नायमवसरः, परन्त्वेतत् पृच्छामि यत्, स हि राजर्षिः तदीयाः प्रकृतयश्च अतीव दान्ता इति श्रूयते, तर्हि कथमेते मनुष्याः राक्षसीं वाचमभिदधति ? यतो हि तादृशी वाक् सर्व्ववैराणां प्रसूतिः, अलक्ष्म्याश्च निदानम्; प्रियसत्यां हि वाचं सर्व्वे एवाभिष्टुवन्ति, कीर्त्तिश्चैषा जनयति, अलक्ष्मीञ्च, हिनस्ति, तेन हि इमां कामदुघेति मनीषिण आमनन्तीति लवोऽब्रवीत्। सुमन्त्रस्तु तदाकर्ण्याह, विशुद्धसंस्कारसम्पन्नां वाचमयमुदीरयतीति।

अथ लवः "किन्नु भवतस्तातप्रतापोत्कर्षेऽप्यमर्षः ?" इति प्रागुक्तस्य चन्द्रकेतोर्वचनस्य, क्षत्त्रधर्मा न हि व्यक्तिविशेषे पर्य्याप्ताः इति ज्ञात्वा प्रत्युत्तरमभिदधे। तच्छ्रुत्वा सुमन्त्र आह, भवान् देवमैक्ष्वाकं नाभिजानाति, तेन चेत्थं तन्मर्य्यादाविघातकरं वचनमभिदधाति, अस्मत्सैनिकान् प्रमथ्य तु भवान् सत्यं स्वविक्रमं प्रदर्शितवान्, परन्तु जामदग्न्यदमने भगवति रामभद्रे इत्थमभिधातुं कदापि नार्हतीति। तदाकर्ण्य लवः सहासमाह, असौ राजा जामदग्न्यदमन इति प्रशंसावादः न ह्युच्चैः समुद्घोषयितव्यः, यतः द्विजानां वीर्य्यं वाचि एव स्थितं, न बाहौ, तत्र तु क्षत्त्रियाणा-

नव सिध्यति, यद्यप्यसौ ब्राह्मणः जामदग्न्यः शस्त्रग्राही आसीत्, तथाऽपि ब्राह्मणतया प्रकृत्या दान्तस्य तस्य दमने का हि भवतां राज्ञः प्रशंसा नासीति। तदाकर्ण्य चन्द्रकेतुः सव्यथं सुमन्त्रमाह, आर्य्य! किमवीत्तरप्रत्युत्तरेण? सोऽयं भवति नवः वीरावतारः, येन भगवान् भार्गवोऽपि वीरत्वेन न गण्यते,-ये च तातपादाः सप्तभुवनायाभयदक्षिणां प्रददुः, तेऽपि न ज्ञायन्त एवानेनेति। एतदाकर्ण्य लवः आह, रघुपतेः महिमानं को हि नाम न जानाति? वृद्धानां तेषां चरितमविचार-णीयमेव, परन्तु स्त्रियं ताड़कां निहत्य तेन सुमहत् स्वं यशः प्रकटीकृतम्, अपिच खरेण सह समरे त्रीणि पदानि पराङ्गत्यासीमं युद्धकौशलमसौ व्यतानीत्। वानरराजेन वालिना सह रणे तु सुतरामेवेति। तदाकर्ण्य चन्द्रकेतुराह, आः!! गुरुजनमर्य्यादा-विलङ्घिन्! इति। लवस्तु तदा प्रत्युवाच, अयि! मय्येव कोपकषायितनेत्रो भव-तीति। ततः उभावेव कुमारौ क्रोधेन कोकनदसच्छायनयनौ भ्रमद्भृङ्गारविन्दाय-मानमुखौ च भूत्वा युयुत्सया युद्धानुकूलां भूमिमधिशिश्रियतुरिति।

इत्यशेषशास्त्राटवीसञ्चरणपञ्चानन-कुलपतिवाल्य-"बि, ए" इत्युपनामक-

श्रीमज्जीवानन्दविद्यासागर-भट्टाचार्य्यविरचितायां, तदात्मजाभ्यां

श्रीमदाशुबोधविद्याभूषण-श्रीमन्नित्यबोधविद्यारत्नाभ्यां

परिवर्त्तित-परिवर्द्धितायां सुखबोधिनीसमा-

ख्यायाम् उत्तररामचरितव्याख्यायां

पञ्चमोऽङ्कः ॥ ५ ॥

अथ षष्ठोऽङ्कः ।

[ततः प्रविशति विमानेनोज्ज्वलेन विद्याधरमिथुनम्]। (क)

विद्याधरः। अहो खलु अनयोर्विकर्त्तनकुलकुमारयोः अकाण्ड-कलहप्रचण्डयोः उद्योतितक्षात्त्रलक्ष्मीकयोः अद्भुतोद्भ्रान्तदेवासुराणि विक्रान्तचरितानि!!। तथाहि प्रिये! पश्य पश्य। (ख)—

(क) दर्पणोक्तनाटकीयाङ्कलक्षणे "दूराह्वानं वधो युद्धं राज्यदेशादिविप्लवः" इत्यादिना युद्धस्य वर्ज्जनीयमध्ये परिगणनात् तत् विष्कम्भकान्तर्वर्त्तितया वर्णयितु-मुपक्रममाण आह, तत इति।—उज्ज्वलेन—भास्वरेण, नानाऽलङ्कारपरिशोभिततया देदीप्यमानेनेत्यर्थः। विमानेन—व्योमयानेन। ("विमानं व्योमयाने च सार्वभौम-गृहेऽपि च" इति मेदिनी। "विमानेनोज्ज्वलेन" इत्यत्र "विमानोज्ज्वलम्" इति "विमानेनोज्ज्वलम्" इति च पाठद्वयं दृश्यते) विद्याधरमिथुनं—देवयोनिविशेष-दम्पती। [विद्याधरी च विद्याधरश्च इति विद्याधरौ "पुमान् स्त्रिया" (१।२।६७ पा०) इति स्त्रिया पुंसो द्वन्द्वे पुंलिङ्गैकशेषः] प्रविशति—आगच्छति, रङ्गा-लयमिति शेषः।

(ख) कुमारयोरलौकिकसमरकौशलसन्दर्शनविस्मितो विद्याधरः स्वीयां प्रेयसीं तत् सन्दर्शयन्नाह, अहो इति।—अहो—इति विस्मयव्यञ्जकमव्ययम्। खलु—वाक्यभूषायाम्। अकाण्डकलहप्रचण्डयोः,—अकाण्डे—अनवसरे, अकस्मादित्यर्थः, यः कलहः,—विरोधः, समर इति यावत्, तेन प्रचण्डयोः,—उग्रयोः, आकस्मिक-विवादभीषणयोरित्यर्थः। (अत्र "अकाण्डप्रचण्डकलहयोः" इति विद्यासागरधृतपाठे—अकाण्डः,—आकस्मिकः, प्रचण्डः,—भीषणः, कलहः ययोः तादृशयोरित्यर्थः) उद्योतितक्षात्त्रलक्ष्मीकयोः,—उद्योतिता—प्रकटीकृता उद्दीपिता वा, क्षात्त्रलक्ष्मीः,—क्षत्त्रियश्रीः, [क्षत्त्राणामियमिति क्षात्त्री, सा चासौ लक्ष्मीश्चेति क्षात्त्रलक्ष्मीः, "पुंवत् कर्म्मधारयजातीयदेशीयेषु" (६।३।४२ पा०) इति पुंवद्भावः] याभ्यां तयोः, प्रकाशितराजन्योचितभुजवीर्य्यसम्पदोरित्यर्थः। ["नद्यृतश्च" (५।४।१५३ पा०) इति समासान्तः कप्। अत्र "उद्योतितक्षात्त्रलक्ष्मीकाणि" इति पाठे—विक्रान्त-

झणज्झणितकङ्कणक्वणितकिङ्किणीकं धनु-
र्ध्वनद्गुरु गुणाटनीकृतकरालकोलाहलम्।
वितत्य किरतोः शरानविरतस्फुरच्चूड़यो-
र्विचित्रमभिवर्द्धते भुवनभीममायोधनम्॥ १॥

चरितानीत्यस्य विशेषणतया व्याख्येयम्] अनयोः,—पुरतः परिदृश्यमानयो-रित्यर्थः। विकर्त्तनकुलकुमारयोः,—विकर्त्तनस्य—सूर्य्यस्य, ("विकर्त्तनार्कमार्त्तण्ड-मिहिरारुणपूषणः।" इति सूर्य्यपर्य्याये अमरः) यत् कुलम्—अन्वयः, तस्य कुमारौ—तदंशभूतौ बालकावित्यर्थः, तयोः लवचन्द्रकेत्वोरित्यर्थः। अद्भुतोद्भ्रान्तदेवासुराणि—अद्भुतेन—आश्चर्य्येण, विस्मयरसेनेत्यर्थः, उद्भ्रान्ताः,—विमूढ़ाः, न्यूनाधिकत्वनिर्णया-क्षमा इत्यर्थः, देवासुराः,—सुरदानवाः यैः तानि, विस्मयविह्वलीकृतसुरासुराणीति यावत्। विक्रान्तचरितानि—विक्रमविलसितानि, विक्रमसूचकानि समरकर्म्माणि वा; अन्तरीक्षविहारिणो देवदानवा अपि प्रकटितालौकिकाभिनवभुजवीर्य्ययो-रनयोः समरकौशलमालोक्य बलवद्विस्मयपारवश्यमधिजग्मुरिति समुदितार्थः। तथाहि—तमेव विस्मयकरं समरव्यापारमवगच्छेत्यर्थः। [पश्य पश्येति विस्मये द्विर्वचनम्]।

विपुलविक्रमेण युद्धमारभमाणयोः कुमारयोः समरकौशलस्य विस्मयकरत्वमेव प्रदर्शयन्नाह, झणदिति।—झणज्झणितानि झणज्झण इत्यव्यक्तं शब्दं कुर्वन्ति, [झणज्झणः शब्दः जातः एषामिति विग्रहे झणज्झणशब्दात् "तदस्य सञ्जातं तारका-दिभ्य इतच्" (५।२।३६ पा०) इति इतच्] यानि कङ्कणानि करभूषणविशेषाः, तानीव क्वणिताः शब्दायमानाः, किङ्किण्यः क्षुद्रघण्टिका यत्र तत्, ["नद्यृतश्च" (५।४।१५३ पा०) इति समासान्तः कप्प्रत्ययः। "कङ्कणं करभूषणम्" इति "किङ्किणी क्षुद्रघण्टिका" इति चामरः] यद्वा—झणज्झणितानि यानि कङ्कणानि, तेषामिव क्वणितं रणितं यासां ताः झणज्झणितकङ्कणक्वणिताः, [इति उपमान-पूर्व्वपदो बहुव्रीहिः उत्तरपदलोपश्च] तादृश्यः किङ्किण्यः यत्र तादृति, ("झणज्-झणितकङ्कण—" इत्यत्र "झणज्झणितिकङ्कण—" इति पाठे—झणज्झणिति झणज्झणत् इत्याकारकं, यत् कङ्कणस्य क्वणितं, तद्वत् क्वणितं यासां तादृश्यः किङ्किण्यः यस्मिन् तदित्यर्थः)। [उष्ट्रमुखवत् समासः। अत्र इतौ परे झणज्झण-दित्यव्यक्तानुकरणशब्दात् "अव्यक्तानुकरणस्यात इतौ" (६।१।९८ पा०) इति पररूपैकादेशेन झणज्झणिति पदं सिद्धम्] तथा गुणेन मौर्व्या, अटनीभ्यां

विजृम्भितञ्च दिव्यस्य मङ्गलाय द्वयोरपि ।
स्तनयित्नोरिवाऽऽमन्द्रं दुन्दुभेर्दुन्दुमायितम् ॥ २ ॥

कोटिभ्यां, धनुषः प्रान्तभागाभ्यामित्यर्थः, ("कोटिरस्याटनी" इत्यमरः) कृतः सम्पादितः, करालः भीषणः, अतिमहानित्यर्थः, कोलाहलः शब्दविशेषः यस्य तादृशम्, अत एव ध्वनत् शब्दायमानं, गुरु अन्यदुर्वहं, [धनुरित्यस्य विशेषणम्] अथवा—ध्वनता टङ्कुर्वता, गुरुणा दृढ़ेन, गुणेन शिञ्जिन्या, अटनीभ्यां कोटिभ्याञ्च, कृतः जनितः, करालः विकटः, कोलाहलः कलकलः यस्य तत्, मौर्व्याकर्षणोत्थविकटटङ्कारमुखरितप्रान्तभागद्वयमित्यर्थः ; यद्वा,—ध्वनन् आकर्षणेन टङ्कारशब्दं कुर्वन्, गुरुः कठिनः, गुणो मौर्वी ययोः एवम्भूते, ये अटन्यौ अग्रभागौ, ताभ्यां कृतः जनितः, करालो भीषणः, कोलाहलो गभीरशब्दो येन तादृशं, धनुः शरासनं, वितत्य विस्फार्य्य, प्रसार्य्येत्यर्थः, [विपूर्वात् तनोतेः ल्यपि "अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति (६।४।३७ पा०) इत्यनुनासिकलोपे "ह्रस्वस्य पिति कृति तुक्" (६।१।७१ पा०) इति तुका सिद्धम्] शरान् बाणान्, किरतोः निरन्तरं प्रक्षिपतोः, वर्षतोः इत्यर्थः, अविरतम् अविश्रान्तं, निरन्तरं यथा स्यात् तथेत्यर्थः, स्फुरन्त्यः इतस्ततः शरीरसञ्चालनात् प्रचलन्त्यः, चूड़ाः शिखाः ययोः तयोस्तयोः, धनुरास्फालनकृतशरीरसञ्चालनात् निरन्तरप्रचलच्छिखयोरित्यर्थः, एतयोः कुमारयोरिति शेषः, भुवनानां लोकानां, जगत्त्रयस्येत्यर्थः, भीमं भयानकं, त्रिभुवनभीतिविधायकमित्यर्थः, विचित्रं विस्मयावहम्, अभिनवकौशलवत्तया अत्याश्चर्य्यजनकमिति यावत्, आयोधनं युद्धं, [आयुध्यते अस्मिन्निति आयुधेरधिकरणे ल्युट्] अभिवर्द्धते प्रसरति, उत्तरोत्तरमुपचितं भवतीत्यर्थः ; ("अभिवर्द्धते" इत्यत्र "अभिवर्त्तते" इति पाठान्तरे सुगमोऽर्थः) समरभूमाववतीर्णावेतौ विकर्त्तनकुलनन्दनौ सज्यं महदपि शरासनम् अनायासेनैव आस्फालयन् अत्यद्भुतसमरकौशलेन त्रिलोकीलोकं विस्मापयतः इति भावः । [अत्र प्रथमपादे कङ्कणक्वणितेत्यत्र समासे औपम्यवाचिनो लोपात् लुप्तोपमा, तथा अनयोः कुमारयोः कविमात्रसंवेद्यचेष्टास्वरूपयोः यथावद्वर्णनात् स्वभावोक्तिश्चालङ्कारः, एवञ्चानयोः परस्परनिरपेक्षसंसृष्टिः] । पृथ्वी वृत्तं, तल्लक्षणं यथा,—"जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः इति ॥ १ ॥

कुमारयोरनयोरलौकिकसमरकौशलमालोकयतां देवानामपि दुन्दुभिध्वानेनोत्साहप्रदर्शनमाह, विजृम्भितमिति ।—द्वयोरपि उभयोरपि, लवचन्द्रकेत्वोरित्यर्थः,

तत् प्रवर्त्त्यताम् अनयोः प्रवीरयोः अनवरतम् अविरल-ललितविकचकनककमलकमनीयसंहतिः अमरतरुतरुणमणि-मुकुलनिकरमकरन्दसुन्दरः पुष्पनिपातः । (ग)

मङ्गलाय कल्याणाय, समरोत्साहवर्द्धनार्थमित्यर्थः, स्तनयित्नोः ध्वनतो जलदस्येत्यर्थः, [स्तनयतीति विग्रहे स्तनयतेः कर्त्तरि इत्नुः] इव, आमन्द्रं निरतिशयगुरुगम्भीर-मित्यर्थः, ("मन्द्रस्तु गम्भीरे" इत्यमरः) दिव्यस्य स्वर्गीयस्य, [दिवि भवः इति विग्रहे दिव्शब्दात् "तत्र भवः" (४।३।५३ पा०) इति यत्रा दिव्यमिति] दुन्दुभेः भेर्य्याः, तन्नामवाद्यविशेषस्येत्यर्थः, ("भेरी स्त्री दुन्दुभिः पुमान्" इत्यमरः । दुम् दुम् इति शब्देन भाति इति दुन्दुभिरित्यमरव्याख्याने महेश्वरः) दुन्दुमायितं दुन्दु-मित्याकारलक्षितं, [दुन्दुमायितमिति दुमित्यव्यक्तानुकरणशब्दात् "अव्यक्तानुकरणा-द्व्यजवरार्द्धादनितौ डाच्" (५।४ ५७ पा०) इति डाच्, ततः "डाचि विवक्षिते द्वे बहुलम्" (वा०) इति द्वित्वे दुन्दुमा इत्यस्मात् "लोहितादिडाज्भ्यः क्यष्" (३।१।१३ पा०) इति क्यषि दुन्दुमाय इति नामधातोर्भावे निष्ठा] विजृम्भितञ्च सर्वासु दिक्षु व्याप्तञ्चेत्यर्थः ; [चकारः समुच्चयार्थः, पूर्व्वश्लोकस्थे "अभिवर्त्तते" इति क्रियापदेनेदं समुच्चीयते इति बोध्यम] अतीवविस्मयकरमिदं रणनैपुण्यमालोक्य परितुष्यद्भिर्दिवि-षद्भिरपि कृतः अयं गम्भीरभेरीनिनादः कुमारयोरनयोः समरानुरागं सम्यक् विवर्द्ध-यतीति समुदितार्थः । ["विजृम्भितञ्च दिव्यस्य" इत्यत्र "विजृम्भितञ्च दिव्यास्त्रम्" इति पाठान्तरं क्वचिद्दृश्यते, तत्रायमर्थः,—द्वयोरपि कुमारयोः दिव्यास्त्रं स्वर्गीयं प्रहरणं, विजृम्भितं समाकीर्णं, परस्परप्रहितेनायुधेन युद्धक्षेत्रं परिव्याप्तमित्यर्थः । एवं द्वयोरपि मङ्गलाय स्तनयित्नोरिव आमन्द्रं दुन्दुभेः दुन्दुमायितञ्च विजृम्भितम् आविर्भूतमित्यर्थः । उक्तोभयपाठ एव स्तनयित्नुना सह दुन्दुभेरवैधर्म्यसाम्यकथनादुपमा-ऽलङ्कारः] । पथ्यावक्त्रं वृत्तम् ॥ २ ॥

(ग) तत्—तस्मात्, भेरीवादनादिना अमरैरपि रणोत्साहविवर्द्धनादित्यर्थः । प्रवीरयोः,—सुप्रकर्षवीरत्ववतोरित्यर्थः । [प्रकृष्टौ वीरौ इति प्रवीरौ तयोरिति प्रादि समासः] । अनयोः,—एतयोर्लवचन्द्रकेत्वोरित्यर्थः, शिरसोरिति शेषः । अविरले-त्यादि ।—अविरलैः,—निरन्तरैः, सान्द्रसन्निविष्टैरित्यर्थः; ललितैः,—रुचिरैः, नयन-मनोरञ्जनैरिति यावत्, विकचैः,—विकस्वरैः, सुपरिस्फुटैरित्यर्थः, कनककमलैः,—सुवर्णसरसिजैः, कमनीया—मनोमोहिनीत्यर्थः, संहतिः,—समवायः, राशिरिति यावत्, यस्य स तथोक्तः । ("अविरलललित—" इत्यत्र "अविरलमुकुलितविकचकनक-

विद्याधरी। ता किं त्ति उण अआकण्डविप्फुरिदतड़िच्छड़ाकड़ारं विअ अंबरं झत्ति संवुत्तं ? ।* (घ)

* तत्- किमिति पुनरकाण्डविस्फुरिततड़िच्छटाकड़ारमिव अम्बरं झटिति संवृत्तम् ?।

मयकमलकमनीयसन्ततिः" इति पाठे,—अविरलं—निरन्तरं यथा तथा, लुलितानां—चलितानां; पतितानामिति यावत, विकचकनकमयकमलानां—प्रस्फुटितस्वर्णमयपद्मानां, कमनीया—मनोहरा, सन्ततिः—विस्तृतिः यस्मिन् स तथोक्तः इत्यर्थः।) अमरेत्यादि।—अमरतरूणां—कल्प-पारिजातप्रभृतिदेवपादपानां, तरुणानि—नवोद्गतानि, सद्यःसमुत्पन्नानीति यावत्, यानि मणिमयानि—रत्नात्मिकानि, मुकुलानि—विकासोन्मुखकुड्मलानि, तेषां निकरस्य—सन्ततेः, मकरन्दैः,—मधुभिः; घ्राणतर्पणैरिति भावः; सुन्दरः,—मनोरमः, सुरभिरिति यावत्। पुष्पनिपातः,—कुसुमवृष्टिरित्यर्थः। प्रवर्त्त्यतां—समारभ्यताम्, आवाभ्यामिति शेषः। [प्रवृतेर्णिजन्तात् कर्म्मणि लोट्। अत्र "प्रवर्त्तताम्" इति पाठे—भवतु इत्यर्थः, पुष्पनिपातः इति तु अस्मिन् पक्षे कर्तृपदं बोध्यम्]। सर्वं हि व्यवहारानुरूपमेव शोभते, न तु तद्विरुद्धमिति दृश्यकाव्ये सहृदयवचनप्रतिवचनात्मकवाक्ये सुदीर्घसमासनिबन्धस्य अभिनये अत्यन्तप्रतिकूलतया कवेर्द्दोषापादकतैव प्रतिभातीति बोध्यम्।

(घ) इह वक्तृनामोल्लेखावसरे विद्येति नामैकदेशग्रहणे स्त्रीपुंसयोर्विशेषग्रहो न स्यादिति सम्पूर्णतया विद्याधरीति उक्तम्। तत्किमिति—प्रश्नार्थकमेकमव्ययम्। झटिति—सहसा। अम्बरम्—आकाशं, गगनतलमिति यावत्। अकाण्डेति।—अकाण्डे—अनवसरे, अकस्मादित्यर्थः, विस्फुरितानां—प्रस्फुरितानां, विलसितानामित्यर्थः, तड़ितां—विद्युतां, छटाभिः,—दीप्तिभिः, तड़ित्परम्परया इत्यर्थः, कड़ारं—पिङ्गलवर्णमिवेत्युत्प्रेक्षा। (अत्र "अआण्डतण्डविदुद्दण्डतरलिदतड़िच्छड़ाकड़ारं" इति पाठान्तरस्य—"अकाण्डताण्डवितोद्दण्डतरलिततड़िच्छटाकड़ारम्" इति संस्कृतानुवादे अयमर्थः, तथाहि—अकाण्डे ताण्डविता—अकस्मात् विस्फुरिता, तथा उद्दण्डम्—उत्कटं यथा तथा, तरलिता—तरङ्गायिता, या तड़िच्छटा तया कड़ारं—पिशङ्गमिति। अस्मिन् पाठे तु उत्प्रेक्षाद्योतकेवशब्दो नास्तीति बोध्यम्)। संवृत्तं—सञ्जातम्। यद्वा,—तत्—इति प्रसिद्धार्थे, किमिति—इति प्रश्नार्थे अव्ययम्; तथाच, तत्—भास्वरतयाऽतिप्रसिद्धम्, अम्बरं किमिति—पुनः, अकाण्डविस्फुरिततड़िच्छटाकड़ारमिव संवृत्तमित्यन्वयः।

विद्याधरः । तत्किन्नु खलु अद्य । (ङ)—

त्वाष्ट्रयन्त्रभ्रमिभ्रान्तमार्त्तण्डज्योतिरुज्ज्वलः ।
पुटभेदो ललाटस्थनीललोहितचक्षुषः !! ॥ २ ॥

(ङ) स्वपत्न्या अकस्मात् गगनपिशङ्गताकारणं पृष्टः विद्याधरोऽपि याथार्थ्यं विनिश्चेतुमशक्नुवन् वितर्कयति, तदिति ।—तत्—इति प्रसिद्धार्थद्योतकम् अव्ययम् । किन्नु—इति वितर्के । खलु—वाक्यालङ्कारे । अद्य—अस्मिन्नहनि, इदानीमित्यर्थः । एतेषाञ्च पदानां वक्ष्यमाणश्लोकेनान्वयो बोध्यः ।

आकस्मिकगगनपिशङ्गतादर्शनेन विस्मितः विद्याधरः तन्निदानं वितर्कयन्नाह, त्वाष्ट्रेति ।—त्वाष्ट्रस्य विश्वकर्मसम्बन्धिन इत्यर्थः, [त्वक्षतीति त्वष्टा, "त्वक्षू तनूकरणे" इति धातोः कर्त्तरि तृच्, त्वष्टुरिदमिति त्वाष्ट्रं, त्वष्टृशब्दात् "तस्येदम् (४।३।१२०पा०) इत्यण्] यन्त्रस्य शाणभेदस्येत्यर्थः, मणिमार्जनपदार्थविशेषस्येति यावत्, भ्रमिभिः आवर्त्तनैः, भ्रान्तस्य आवर्त्तितस्य, मुहुर्घूर्णितस्येत्यर्थः, मार्त्तण्डस्य अपारश्मेः, यत् ज्योतिः पुनःपुनरावर्त्तनात् तडिच्छटावत् परितः प्रसृतं तेज इत्यर्थः, तदिव उज्ज्वलः देदीप्यमानः ; ["उपमानानि सामान्यवचनैः" (२।१।५५ पा०) इति उपमानवाचक-ज्योतिःपदेन सामान्यधर्म्मवाचकोज्ज्वलशब्दस्य समासः । इह विग्रहवाक्ये उपमान-पदस्य तत्सदृशे लाक्षणिकत्वज्ञापनार्थम् इवादिशब्दः प्रयुज्यते] ललाटस्थं भालगतं, [ललाटे तिष्ठति यदिति ललाटोपपदात्तिष्ठतेः "सुपि स्थः" (३।२।४ पा०) इति कः] नीललोहितस्य महादेवस्य, [नीलश्चासौ लोहितश्चेति विग्रहे नीललोहित इति विशेषणसमासः । कण्ठावच्छेदेन नीलतया, जटावच्छेदेन लोहिततया च अस्य नीललोहितेति संज्ञा । स्कन्दपुराणे तु अस्य तन्नामधेयत्वे प्रकारान्तरमुक्तं, यथा,—"नीलं येन ममाङ्गन्तु रसात्तं लोहितं त्विषा । नीललोहित इत्येव ततोऽहं परिकीर्त्तितः ॥" इति] यत् चक्षुः तृतीयं नयनमित्यर्थः, तस्य, पुटयोः वर्त्मनोः, आवरणयोरित्यर्थः, भेदः विघटनं, समुन्मीलनमिति यावत, किन्नु अद्य, जातः ? इति शेषः । विश्वकर्म्मणा तेजःसङ्कोचनार्थं शाणमारोपितस्य त्विषाम्पतेरत्युग्रतेजोवत् भास्वरं सृष्टिसंहारोद्यतस्य भगवतो धूर्ज्जटेः तृतीयनयनसमुत्थं प्रसिद्धं तेजोऽद्य प्रसृतं किम् ? इति निष्कृष्टार्थः । पुरा किल विश्वकर्मा स्वभर्त्तुर्दिवाकरस्य अत्युग्रं तेजोऽसहमानायाः दुहितुर्वाक्यात् जामातुस्तेजःखर्व्वतासम्पादनाय तं विकर्त्तनदेवं शाणमारोपयन् पुनः पुनः भ्रामणेन तस्य तेजोह्रासमकार्षीदिति पौराणिककथायां मार्कण्डेयपुराणं यथा—"तवातितेजसा व्याप्तमिदं रूपं सुदुःसहम् । असहन्ती वतः संज्ञा वने चरति वै तपः ॥ श्रुतं मे

[विचिन्त्य]। (च) आं ज्ञातं, वत्सेन चन्द्रकेतुना प्रयुक्तमस्त्रमाग्नेयं, यस्यायमग्निच्छटासम्पातः। सम्प्रति हि, (छ)—

ब्राह्मणो वाक्यं यदि ते देव ! रोचते ॥ रूपं निवर्त्तयाम्येतत् तव कान्तं दिवस्पते !" ॥ इति विश्वकर्म्मणि उक्ते मार्कण्डेय उवाच,—"यतो हि भास्वतो रूपं प्रागासीत् परिमण्डलम्। ततस्तथेति तं प्राह त्वष्टारं भगवान् रविः ॥ विश्वकर्म्मा त्वनुज्ञातः शाकद्वीपे विवस्वता। भ्रमिमारोप्य तत्तेजःशातनायोपचक्रमे ॥" इत्यादि। सूर्य्यस्य मार्त्तण्डनाम्नः कारणमुक्तं मार्कण्डेयपुराणे,—"ततस्तां कश्यपः प्राह किञ्चित्कोपप्लुताक्षरम्। किं मारयसि गर्भाण्डमिति नित्योपवासिनी ?॥ सा च तं प्राह गर्भाण्डमेतत् पश्यसि कोपन !। न मारितं विपक्षाणां मृत्यवे तद्भविष्यति ॥......अथान्तरोक्षादाभाष्य कश्यपं मुनिसत्तमम्। सतोयमेघगम्भीरवागुवाचाशरीरिणी ॥ मारितं ते यतः प्रोक्तमेतदण्डं त्वया मुने !। तस्मान्मुने ! सुतस्तेऽयं मार्त्तण्डाख्यो भविष्यति ॥" इति। (अत्र प्रथमार्द्धे "त्वाष्ट्रयन्त्रभ्रमिभ्रान्तमार्त्तण्डज्योतिरुज्ज्वलम्" इति पाठे,—एतत् उज्ज्वलं त्वाष्ट्रयन्त्रभ्रमिभ्रान्तमार्त्तण्डज्योतिः किम् ? उत ललाटस्थनीललोहितचक्षुषः पुटभेदो नु ? इति पृथग्वाक्यद्वयरूपेण अन्वयः कार्य्यः)। [इह प्रकृतस्य दिव्यास्त्रतेजसः नीललोहिततृतीयनेत्रपुटभेदसम्भवत्वेन संशयात् शुद्धः सन्देहोऽलङ्कारः, स च पूर्वार्द्धगतया लुप्तोपमया सङ्कीर्णः]। पथ्यावक्त्रं वृत्तम् ॥ ३ ॥

(च) विचिन्त्य—विमृश्य, सप्रणिधानमवधार्य्येत्यर्थः, आहेति शेषः।

(छ) आम्—इति निश्चयार्थकमव्ययम्। ("आमेवम्" इत्यमरः। "द्वे निश्चये" इति तट्टीकायां महेश्वरः। "आं ज्ञानविनिश्चये" इति वोपालितश्च) ज्ञातं—बुद्धं, निर्णीतमित्यर्थः, यथाऽवस्थितं वस्त्विति शेषः; किमेतत् सम्भूतं, तत् मया सम्यक् अवबुध्यतेति भावः। तदेव दर्शयति, वत्सेनेति।—वत्सेन—पुत्रकेण, अतीव स्नेहास्पदेनेत्यर्थः, ("वत्सः पुत्रादिवर्षयोः। तर्णके नोरसि क्लीवम्" इति मेदिनी) चन्द्रकेतुना—लक्ष्मणतनयेन। प्रयुक्तं—विसृष्टं, विमुक्तमित्यर्थः। आग्नेयम्—अग्निदेवताकम्, ["अग्निकलिभ्यां ढग्वक्तव्यः" (वा०) इति ढक्]। समन्ताद्विमारिवह्निशिखमित्यर्थः। अस्त्रम्—आयुधम्। यस्य—अस्त्रस्य। अयं—परिदृश्यमानः इत्यर्थः। अग्नीति।—अग्नीनाम्—अनलानां, छटानां—प्रभाणां, सम्पातः,—उद्गमः, वह्निप्रभाप्रसर इत्यर्थः, परितः परिदृश्यते इति शेषः। हि—यतः, अत एवेत्यर्थः। सम्प्रति—इदानीं, वक्ष्यमाणश्लोकेनास्यान्वयः।

अवदग्धकर्बुरितकेतुचामरै-
रपयातमेव हि विमानमण्डलैः।
दधति ध्वजाङ्कुशपटाञ्चलेष्विमाः
क्षणकुङ्कुमच्छुरणविभ्रमं शिखाः॥ ४॥

युद्धे वीरेण चन्द्रकेतुना प्रयुक्तानामाग्नेयास्त्राणां विलास एवायमिति विनिश्चिन्वन् तत्प्रयुक्तां विभीषिकां, तेषां विशेषतो विभ्रमप्रकारञ्चाह, अवदग्धेति।—अवदग्धाः प्रायेण प्लुष्टाः, अस्त्रानलशिखासंयोगात् प्रारब्धदाहा इत्यर्थः, अत एव कर्बुरिताः शबलिताः, सञ्जातचित्रवर्णा इत्यर्थः, वह्निप्रभया रक्तत्वात् धूमेन कृष्णत्वात् स्वभावतः श्वेतत्वाच्चास्य चित्रवर्णत्वं ज्ञेयम्; [कर्बुरा एषां सञ्जाता इत्यर्थे "तदस्य सञ्जातं तारका-दिभ्यः इतच्" (५।२।३६ पा०) इति इतच्प्रत्ययः] यद्वा,—कर्बुराः कृताः इत्यर्थे ["तत्करोति तदाचष्टे" (ग०) इति णिचि कर्मणि क्तः] केतवः ध्वजाः, चामराणि च येषां तैः, अस्त्रानलशिखासंयोगात् प्रायशः दग्धीभूततया विचित्रध्वजचामरोप-हितैरित्यर्थः, विमानमण्डलैः व्योमयाननिकरैः, हि इति सम्भ्रमार्थकमव्ययम्; तथाच, ससम्भ्रमं यथा स्यात्तथेत्यर्थः, ("हि पादपूरणे हेतौ विशेषेऽप्यवधारणे। प्रश्ने हेत्वपदेशे च सम्भ्रमासूययोरपि॥" इति मेदिनी) अपयातमेव पलायितमेव; [अपपूर्व्वकात् यातेः "नपुंसके भावे क्तः" (३।३।११४ पा०) इति भावे क्तः] समरदर्शनोत्सुकानां देवानां विमानानि भस्मीभवनभयात् दूरं गतानीति भावः; यतो हि, इमाः शिखाः आग्नेयास्त्राणाम् अर्च्चिषः, ध्वजानां केतुदण्डानामित्यर्थः, ये अङ्कुशाः सृणयः, पताकावलम्बनार्थं दण्डाग्रे स्थापिताङ्कुशाकारपदार्थविशेषा इत्यर्थः, तेषां, पटाञ्चलेषु वसनप्रान्तेषु, ("वस्त्रस्यान्तो मतोऽञ्चलः" इति हलायुधः) यद्वा,—अङ्कुशशब्दस्य हस्तिचालनार्हलौहास्त्रभेदार्थकत्वेऽपि अत्र लक्षणया सामान्य-दण्डपरत्वं ज्ञेयम्; तथाच, ध्वजाङ्कुशानां ध्वजदण्डानामिति तदर्थः। (क्वचित् "ध्वजांशुकपटाञ्चलेषु" इति पाठो दृश्यते, तथात्वे—ध्वजांशुकेषु ध्वजसंलग्नवसनेषु, पटाञ्चलेषु वीरजनपरिहितवसनप्रान्तेषु इति तदर्थो ज्ञेयः) क्षणेति।—क्षणं मुहूर्त्तं व्याप्येत्यर्थः, कुङ्कुमेन काश्मीरजन्मना, ("अथ कुङ्कुमम्। काश्मीरजन्माऽग्नि-शिखम्—" इत्यमरः) यत् छुरणं रञ्जनं, तस्य विभ्रमं शोभां, सादृश्यमिति यावत्; यद्वा,—तस्य विभ्रमं भ्रान्तिं, दधति बिभ्रति, धारयन्तीत्यर्थः, ("शोभायेऽपि प्रयुज्यन्ते लक्ष्मीश्रीकान्तिविभ्रमाः।" इति हलायुधः। "विभ्रमो भ्रान्तिहावयोः" इति च मेदिनी) ध्वजवसनाञ्चलभागाः अस्त्राग्निप्रभाभिः कुङ्कुमरागरञ्जिता इव

आश्चर्य्यम्!! प्रवृत्त एवायम् उच्चण्डवज्रखण्डावस्फोटपटुः उत्सर्पिस्फुलिङ्गगुरुः उत्तालतुमुललेलिह्यानज्वालासम्भारभैरवः भगवान् उषर्बुधः। प्रचण्डश्चास्य सर्वतः सन्तापः, तत् प्रियामङ्गेनाच्छाद्य दूरमपसरामि। (ज) [तथा करोति]।

विभान्ति इति भावः। [अत एकस्य कुङ्कुमस्य विभ्रमस्य अपराभिः ध्वजपटसंसक्तशिखाभिः धारणं निरतिशयमसम्भवदपि कुङ्कुमसदृशविभ्रमधारणेन सामञ्जस्यादसम्भवद्वस्तुसम्बन्धरूपो निदर्शनाऽलङ्कारः, अपिच पलायनपराणां प्रायशः अटक्षत्वेन सामान्यतः दाहसम्बन्धरहितानामपि केतुचामराणां साकल्येन दाहसम्बन्धकथनात् आयसानेन असम्बन्धे सम्बन्धरूपातिशयोक्त्यलङ्कारेणासौ सङ्कीर्य्यते। इह हिशब्दस्य समुनार्थे प्रयुज्यमानतया पलायने त्वराऽऽतिशय्यद्योतनात् न कैश्चिदाशङ्कितस्य निरर्थकत्वदूषणस्यावकाशः]। मञ्जुभाषिणी वृत्तम्; "सजसा जगौ च यदि मञ्जुभाषिणी" इति लक्षणात्॥ ४॥

(ज) आश्चर्य्यम्!!—अतीव विस्मयकरमेतदित्यर्थः। उच्चण्डेति।—उच्चण्डानाम्—अतिभीषणानाम्, अत्युज्ज्वलानां वा, वज्रखण्डानाम्—अशनिशकलानां, हीरकच्छेदानां वा, यः अवस्फोटः,—आविर्भावः, विदारणं वा, तद्वत् पटुः,—असन्दः, प्रबलः इत्यर्थः, तीक्ष्णो वा; अशनिसम्पातवदतीव भयानकः, हीरकखण्डादपि वा अधिकद्युतिमानिति भावः। ("दक्षामन्दागदेषु तु। पटुः" इत्यमरः। "पटुस्तीक्ष्णे स्फुटे दक्षे निष्ठुरे निर्दयेऽपि च।" इति रुद्रः) उत्सर्पिभिः,—उद्गच्छद्भिः, समन्तात् विसरद्भिरित्यर्थः, स्फुलिङ्गैः,—वह्निकणैः, गुरुः,—महान्, स्वयं लघुरपि सर्व्वतोविसारिवह्निकणैः महीयस्तया प्रतीयमान इत्यर्थः। उत्तालेन—अत्युन्नतेन, तुमुलेन—अतिसङ्कुलेन, सर्व्वत्र व्याप्नुवतेत्यर्थः, लेलिह्यानेन—जगत् ग्रसितुमुद्यता, समन्तात् प्रसरतेत्यर्थः, [लिहेः आदादिकस्य यङि शानचि पृषोदरादित्वात् यङ्लोपे रूपम्] ज्वालानां—शिखानां, सम्भारेण—समूहेन, भैरवः,—भीषणः, सर्व्वतोव्याप्तैरतीव भयावहैः जगल्लेहनलोलुपैः जिह्वाकल्पशिखासन्तानैः निरतिशयभीषणविग्रह इत्यर्थः। भगवान्—षडैश्वर्य्यशाली। उषर्बुधः,—अग्निः, ("शोचिष्केश उषर्बुधः" इत्यग्निपर्य्याये अमरः) उषसि—सन्ध्यायाम्, ("उषः प्रभाते सन्ध्यायाम्" इति विश्वः) बुध्यते—प्रकाशते, यतः आहिताग्नयो हि अग्निमुषसि प्रादुष्कुर्व्वन्ति, इति व्युत्पत्त्या, [उष उपपदात् बुध्यते इत्यस्य, "इगुपध—" (३।१।१३५ पा०) इति कर्त्तरि कः, "अहरादीनां पत्यादिषु वा रेफः" (वा०) इति रेफश्च] अस्य—अग्नेः। सर्व्वतः,—

विद्याधरी। दिट्ठिआ एदेण विमलमोत्तिअफलसीदलसिणिद्धमसिणसोवाणमंसलेण णाहदेहप्फंसेण आणंदमंदमुउलिदघुण्णंतलोअणाए मे अंदरिदो ज्जेव संदावो। * (झ)

विद्याधरः। अयि! किमत्र मया कृतम्? (ञ) अथवा—

---

* दिष्ट्या एतेन विमलमौक्तिकफलशीतलस्निग्धमसृणसोपानमांसलेन नाथदेहस्पर्शेन आनन्दमन्दमुकुलितघूर्णल्लोचनाया मे अन्तरित एव सन्तापः।

समन्तात्। प्रचण्डः,—भीषणः, सुदुःसहः इत्यर्थः। सन्तापः,—दाहकारकः उग्राग्निः, प्रसरतीति शेषः। तत्—तस्मात्, दाहकारकत्वादित्यर्थः; दग्धीभवनभयादिति भावः। प्रियां—पत्नीं विद्याधरीम्। अङ्गेन—स्वदेहेन। आच्छाद्य—आवृत्य, गोपायित्वेति यावत्। दूरं—विप्रकृष्टप्रदेशं, सन्तापविरहितं स्थानमिति यावत्। अपसरामि—यामि; यथाऽयं प्रबलः तापः प्रियायाः कोमलं गात्रं स्प्रष्टुं न शक्नोति, तथा करोमि इति भावः; तूर्णं पलाय्य स्थानान्तरं यामीत्याशयः।

(झ) विमलेति।—[मौक्तिकं—मुक्ता एवेत्यर्थे स्वार्थे ठक्, तच्च फलमिवेति उपमितसमासः] विमलं—विशुद्धं, यत् मौक्तिकफलं—मुक्ताफलं, तद्वत् शीतलः,—शैत्यजनकः, स्निग्धः,—स्नेहयुक्तः, सुखस्पर्श इत्यर्थः, मसृणः,—श्लक्ष्णः, चिक्कण इत्यर्थः, सोपानमांसलश्च—सोपानम्—आरोहणसाधनं, तद्वत् मांसलः,—बलवान्, दृढ इत्यर्थः, ("बलवान् मांसलोंऽसलः" इत्यमरः) प्रस्तरादिमयसोपानसमदृढ इत्यर्थः, तेन; तद्वदनुभूयमानेनेति भावः। ["उपमानानि सामान्यवचनैः" (२।१।५५ पा०) इति उपमानसमासः] नाथस्य—प्रियतमस्य, देहस्य—शरीरस्य, स्पर्शेन—समाश्लेषेणेति यावत्। आनन्देन—हर्षेण, मन्दम्—ईषत् यथा स्यात्तथा, मुकुलिते—मुद्रिते, घूर्णन्ती—परिभ्राम्यती, समन्तात् प्रचलिते इत्यर्थः, लोचने—नयने यस्याः तथाविधायाः, आनन्दोपभोगवशात् अत्यल्पविकसितविलोलविलोचनाया इत्यर्थः, सन्तापः,—अग्निजः संज्वर इत्यर्थः, अन्तरितः,—दूरीकृतः। [अन्तरशब्दात् "तत्करोति—" (ग०) इति णिचि कर्मणि क्तः]।

(ञ) अयि!—इति कोमलसम्बोधने। अत्र—सन्तापप्रशमविधौ। मया किं कृतम्?—न किमप्यनुष्ठितमित्यर्थः; केवलं त्वया निरुपमप्रेम्णा इत्थमनिर्वचनीयं सुखमनुभूयते इति भावः।

अकिञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः॥ ५॥

विद्याधरी। कहं अविरलविलोलघुसंतविज्जुल्लदाविलासमंडिदेहिं मत्तमोरकंठसामलेहिं ओत्थरीअदि णहत्थलं जलहरेहिं?। * (ट)

विद्याधरः। हन्त! हन्त! कुमारलवप्रयुक्तवारुणास्त्रप्रभावः खलु अयम्। कथमविरलप्रवृत्तवारिधारासहस्रसम्पातैः प्रशान्तं पावकास्त्रम्!! (ठ)

---

* कथमविरलविलोलघूर्णद्विद्युल्लताविलासमण्डितैर्मत्तमयूरकण्ठश्यामलैरास्तीर्यते नभस्तलं जलधरैः?

अकिञ्चिदिति।—द्वितीयेऽङ्के १६३ पृष्ठायां श्लोकोऽयं व्याख्यातः॥ ५॥

(ट) अविरलेति।—अविरलं—सततं, विलोलानां—चञ्चलानां, घूर्णन्तीनां—कुत्रचित् स्थैर्यमलभमानानां, विद्युल्लतानां—तडिद्दाम्नां, विलासेन—विकासेन, मण्डितैः,—भूषितैः, सततं स्फुरितैः चपलैः विद्युद्दामभिरुपशोभितैरित्यर्थः। मत्तानां—मदोन्मादितानां, यवीयसामित्यर्थः, मयूराणां—बर्हिणां, कण्ठा इव—ग्रीवाभागा इव, श्यामलाः,—मेचकाः, नीलवर्णाः इत्यर्थः, तैः। जलधरैः,—मेघपटलैः, विद्युद्विकाशयुक्तनीलनिविड़वारिदसमूहैरिति समुदितार्थः। नभस्तलं—गगनम्। आस्तीर्यते—आच्छाद्यते। कथं हि अकाले समुदयमानाः विद्युद्दामदेदीप्यमानाः तोयदा वियदाच्छन्तीति समुदितवाक्यार्थः।

(ठ) हन्त—हर्षार्थकमव्ययम्, [आनन्दाऽऽतिशय्यद्योतनाय द्विरावृत्तम्]। कुमारेति।—कुमारेण—बालेन, लवेन, प्रयुक्तस्य—मुक्तस्य; चन्द्रकेतुप्रयुक्तस्य आग्नेयास्त्रस्य समूलमुपघातायेति भावः; वारुणास्त्रस्य—वरुणदेवताकस्य आयुधविशेषस्य, प्रभावः,—सामर्थ्यं, प्रसर इत्यर्थः; अयं हि नवजलधरपटलप्रतीकाशानां लवास्त्राणां विकाशः परिलक्ष्यते इति भावः। अविरलेति।—अविरलम्—अनारतं, प्रवृत्तानाम्—उत्सर्जननिरतानामित्यर्थः, वारिधारासहस्राणां—संख्यातुमशक्यानां वर्षणप्रवाहाणां, सम्पातैः,—प्रपतनैः, मोचनैरित्यर्थः; असंख्येयैः प्रवृष्टाम्बुभिरिति भावः। पावकास्त्रम्—आग्नेयमस्त्रं, चन्द्रकेतोरिति भावः। प्रशान्तं—निवारितम्; वारुणास्त्रसम्भूतवारिधाराभिः सपदि तत् निर्व्वापितमिति भावः।

विद्याधरी। पिअं मे पिअं मे। * (ड)

विद्याधरः। हन्त! हन्त! भो भोः! सर्वमतिमात्रं दोषाय, यत् प्रबलवातावलिक्षोभगम्भीरगुणगुणायमानमेघमेदुरान्धकारनीरन्ध्रनिबद्धम् एकवारविश्वग्रसनविकटविकरालकालकण्ठमुखकन्दरविवर्त्तमानमिव युगान्तयोगनिद्रानिरुद्धसर्वद्वारनारायणोदरनिविष्टमिव भूतजातं प्रवेपते। साधु वत्स चन्द्रकेतो! साधु, स्थाने वायव्यास्त्रमीरितम्। (ढ) यतः,—

---

* प्रियं मे प्रियं मे।

(ड) प्रियं—प्रीतिकरम्; निखिलजगत्सन्तापनिवारकतया ममापि च दाहजक्लेशोपशमकतया निरतिशयहर्षसंविधायकम् एतत् प्रावकास्त्रमिति भावः। [आनन्दातिशय्यद्योतनाय द्विर्भावः]।

(ढ) अथ वारुणास्त्रेण पावकप्रसरोपरोधेऽपि तत्प्रयोगक्षतकल्पान्तवलाहकाऽऽविर्भावकालिकभीषणान्धतमसोदयेन जगज्जनोपपीड़नमाशङ्क्य नितरां व्यथितचेताः तात्कालिकीं जागतिकीं समवस्थां विशिष्योपवर्णयति, हन्तेति।—हन्त—इति खेदेऽव्ययम्; [भीतिजनितसम्भ्रमातिशय्यद्योतनाय द्विरुक्तिः]। अतिमात्रम्—अतिशयितम्, [अतिक्रान्तो मात्रामिति विग्रहे, "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" (वा०) इति द्वितीयासमासः] सर्वं हि प्रमाणाधिकं वस्तु दोषाय सम्पद्यते इति भावः; "सर्व्वमत्यन्तगर्हितम्" इत्यादिवचनादित्याशयः। तदेवोपवर्णयति, यदिति।—यत्—यतः। प्रबलानाम्—उच्छृङ्खलं प्रवहन्तीनां, भयावहानामित्यर्थः, वातावलीनां—वात्यानां, मारुतसमूहानामित्यर्थः, क्षोभेण—अभिघातेन, समन्तात् सञ्चालनेनेति यावत्, गम्भीरं—मन्द्रं यथा स्यात्तथा, गुणगुणायमानाः,—गुणगुण इति अव्यक्तं भीषणं निनादं कुर्व्वन्तः, ["अव्यक्तानुकरणात्" (५।४।५७ पा०) इति गुणशब्दात् डाचि, "डाचि विवक्षिते द्वे" (वा०) इति द्वित्वे, अगुणं गुणं कुर्व्वन्त इत्यर्थे, गुणगुणा इति स्वरूपात् "लोहितादिडाज्भ्यः क्यष्" (३।१।१३ पा०) इति अभूततद्भावार्थे क्यषि गुणगुणाय इति नामधातोः शानचि सिद्धम्] ये मेघाः,—पयोधराः, तैः मेदुरः,—स्निग्धः, निविड़ इत्यर्थः, यः अन्धकारः,—ध्वान्तं, तेन नीरन्ध्रं—निरवकाशं यथा स्यात्तथा, निबद्धं—निबद्धम्, आवृतमित्यर्थः। तद्भीदानीमुत्प्रेक्ष्यते, एकेति।—एकेन वारेण—एकदैवेत्यर्थः, एकेनैव प्रयत्नेनेति यावत्, विश्वस्य—जगतः, यत् ग्रसनं—ग्रासः, कवलीकरणमित्यर्थः, तस्मै

विद्याकल्पेन मरुता मेघानां भूयसामपि।
ब्रह्मणेव विवर्त्तानां क्वापि विप्रलयः कृतः॥ ६॥

तस्मिन् वा विकटः,—तदर्थं विस्फारितः इत्यर्थः, ("विकच" इति पाठान्तरम्) विकरालः,—भयङ्करः, कालकण्ठस्य—नीलकण्ठस्य, जगत्संहर्त्तुमुद्यतस्य महेश्वरस्येत्यर्थः, यः मुखकन्दरः,—मुखगह्वरं, ("मुख" इत्यत्र "कण्ठ" इति पाठान्तरम्) तस्मिन् विवर्त्तमानमिव—विचेष्टमानमिव, निविशमानमिवेत्यर्थः; जगत्सञ्जिहीर्षोः व्यात्तवदनस्य शङ्करस्य मुखविवरमधिशयानमिवानुभूयमानम् इति भावः। अपिचोत्प्रेक्ष्यते, युगान्तेति।—युगान्ते—कल्पक्षये, प्रलये इत्यर्थः, यः योगः,—चित्तैकाग्रता, स निद्रा इव मनसः विषयान्तरव्यावृत्तिरूपः स्वाप इव; [इत्युपमितसमासः] तदानीं बहिरिन्द्रियवृत्तेरुपरोधादित्याशयः; तथा निरुद्धानि—निरुद्धीतानि, सर्वाणि द्वाराणि—विषयग्रहोपायभूतानि इन्द्रियाणि येन तादृशस्य, नारायणस्य—भगवतः विष्णोः, उदरे—कुक्षौ, निविष्टमिव—प्रविष्टमिव, महाप्रलये योगनिद्राभिभूते भगवति हरौ तच्छरीरे यथा हि जीवजातं निविशमानमास्ते, तथाऽधुनाऽपि सञ्जातमिवेति भावः। भूतजातं—प्राणिसमूहम्! प्रवेपते—कम्पते; वारुणास्त्राणां ब्रह्माण्डविनाशोद्यमदर्शनमियेति भावः। वातविक्षुब्धमेघमेदुरमम्बरमवलोक्य भूतजातं हि किं नु शङ्करः पुनः जगत्संहर्त्तुमुद्यतः, उत भगवतः नारायणस्य योगनिद्रासमयोऽयं समुपस्थितः इति विभावयत् नितरामुद्विजते इति समुदितवाक्यार्थः। अथेदानीं वायव्यास्त्रसम्प्रयोगदर्शनेन समरकुशलिनं चन्द्रकेतुं प्रशंसति, साध्विति।—साधु—समीचीनमनुष्ठितमिति भावः। •[हर्षातिशये द्विर्वचनम्]। स्थाने—युक्तम्। ("युक्ते द्वे साम्प्रतं स्थाने" इत्यमरः)। वायव्यास्त्रं—वायुदेवतनायुधम्। ईरितं—प्रयुक्तम्; जगद्व्यथाभुद्गतस्य लवोन्मुक्तवारुणास्त्रस्य निरसनार्थमिति भावः।

जगद्बाधामपनेतुमभ्युद्यतस्य चन्द्रकेतोः वायव्यास्त्रप्रयोगकौशलमुपवर्णयति, विद्येति।—विद्याकल्पेन ब्रह्मज्ञानसदृशेन, "विद्ययाऽमृतमश्नुते" (ईशोपनिषत् ११ श्लो०) मरुता चन्द्रकेतुप्रयुक्तवायव्यास्त्रेणेत्यर्थः, अत्र मरुत्पदं सामान्येन प्रयुक्तमपि लक्षणया विशेषपरत्वमवसेयम्; वायव्यास्त्रप्रवर्त्तितवायुना वा, भूयसामपि बहुतराणामपि, असंख्येयानामपीत्यर्थः, मेघानां वारुणास्त्राणां प्रयोगात् समुदितजलधराणां, विवर्त्तानां दोषवशात् विलक्षणाकारेण मायाकार्य्याणां प्रपञ्चानां, भ्रमभूतानां जगतामित्यर्थः, "कारणात् विषमसत्ताकतया उत्पद्यमानं कार्य्यं हि विवर्त्तः" इति वैदान्तिकाः, "बालान् प्रति विवर्त्तोऽयं ब्रह्मणः सकलं जगत्। अविवर्त्तितमानन्दमास्थिताः कृतिनः

विद्याधरी। णाह! को दाणिं एसो ससंभमुक्खित्तकरब्भमिदपट्टंचलो दूरदो ज्जेब महुरवअणपड़िसिद्धजुज्झवावारो एदाणं कुमाराणं अंतरम्मि बिमाणवरं ओदरावेदि? * (ण)

---

* नाथ! क इदानीमेष ससम्भ्रमोत्क्षिप्तकरभ्रमितपट्टकाञ्चलो दूरत एव मधुरवचनप्रतिषिद्धयुद्धव्यापार एतयोः कुमारयोः अन्तरे विमानवरमवतारयति?

सदा॥" इति। (वेदान्तसिद्धान्तमुक्तावली ३२३ पृ०) ब्रह्मणि इव अद्वितीये चिन्मये परमात्मनि इव, "यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व तद्ब्रह्म" इति श्रुतेः; क्वापि कुत्रापि, अलक्षितप्रदेशे इत्यर्थः; अकस्मात् सम्भूततया किं वृत्तमिति कैरपि अलक्ष्यमाणत्वादिति भावः; विप्रलयः ध्वंसः, कृतः सम्पादितः, अचिरादेव तेषां नाशः संसाधित इत्यर्थः; यथा हि ब्रह्मैव सत्यं तद्व्यतिरिक्तञ्च सर्व्वमसत्यमित्याकारकं तत्त्वज्ञानं उपनिषच्छास्त्राध्ययनेन समुदितं सत् सपद्येव घटपटादिविश्वप्रपञ्चान् ब्रह्मणि विलापयति, ब्रह्मविद्यया ब्रह्मज्ञस्य जगत्प्रपञ्चज्ञानस्य सर्व्वथैव निराकरणात् केवलाच्च सच्चिद् ब्रह्ममयत्वज्ञानस्यैवोदयात् "तमेवं विदित्वा" "विद्ययाऽमृतमश्नुते" इत्यादिश्रुतिभिः मोक्षस्यैवोपदेशात्, तथैव वायव्यास्त्रविलासस्याविर्भावेण वारुणास्त्रविलसितं त्वरितमेव दूरीभूतमभूदिति भावः। [अत्र विवर्त्तैः सह मेघानामवैधर्म्यसाम्योक्तेः श्रौतो उपमाऽलङ्कारः विद्याकल्पेनेत्यार्थ्या उपमया सङ्कीर्य्यते]॥ ६॥

(ण) ससम्भ्रमेति।—ससम्भ्रमं—सत्वरम्, उत्क्षिप्तः,—ऊर्द्ध्वं नीतः, यः करः,—हस्तः, तेन भ्रमितः,—विघूर्णितः, परितः सञ्चालितः इत्यर्थः, पट्टकस्य—क्षौमप्रावारकस्य, अञ्चलः,—प्रान्तभागः येन तथोक्तः, अतिदूरदेशात् सङ्केतेन युद्धक्रियानिवारणाय कुमारयोर्दृष्ट्याकर्षणार्थं सव्यग्रमुत्क्षिप्तेन बाहुना वसनाञ्चलमूर्द्ध्वं घूर्णयन् इत्यर्थः। अपिच दूरतः एव—विप्रकृष्टदेशादेव। मधुरवचनैः,—प्रेमपूर्णाभिः हृदयग्राहिणीभिश्च वाग्भिः, प्रतिषिद्धः,—निवारितः, युद्धव्यापारः,—कुमारयोः सङ्ग्रामक्रिया येन तथाविधः; मधुरैः वचोभिरेव प्रबलसङ्ग्रामस्य प्रतिषिद्धा इति भावः। क एषः,—कोऽयं महापुरुषः। इदानीम्—अधुना। कुमारयोः,—लवचन्द्रकेत्वोः। अन्तरे—मध्यदेशे। विमानवरं—पुष्पकाख्यं व्योमयानश्रेष्ठम्। अवतारयति—अवरोपयति, स्थापयतीत्यर्थः।

विद्याधरः । [दृष्ट्वा] । एष शम्बूकवधात् प्रतिनिवृत्तो रघुपतिः । (त)—

शब्दं महापुरुषसंविहितं निशम्य
तद्गौरवात् समुपसंहृतसम्प्रहारः ।
शान्तो लवः, प्रणत एव च चन्द्रकेतुः
कल्याणमस्तु सुतसङ्गमनेन राज्ञः ॥ ७ ॥

[इति निष्क्रान्तौ । विष्कम्भकः] । (थ)

(त) शम्बूकेति ।—शम्बूकस्य—तदाख्यस्य जनस्थाने तपस्यतः वृषलस्य, वधात्—विनाशात्, तद्धननं संसाध्येत्यर्थः । ["ल्यब्लोपे कर्मण्यधिकरणे च" (वा०) इति पञ्चमी] प्रतिनिवृत्तः,—प्रत्यागतः । रघुपतिः एषः,—रघुश्रेष्ठः रामभद्रः खल्वयम् ।

अथेदानीं पूज्येष्वनुरागात् प्रह्वयोः कुमारयोः युद्धविरतिमुपवर्णयन्, शुभाशंसनपुरःसरं स्वकथामुपसंहरति, शब्दमिति ।—महता गुणग्रामविभूषितेनेत्यर्थः, पुरुषेण पुंसा, रामेणेत्यर्थः, संविहितं प्रयुक्तं, समुच्चरितमित्यर्थः, [संवि-दधातेः प्रयोगात् अस्यावश्यकरणीयत्वम्, अकरणे च प्रत्यवायभूयिष्ठमावेदितमिति ज्ञेयम्] शब्दं रणात् युवां विरमतमित्येवं निषेधकं वचनं, निशम्य समाकर्ण्य, तद्गौरवात् तस्मिन् गुरौ रामे समधिकादरात्, रामवाक्ये समधिकश्रद्धावशात् इत्यर्थः, समुपसंहृतः सम्यक्तया परित्यक्तः, सम्प्रहारः समरव्यापारः येन तथाविधः, युद्धव्यवसायाद्विनिवृत्तः इत्यर्थः, लवः शान्तः शममाश्रितः, चन्द्रकेतुश्च प्रणत एव प्रणामक्रियायां प्रवृत्त एव, अधुना, सुतसङ्गमनेन सुतयोः कुशलवयोः समागमेन, ताभ्यां सह सम्मेलनेनेत्यर्थः, राज्ञः रामस्य, कल्याणं शुभम्, अस्तु भवतु । [अत्र लवचन्द्रकेत्वोः युद्धकालिकक्रोधोद्धत्यादेः प्रशमेन रामविषयकरतिभावस्योदयात् समाहितालङ्कारः] । वसन्ततिलकं वृत्तम् ॥ ७ ॥

(थ) मध्यमाभ्यां पात्राभ्यां विद्याधरजायापतीभ्यां सम्प्रयोजितत्वेनास्य विष्कम्भकस्य शुद्धत्वं ज्ञेयम ; वृत्तानां समरव्यापाराणां वर्त्तिष्यमाणानाञ्च सुतसमागमरूपाणां कथांशानां सङ्क्षेपतश्चात्राङ्कादावेव निर्द्दिष्टत्वात् अस्य तल्लक्षणाक्रान्तत्वम् इति, तदुक्तं दर्पणकृता—"वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः । सङ्क्षिप्तार्थस्तु विष्कम्भः आदावङ्कस्य दर्शितः । मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः । शुद्धः स्यात्—" इति ।

[ततः प्रविशति रामो लवः प्रणतश्चन्द्रकेतुश्च] ।

रामः । [पुष्पकादवतरन्] ।—

दिनकरकुलचन्द्र ! चन्द्रकेतो !
सरभसमेहि दृढं परिष्वजस्व ।
तुहिनशकलशीतलैस्तवाङ्गैः
शममुपयातु ममापि चित्तदाहः ॥ ८ ॥

अथ वात्सल्यनिधिः भगवान् रामभद्रः पुष्पकविमानादवतीर्य्यैव पुत्रप्रतिमस्य चन्द्रकेतोः समाश्लेषेण सुचिरसीताविरहनिर्दग्धं स्वमानसं सुस्निग्धीकर्त्तुमभिप्रेत्य आह, दिनकरेति ।—दिनकरस्य सूर्य्यस्य, कुलं वंशः, तस्य चन्द्र इव चन्द्रसदृशः आह्लादकर इत्यर्थः, तत्सम्बोधने; हिमांशुः यथा सुधामयैः किरणैः प्रचण्डतापसन्तप्तानि जगन्ति सुस्निग्धानि करोति, तथा त्वमपि सुचिराऽऽधिसन्तप्तस्य वैवस्वतकुलस्य सन्तर्पयिता असीति भावः; सूर्य्यवंशानन्दवर्द्धन ! इति फलितम्; चन्द्रकेतो ! सरभसं रभसेन वेगेन सह वर्त्तमानं यथा तथा, सत्वरमिति यावत्, ("रभसो वेगहर्षयोः" इति विश्वः) एहि आगच्छ, दृढं कठोरं, निर्द्दयमिति यावत्, परिष्वजस्व समालिङ्ग, मामिति शेषः, तुहिनस्य तुषारस्य, यानि शकलानि खण्डानि, तद्वत् शीतलानि स्निग्धानि, सन्तापहारकाणीत्यर्थः तैः, तवाङ्गैः तव शरीरैः, चन्द्रसाम्यसुसङ्गतार्थं तुहिनशकलसुखायमानत्वमङ्गानामुक्तमिति ज्ञेयम्; पुत्रिणो हि तथैव पुत्राङ्गसंश्लेषजसुखमनुभवन्तीत्याशयात्; ममापि चित्तदाहः चित्तस्य हृदयस्य, दाहः सन्तापः; सुदीर्घसीताविरहक्षतः इति भावः; शमं शान्तिम्, उपयातु प्राप्नोतु, साकल्येन निर्वात्वित्यर्थः, येन सीताविरहजदुःखस्य कुत्रापि शान्तिर्न लब्धा, तादृशस्य निदारुणसन्तप्तस्यापि इत्यपिकारार्थः; यद्वा—न केवलं मम त्वं चित्तदाहहारकोऽसि, अपि तु सर्व्वस्यैवेत्यपिकारार्थः, तथाहि, यतस्त्वं वैवस्वतकुलसन्तापशामकोऽसि, अत एव नूनं तदीयाङ्गसंस्पर्शेन मम सीताविरहनिबन्धनः निरतिशयः सन्तापः सर्व्वथैवापनीतः भविष्यतीति निगूढाशयः; यद्वा—अपि भिन्नक्रमे, चित्तदाहोऽपीत्यन्वयः; यथा तवाङ्गसंस्पर्शेन शरीरदाहः सर्व्वथैव निर्वाणतामधिगच्छति, चित्तदाहोऽपि तथैव उपशाम्यतु, इत्यपिकारलब्धपर्य्यवसितार्थः । [अत्र शरीरमात्रसन्तापहारकात् उपमानभूतात् चन्द्रात् उपमेयभूतस्य चन्द्रकेतोः चित्तशरीरोभयदाहप्रशामकतया आधिक्यप्रतीतेः व्यतिरेकालङ्कारः, तदङ्गत्वौपम्यमत्र समासगततया आर्थम् इति ज्ञेयम्, अपिच दिनकरस्य कुले चन्द्रोदयस्यायोगेना-

चन्द्रकेतुः। अभिवादये।

रामः। [उत्थाप्य सस्नेहास्रं परिष्वज्य]। अपि नाम कुशलं तव दिव्यास्त्रधरदेहस्य ? (द)

चन्द्रकेतुः। कुशलमत्यद्भुतक्रियस्य प्रियदर्शनस्य लवस्य लाभाभ्युदयेन। तद्विज्ञापयामि, मामिव अविशेषेण मत्तः शिवतरेण चक्षुषा पश्यतु अमुं महावीरप्रकाण्डं तातः। (ध)

हेतुकस्य तव तत्सम्बन्धस्योत्कीर्तनात् विभावनाऽलङ्कारः प्रोक्तव्यतिरेकेणाङ्गाङ्गिभावतया संस्थितेः सङ्कीर्यते, किञ्च, "चन्द्र चन्द्र" इत्यत्र मुख्यतरस्य प्रातिपदिकांशधीत्यधर्मिरूपस्य चन्द्रस्य अभिन्नार्थत्वात् लाटानुप्रासालङ्कारः प्रोक्ताभ्यामनयोरलङ्काराभ्यां निरपेक्षतया संस्थितेः संसृज्यते]। पुष्पिताग्रा वृत्तम् ॥ ८ ॥

(द) उत्थाप्य—प्रणतं चन्द्रकेतुमुत्तोल्येत्यर्थः। सस्नेहास्रं—स्नेहजनितं—वात्सल्यातिरेकात् समुद्भूतं, यत् अस्रम्—अश्रु, नेत्रसलिलमित्यर्थः, तेन सह वर्त्तमानं यथा स्यात् तथा; यद्वा—स्नेहेन सह वर्त्तमानं यत् तत् सस्नेहं, तथाभूतम् अस्रं यस्मिन् कर्म्मणि तद्यथा स्यात्तथा, वात्सल्याविर्भावविवशहृदयतया अनियतधाराभिः आनन्दजाश्रुविमोक्षपुरःसरमित्यर्थः। परिष्वज्य—सुदृढं समालिङ्ग्य। अपि—प्रश्ने। नाम—सम्भावनायाम्। दिव्येति।—धरतीति धरः, [पचाद्यच्] दिव्यानि यानि अस्त्राणि, तेषां धरः,—धारकः, देहः यस्य तथोक्तस्य, अलौकिकास्त्रपञ्जोपशोभिशरीरस्येत्यर्थः। तव कुशलम् ?—शुभं ते ? इत्याशीर्व्वचनम्। ["चतुर्थी चाशिष्य—" (२।३।७३ पा०) इति पाक्षिकी षष्ठी]।

(ध) अत्यद्भुता—अलौकिकी, क्रिया—युद्धव्यापारः यस्य तस्य, एकेन बालकेन अनेकैः वीरैः सह युगपत् युद्धकरणात् अतिविस्मयावहसङ्ग्रामव्यापारस्येत्यर्थः। प्रियं—प्रीतिकरं, दर्शनं—वीक्षणं यस्य तस्य, निसर्गसौम्यमूर्त्तेरित्यर्थः। लाभः एव—प्राप्तिरेव, एतेन सह समागम एवेत्यर्थः, अभ्युदयः—सम्पत् तेन। कुशलं, वर्त्तते ममेति शेषः; सौभाग्यवशात् अमुं मित्रतया सम्प्राप्य अहमात्मानं कुशलिनं मन्ये इति भावः। तत्—अत एव। विज्ञापयामि—प्रार्थये। मत्तः अविशेषेण—मत्तः अपृथक्तया, मदनधिकतया इत्यर्थो वा। [मत्तः इति पञ्चम्यास्तसिल् "पञ्चमी विभक्तेः" (२।३।४२ पा०) इति पञ्चमी। अविशेषेणेति "प्रकृत्यादिभ्य उपसंख्यानम्" (वा०) इति तृतीया]। शिवतरेण—निरतिशयशुभेन, स्नेहप्रचुरेणेत्यर्थः।

रामः। [लवं निरूप्य]। दिष्ट्या अतिकल्याणाकृतिरयं वयस्यो वत्सस्य। (न)—

त्रातुं लोकानिव परिणतः कायवानस्त्रवेदः
क्षात्त्रो धर्मः श्रित इव तनुं ब्रह्मकोश(षो)स्य गुप्तैर।

चक्षुषा वीक्षणेन, दृष्टिपातेनेत्यर्थः। ("नामिव अविशेषेण मत्तः शिवतरेण चक्षुषा" इत्यत्र "नामिव विशेषेण वा मत्तः शिवेन चक्षुषा" इति पाठान्तरम्)। महावीरप्रकाण्डं—महान्तः ये वीराः, तेषु प्रकाण्डं—प्रधानं, महावीरशिरः-शेखरायमाणमित्यर्थः। [निर्द्धारे सप्तमीसमासः। यद्वा—प्रशस्तो महावीरः इत्यर्थक-विग्रहे महावीरप्रकाण्डं "प्रशंसावचनैश्च" (२।१।६६ पा०) इति नित्यसमासः। ननु प्रकाण्डशब्दस्य अमरमते नित्यनपुंसकत्वेन "अमुम्" इति विशेषणस्य "अदः" इत्येवमेव भवितुं युक्तम्, एवाचाख्यानुशासनहीनतया अत्र च्युतसंस्कारताऽऽख्यदोष इति ; तथाहि अमरः,—"मतल्लिका मचर्चिका प्रकाण्डमुद्घतल्लजौ" इति ; अत एव अन्येन लिङ्गेन सामानाधिकरण्येऽपि नाघेनास्य स्वलिङ्गता न परित्यक्ता ; तथाहि—"ऐचिष्ट विग्रुदंनुजप्रकाण्डम्" इति चेन्न ; मेदिनीकरेण तु अस्य पुंस्त्वस्यापि उद्घोषितत्वात्, तथाहि—"प्रकाण्डो न स्त्री विटपे मूलशाखान्तरे तरोः। शस्ते" इति। एवं रभसेनापि "अस्त्री प्रकाण्डो विटपे तरुस्कन्धप्रशस्तयोः।" इति। शाश्वतस्तु केवलं पुंस्त्वमेवास्याभिहितवान्, तथाहि—"प्रकाण्डो विटपे शस्ते मूल-स्कन्धान्तरे तरोः।" इति। अत एव भट्टिना "विरराच प्रकाण्डकौ" इत्युक्तमिति दिक्। अन्ये तु अमरमतेऽपि अमुमिति पदं विशेष्यतया स्वीकृत्य महावीरप्रकाण्डञ्च विशेषणतया परिगृह्य प्रोक्तदोषोद्धार इति वदन्ति, तथाऽपि विशेषणस्य सर्वनाम्नः विशेष्यपदसन्निधाने विशेष्यविधया भाणं नितान्तमेवासङ्गतमिति मन्यामहे।

(न) अतीति।—अतिकल्याणी—अतीवशुभावहा, आकृतिः,—मूर्त्तिः यस्य सः, निरतिशयमङ्गलमूर्त्तिरित्यर्थः।

बालस्य लवस्य मङ्गलमूर्त्तिमयत्वं विशिष्योपपादयति, त्रातुमिति।—लोकान् जगन्ति, त्रातुं रक्षितुं, कायवान् शरीरी, शरीरिरूपेणेत्यर्थः, परिणतः अवस्थान्तरं गतः, भवेभ्यः लोकान् संरक्षितुं कृतमूर्त्तिपरिग्रहः इत्यर्थः, अस्त्रवेद इव धनुर्वेद इव, धनुर्विद्या लोकसंरक्षणार्थैवेदानीं मूर्त्तिं परिगृह्य समुदिता इवेत्युत्प्रेक्षा ; तथा ब्रह्म एव वेद एव, ब्राह्मण एव वा, कोषः रत्नौघः, तस्य गुप्तैर रक्षणाय ; यद्वा—ब्रह्म एव कोषः रत्नागारः, तस्य गुप्तैर, वेदार्थराशिरूपरत्नौघरक्षायै, वेदरूपामूल्य-

सामर्थ्यानामिव समुदयः सञ्चयो वा गुणानाम्
आविर्भूय स्थित इव जगत्पुण्यनिर्माणराशिः ॥ ९ ॥

लवः। अहो! पुण्यानुभावदर्शनोऽयं (प) महापुरुषः।—

आश्वासस्नेहभक्तीनामेकमालम्बनं महत्।
प्रकृष्टस्येव धर्मस्य प्रसादो मूर्त्तिसञ्चरः ॥ १० ॥

रत्नभाण्डाररक्षणाय वा, तनुं शरीरं, श्रितः आश्रितः, अङ्गीकृत इत्यर्थः, क्षात्त्रः क्षत्त्रियजातिसम्बन्धी, धर्म्मः इव शौर्य्यादिगुणगणः इव, वेदरूपरत्नभाण्डाराणां ब्राह्मणानां स्नातकानां वा तदुपघातकपामरजनेभ्यः रक्षार्थे एव गृहीतविग्रहा क्षत्त्रियत्वजातिरेवायमित्युत्प्रेक्षा ; तथा सामर्थ्यानां वीरधर्म्माणां विक्रमाणां, समुदयः इव राशिरिव, गुणानां दयादाक्षिण्यादीनां, सञ्चयो वा समवाय इव, वाशब्दश्चात्र इवार्थे, ("इववत् वायथाशब्दौ" इत्युक्तेः) तथा आविर्भूय मूर्त्तिमाश्रित्य, स्थितः विद्यमानः, मूर्त्तिमानित्यर्थः, जगतां त्रिलोक्याः, पुण्यानां विधिवदनुष्ठितशुभावह-कर्म्मफलभूतानां धर्म्माणां, निर्म्माणानि सृष्टयः तेषाम्, अत्र भावप्रधाननिर्द्देशात् निर्म्मितपुण्यानामित्यर्थः, कृदभिहितो भावः द्रव्यवत्प्रकाशते इति न्यायात् ; राशिरिव सङ्घात इव, "अयम्" इति चूर्णकस्थेनास्यान्वयः ; जगज्जनैः अनुष्ठितानां शुभावह-कर्म्मणां यानि पुण्यफलानि, तान्येवैकत्र सङ्गीभूय समुदित इवेत्युत्प्रेक्षा, प्रागुपा-त्तोत्प्रेक्षाद्वयेनास्य निरतिशयवीर्य्यशालित्वम् अप्रधृष्यत्वञ्च, अन्तिमोत्प्रेक्षाद्वयेन च गुणग्रामविभूषितत्वं धार्म्मिकत्वञ्च प्रतिपादितमिति ज्ञेयम्। [अत्रोपमेयभूतस्य चूर्णकस्थेदंशब्दप्रतिपाद्यस्य लवस्य उपमानभूतास्त्रवेद-क्षात्त्रधर्म्म-सामर्थ्यसमुदय-गुण-सञ्चय-पुण्यनिर्म्माणराशिरूपत्वेन सम्भावनात् पञ्चोत्प्रेक्षाऽलङ्काराः, सजातीयानाञ्चैतासां परस्परसापेक्षतया संस्थितेः सङ्करः]। मन्दाक्रान्ता वृत्तम् ॥ ९ ॥

(प) पुण्येति।—पुण्यः,—पवित्रः, अनुभावः,—तेजोविशेषः, दर्शनम्—अव-लोकनञ्च यस्य सः ; पवित्रतेजःपुञ्जधरस्यास्य महापुरुषस्य दर्शनेन सर्वेषामेव पुण्यं सञ्जायतेऽइति भावः।

पुण्यमूर्त्तित्वमेव विशिष्य उपपादयति. आश्वासेति।—आश्वासः समाश्वासनं, विपन्नेभ्यः अभयदानमिति यावत्. स्नेहः वात्सल्यं, भक्तिः पूज्येषु अनुरागः, तासामेकम् अद्वितीयम्, अप्रतिममिति यावत्, महत् सर्व्वतोऽधिकम्, आलम्बनम् आश्रयः, पात्रमित्यर्थः, अयं महापुरुषः इति चूर्णकेनान्वयः, अस्मिन् महापुरुषे दयावात्सल्यभक्तिप्रभृतयः गुणनिचयाः पूर्णतया विद्यन्ते इति भावः ; निसर्ग-

आश्चर्य्यम् !!—

विरोधो विश्रान्तः, प्रसरति रसो निर्वृतिघन-
स्तदौद्धत्यं क्वापि व्रजति, विनयः प्रह्वयति माम्।
झटित्यस्मिन् दृष्टे किमपि परवानस्मि, यदि वा
महार्घस्तीर्थानामिव हि महतां कोऽप्यतिशयः ॥११॥

सौम्येनाकारेण महापुरुषोऽयं दर्शकानां मनांसि प्रीत्यार्द्राणि भक्तिविनम्राणि च कुर्वन् आश्चर्य्याणि करोति, विपन्नानामाश्रयप्रदः, आश्रितानाञ्च परिरक्षकः, गुरुजन-सेवकश्चायमिति निसर्गसौम्यमूर्त्तिरेवास्य सूचयतीति वा तात्पर्य्यम्। अतः, प्रकृष्टस्य सर्व्वोत्तमस्य, धर्म्मस्य पुण्यस्य, मूर्त्त्या शरीरेण, सञ्चरते भ्रमति यः तादृशः; मूर्त्तिमानिति भावः; प्रसादः इव प्रसन्नभावः इव, अनुग्रह इव इत्युत्प्रेक्षा, स्थित इति शेषः; शरीरी प्रसन्नः प्रकृष्टः धर्म्म इवायमिति भावः; विशुद्धधर्म्मफलं वा शरीरं स्वीकृत्यैवात्र समुदितमिवेति तात्पर्य्यम्। [अत्र अमुष्य महापुरुषस्य प्रकृतस्य धर्म्मप्रसादरूपतया सम्भावनात् उत्प्रेक्षाऽलङ्कारः] ॥ १० ॥

अथ प्रोक्तोत्प्रेक्षितार्थे विनिगमनां प्रदर्शयितुं तत्फलं विशिष्य विवृणोति, विरोध इति।—अस्मिन् महापुरुषे, दृष्टे नयनपथमापतिते सति, झटिति सहसा, विरोधः वैरं, विद्वेषः इति यावत्, विश्रान्तः निवृत्तः, दूरीभूतः अभूदित्यर्थः, प्रत्युत निर्वृत्या आनन्देन, घनः सान्द्रः, प्रीतिपूर्ण इति यावत्, रसः अनुरागः, प्रसरति आविर्भवति, तत् तथाविधम्, औद्धत्यं गर्व्वावेशजनितं चापल्यं, क्वापि कुत्रापि, व्रजति गच्छति, प्रलीयते इत्यर्थः, विनयः प्रश्रयः, विनीतत्वमित्यर्थः, गुरुजनसन्निधौ स्वापकर्ष-विधायिका नम्रतेति यावत्, मां प्रह्वयति अवनमयति; मां भक्तिविनम्रमूर्त्तिं करोतीति भावः; तेन हि, किमपि कुतोऽपि कारणात्, अनिर्वचनीय इति वा, परवान् पराधीनः, अस्मि भवामि; महात्मानममुं दृष्ट्वा अनिर्देश्यकारणेनाहमिदानीं नात्मनि प्रभवामि इति भावः; यदिवा अथवा, तीर्थानामिव पुण्यक्षेत्राणामिव, महतां महानुभवानां, कोऽपि अनिर्व्वचनीयस्वरूपः, महार्घः बहुमूल्यः, सामान्यजनैरुपलब्धु-मशक्य इत्यर्थः, महनीयः इति यावत्, अतिशयः उत्कर्षः, महिमातिरेक इति यावत्, हि खलु; अलौकिकमहिम्नां महीयसां महत्त्वातिरेकः मादृशाम् अनिर्व्वचनीयः एव, यद्वशात् विरोधिनामपि विरोधभावः प्रसभं शममुपैति, प्रत्युत तानन्तरा च शान्तिरस-प्रवाहः प्रवहति इति भावः। [अत्र महापुरुषस्य रामस्य महत्त्वप्रतिपादने एकस्मिन् विरोधोपशमरूपे कारणे सत्यपि निर्वृतिघनरसप्रसारादीनां हेत्वन्तराणा-

रामः। तत् किमेकपद एव दुःखविश्रामं ददाति उपस्नेहयति च कुतोऽपि निमित्तादन्तरात्मानम्, अथवा स्नेहश्च निमित्तसव्यपेक्ष इति विप्रतिषिद्धमेतत्। (फ)—

व्यतिषजति पदार्थानान्तरः कोऽपि हेतुः
न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते।

मुपादानात् समुच्चयालङ्कारः, तथा महत्सु च तीर्थानामवैधर्म्यसाम्योक्तेरुपमाऽलङ्कारः, किञ्च महापुरुषमहिमातिशयरूपेण सामान्येनार्थेन विरोधोपशमादिरूपस्य विशेषार्थस्य सोपपत्तिकत्वकरणादर्थान्तरन्यासालङ्कारश्च, एतेषाञ्च त्रयाणामन्योऽन्याङ्गाङ्गिभावतया संस्थितेः सङ्करः]। शिखरिणी वृत्तम्॥ ११॥

(फ) तदिति।—तत्—एतदित्यर्थः। किं—कथम्? एकपद एव—सद्य एव, दर्शनसमकालमेवेति यावत्। ("तत्क्षणैकपदे तुल्ये सद्यः सपदि च स्मृते।" इति हलायुधः) दुःखानां—सीताविरहजनितानां शोकसन्ततीनां, विश्रामम्—उपशमम्। ददाति—अर्पयति, मह्यमिति शेषः; सपदोव मम साकल्येन दुःखोपघातं विदधातीति भावः। तथा, कुतोऽपि अविज्ञातात्, निर्व्वक्तुमशक्यादित्यर्थः। निमित्तात्—कारणात्। अन्तरात्मानम्—अन्तःकरणं, मानसमित्यर्थः, ममेति शेषः। उपस्नेहयति—आर्द्रं करोति, वात्सल्यवशं विदधातीत्यर्थः, बालोऽयमिति शेषः। अत्र यत् इति पदमध्याहार्य्यम्; तेन च, दुःखविश्रामं ददाति, अन्तरात्मानमुपस्नेहयति च इति यत् तदेतत् कथमित्यर्थः। अथ स्नेहः अविज्ञातकारणादपि जायते इति पक्षान्तरमाह, अथवेति।—अथवा—पक्षान्तरे। स्नेहश्च—प्रणयः अपि, चकारः समुच्चये। व्यपेक्षया—अपेक्षया, सम्बन्धेनेति यावत्, सह वर्त्तते यः सः सव्यपेक्षः, —ससम्बन्धः, निमित्तेन—कारणेन, सव्यपेक्षः,—ससम्बन्धः, कारणसापेक्ष इत्यर्थः, न ह्ययं कारणनिरपेक्ष इति यावत; कुतश्चित् कारणादेव कस्यचित् कस्मिंश्चित् स्नेहः सञ्जायते इति भावः। इति—एतद्वचनम्। विप्रतिषिद्धं—विरुद्धम्, अप्रामाणिकमिति यावत्; कस्यचित् जनस्य कस्मिंश्चित् जने स्नेहप्रवृत्तिरहेतुकैव दृश्यते, सा हि तत्र किमपि बाह्यं निमित्तान्तरं नापेक्षते इत्याशयः।

स्नेहस्य बाह्यकारणानपेक्षित्वम् अर्थान्तरन्यासेन सोपपत्तिकं करोति, व्यतिषजतीति।—आन्तरः अन्तर्वर्त्ती, कोऽपि अविज्ञातः, अनिर्वाच्य इत्यर्थः, हेतुः कारणं, किमपि अबाह्यं निमित्तमित्यर्थः, पदार्थान् वस्तूनि, व्यतिषजति स्नेहसूत्रेण

विकसति हि पतङ्गस्योदये पुण्डरीकं
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥ १२ ॥

लवः। चन्द्रकेतो! क एते? (व)

चन्द्रकेतुः। प्रियवयस्य! ननु तातपादा एते। (भ)

लवः। ममापि तर्हि धर्मतस्तथैव, यतः प्रियवयस्य इत्यात्थ, किन्तु चत्वारः खलु भवतामेवंव्यपदेशभागिनः तत्र-भवन्तो रामायणकथापुरुषाः, तद्विशेषं ब्रूहि। (म)

परस्परं निबध्नाति, प्रीतयः स्नेहाः, बहिरुपाधीन् बाह्यधर्म्मान्, जन्यजनकभावदाम्प-त्यादीन् सम्बन्धानित्यर्थः, न खलु नैव हि, संश्रयन्ते अवलम्बन्ते, बाह्यधर्म्मानाश्रित्य नैव प्रवर्त्तन्ते स्नेहा इति भावः। एतदेव समर्थयते, विकसतीति।—हि यतः, पुण्डरीकं पद्मं, पतङ्गस्य सूर्य्यस्य ("पतङ्गौ पक्षिसूर्य्यौ च" इत्यमरः) उदये आविर्भावे, प्रकाशे सतीत्यर्थः, विकसति प्रस्फुटति, चन्द्रकान्तश्च तदाख्यमणिविशेषोऽपि, हिमरश्मौ तुहिनकिरणे, चन्द्रे इत्यर्थः, उद्गते उदिते सति, द्रवति निष्यन्दते, जललवं विमुञ्च-तीत्यर्थः; यथा हि निखिलजगत्तापकतपनोदयसमकालमेव परमकोमलवपूंषि अपि पद्मानि हसन्ति, चन्द्रोदयमात्रत एव अतिकठिनश्चन्द्रकान्तमणिः अपि द्रवीभवति, तत्र किमपि बाह्यं कारणं नावलोक्यते, आन्तरञ्च किञ्चिदस्तीति अनुमीयते, तथा ममापि बहिःसम्पर्के असत्त्वेऽपि कुमारस्यावलोकनमात्रतः चित्तद्रवीभवने किमपि अव्यक्तमान्तरं निमित्तमस्तीति सन्देह्मि इति भावः। [अत्र पद्मविकाश-चन्द्रकान्त-द्रवीभावरूपविशेषार्थद्वयेन आन्तरपदार्थव्यतिषङ्गभावरूपसामान्यार्थस्य सोपपत्तिकत्व-करणात् अर्थान्तरन्यासावलङ्कारौ, तयोरन्योऽन्यसापेक्षतया संस्थितेः सजातीय-सङ्करः]। मालिनी वृत्तम् ॥ १२ ॥

(व) के एते—किमाख्योऽयं महापुरुष इत्यर्थः। [गौरवात् बहुत्वम्]।

(भ) तातपादाः,—पूज्यतमाः ज्येष्ठपितरः इत्यर्थः; पादशब्दः पूज्यतम-त्वातिशय्यव्यञ्जकः। [अत्रापि बहुत्वं गौरवात्]।

(म) तर्हि—तदा, तव पितृस्थानीयत्वे इत्यर्थः। ममापि—न केवलं तव इत्यपिशब्दार्थः। धर्मतः,—धर्म्मेण, लोकाचारानुसारेणेत्यर्थः। ("धर्म्माः पुण्ययम-न्यायस्वभावाचारसोमपाः।" इत्यमरः। "प्रकृत्यादिभ्य उपसंख्यानम्" (वा०) इति तृतीया, ततस्तसिल्)। तथैव—तातपादा एवेत्यर्थः। यतः,—यस्मात्

चन्द्रकेतुः । ननु ज्येष्ठतातपादा इति अवेहि । (य)

लवः । [सोल्लासम्] । कथं रघुनाथ एषः !! दिष्ट्या सुप्रभातमद्य, यदयं देवो दृष्टः । [सविनयकौतुकं निर्वर्ण्य] । तात ! प्राचेतसान्तेवासी लवोऽभिवादयते । (र)

रामः । [सस्नेहम्] । आयुष्मन् ! एह्येहि । [सस्नेहं परिष्वज्य] । अयि वत्स ! कृतं कृतमतिविनयेन, अनेकवारमपरिश्लथं परिष्वजस्व । (ल)—

कारणात् । प्रियवयस्य इति—प्रियसख इत्येवम् । आख्य—ब्रवीषि, मामिति शेषः ; भवता सह सौहार्द्दात् भवत्सम्बन्धीयाः सर्वे एवेदानीं मत्सम्बद्धाः सञ्जाताः इति भावः । भवतां—युष्माकम् । एवम्—इत्थं, व्यपदेशं—समाख्यां, तातपादरूपमित्यर्थः, भजन्ते—आश्रयन्ति ये तथोक्ताः, [भजतः "सम्पृचानु—" (३।२।१४२ पा०) इति घिनुण्] तातपादपदवाच्या इत्यर्थः । तत्रभवन्तः,—पूज्याः । ("त्रिपु तत्रभवानत्रभवान् पूज्यश्च तादृशः ।" इति कोषः) रामायणस्य कथा—इतिवृत्तभागः, तस्याः पुरुषाः,—नायकाः । तत्—तस्मात्, तेषां चतुष्टयत्वादित्यर्थः । विशेषम्—इतरव्यावर्त्तकं, नामधेयमित्यर्थः । ब्रूहि—कथय ; रामायणकथासु चत्वारः एव भवतां तातपादाः महापुरुषाः श्रूयन्ते, तेन हि तेषु कतमोऽयं भवतीति सविशेषं कथयेति भावः ।

(य) ननु—भो लव ! । ज्येष्ठतातपादाः,—ज्येष्ठपितरः, भगवान् रामभद्रः इत्यर्थः । इति—इदम् । अवेहि—जानीहि ।

(र) सोल्लासं—सहर्षम्, आहेति शेषः । सुप्रभातं—शोभनं दिनमुखं, समुदितमिति शेषः । यत्—यस्मात्, सौभाग्येन पुण्यदिवससमुदयादिति यावत् । देवः,—भगवान् रघुपतिः । दृष्टः,—नयनपथमायातः । सविनयकौतुकं—सप्रश्रयं सकौतूहलञ्चेत्यर्थः । निर्वर्ण्य—निरीक्ष्य । प्राचेतसान्तेवासी—वाल्मीकिशिष्यः । अभिवादयते—प्रणमति, भवन्तमिति शेषः ।

(ल) सस्नेहं—सवात्सल्यम, आहेति शेषः । आयुष्मन् !—दीर्घजीविन् ! । एहि—आगच्छ । [आदरातिरेके द्विर्भावः] परिष्वज्य—गाढमाश्लिष्य । अयि—कोमलसम्बोधने । वत्स !—निरतिशयकल्याणास्पद ! । अतिविनयेन—अत्यधिकप्रश्रयप्रदर्शनेन । कृतम्—अलम्, ("कृतं युगेऽलमर्थेऽपि विहिते हिंसिते त्रिषु ।" इति मेदिनी) अतिविनयेन साध्यं नास्तीत्यर्थः । [गम्यमानक्रियायोगात् करणे तृतीया, अन्ये तु वारणार्थकशब्द-

परिणतकठोरपुष्करगर्भच्छदपीनमसृणसुकुमारः ।
नन्दयति चन्द्रचन्दननिष्यन्दजड़स्तव स्पर्शः ॥ १३ ॥

लवः । [स्वगतम्] । ईदृशोऽस्मादृशान् प्रति अमीषामकारणस्नेहः, मया पुनरेभ्य एव अभिद्रुग्धमज्ञेन, यदायुधपरिग्रहं यावत् अत्यारूढ़ो दुर्योगः । [प्रकाशम्] । मृष्यन्तु इदानीं लवस्य बालिशतां तातपादाः । (व)

योगात् तृतीया इत्याहुः । सम्भ्रमे द्विर्व्वचनम्] । अनेकवारं—भृशं, पुनः पुनरित्यर्थः । अपरिश्लथं—सुदृढ़म्, अशिथिलमिति यावत् । परिष्वजस्व—आलिङ्ग ; सीताविरहज-तापोपशमाय त्वं सुकोमलाङ्गैः मां निर्द्दयमाश्लिष्य इति भावः ।

सुकुमाराङ्गसंश्लेषस्य निरतिशयसन्तापहरत्वं प्रतिपादयति, परिणतेति ।—परिणतं सुविकसितं, कठोरं प्राप्तपूर्णावस्थं, सर्वाङ्गसम्पूर्णमिति यावत्, यत् पुष्करं पद्मं, तस्य गर्भच्छद इव अभ्यन्तरगतं दलमिव, पीनः स्थूलः, कोमल इत्यर्थः, मसृणः श्लक्ष्णः, सुकुमारः अभिनवः, प्रफुल्लकमलप्रसूनान्तर्गतपलाशसदृशसुकोमल इत्यर्थः, ["उपमानानि सामान्यवचनैः" (२।१।५५ पा०) इति उपमानसमासः] चन्द्रः हिमकरः, चन्दनस्य च निष्यन्दः द्रव इत्यर्थः ; यद्वा—चन्द्रः कर्पूरः, चन्दनस्य च रसः, तद्वत् जड़ः शीतलः, तव स्पर्शः त्वच्छरीरस्पर्शः, त्वदङ्गसंश्लेषजं सुखमिति यावत्, नन्दयति प्रीणयति, मामिति शेषः ; मम विरहतापोपशान्तये हि तव निरवद्यं कोमलमेतदङ्गं सर्व्वथैव प्रभवति, तेन निर्भरं मामालिङ्गेति प्रार्थये इत्याशयः । [अत्र समासगतत्वेन आर्थी उपमाऽलङ्कारः] । आर्या जातिः ॥ १३ ॥

(व) ईदृशः—एतादृशः, अनिर्व्वचनीय इत्यर्थः । अस्मादृशान् प्रति—मां प्रति इति यावत् । अमीषां—रघुपतिप्रमुखाणामेषाम् । अकारणस्नेहः,—अहेतुकवात्सल्यम् ; सम्बन्धविरहितेऽपि मयि एते महापुरुषाः निरतिशयं स्निह्यन्ति, अहो ! महानुभवत्वमेतेषामिति भावः । अज्ञेन—अतिमूढ़ेन । एभ्यः एव—एतादृशेभ्यः दयावात्सल्यनिधिभ्यः एवेति यावत् । ["क्रुधद्रुहोरुपसृष्टयोः कर्म्म" (१।४।३८ पा०) इत्यनुशासनेन सोपसर्गयोः क्रुधद्रुहोः यं प्रति कोपस्तस्य कारकस्य कर्म्मसंज्ञत्वविधानात्, अत्र तदुल्लङ्घनेन च्युतसंस्कारताऽऽख्यदोषः । यदि हि अभेरत्र उपसर्गत्वं नाङ्गीक्रियते, "वीप्सायां—वृक्षं वृक्षं प्रति पर्य्यनु वा सिञ्चति ; अत्रोपसर्गत्वाभावात् न षत्वम्" इति दीक्षितोक्तिवत्, तदा द्रुहेरुपसृष्टत्वाभावेन "क्रुधद्रुहेर्ष्या—" (१।४।३७ पा०) इति

रामः। किमपराद्धं वत्सेन ?

चन्द्रकेतुः। अश्वानुयात्रिकेभ्यः तातप्रतापाविष्करणमुपश्रुत्य वीरायितम् अनेन। (ग)

रामः। ननु अयमलङ्कारः क्षत्त्रस्य। (घ)—

चतुर्थी स्यात्। तथाच न प्रोक्तदोषावसर इति ज्ञेयम्। अन्ये तु "क्रिया—" (२।३।१४ पा०) इति चतुर्थीमाहुः, तत्तु न सम्यक्, प्रोक्तकर्मत्वविधानस्यापवादविषयत्वेन बलीयस्त्वादिति]। अभिद्रुग्धं—वैरायितं, जिघांसितमित्यर्थः; स्नेहप्रवणेषु महानुभवेष्वेतेषु निरर्थकं विरोधित्वमनुष्ठितमिति भावः। [अभिपूर्व्वकात् द्रुह्यतेः भावे क्तः]। यत्—यतः। आयुधस्य—अस्त्रस्य, परिग्रहः,—स्वीकारः, ग्रहणमित्यर्थः, तं, यावत्—अस्त्रग्रहणमारभ्येत्यर्थः। [अत्र यावच्छब्दयोगात् द्वितीया। "यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे।" इत्यमरः] अत्यारूढः,—प्रकर्षं गतः, प्रबलीभूत इत्यर्थः, दुर्योगः,—विवादः, द्रोहः इति यावत्। क्षम्यन्तु—क्षाम्यन्तु। बालिशतां—मूर्खताम्, अविमृश्यकारितामिति यावत्। तातपादाः,—पितरः, पूज्यतमाः भवन्त इत्यर्थः; पितृस्थानीयेषु पितृषु वा भवत्सु मोहात् मया जिघांसुना यदतीव विगर्हितं वैरमनुष्ठितं, तत् भवद्भिः महानुभवैः स्वकारुण्यगुणेन क्षन्तव्यमिति भावः।

(ग) अश्वेति।—अश्वस्य—अश्वमेधीयस्य वाजिनः, अनुयात्रिकाः,—अनुचराः, रक्षका इत्यर्थः, तेभ्यः। [अनु पश्चात्, यात्रा यानं, प्रयोजनमेषामित्यर्थे, "प्रयोजनम्" (५।१।१०९ पा०) इति ठञ्। अपादाने पञ्चमी। अपरे तु—"शुत्यर्थानां श्रावयिता" इति पञ्चमी इत्याहुः] तातस्य—पितृस्थानीयस्य भवतः, प्रतापस्य—प्रभावस्य, आविष्करणं—प्रख्यापणं, समन्तादुद्घोषणमिति यावत्। उपश्रुत्य—आकर्ण्य। वीरायितं—वीरेणेवाचरितम्; वीरा यथा परगुणप्रकर्षं विसोढुमशक्नुवन्तः स्वस्य ततोऽधिकगुणवत्तामावेदयितुं तद्गुणोपघातका भवन्ति, तथैवासावपि भवतो वीरत्वख्यातिं श्रोतुमपारयन्नेव विग्रहव्यापारेण तत्रान्तरायः सञ्जातः इति भावः। [वीरशब्दादाचारार्थे "कर्त्तुः क्यङ् सलोपश्च" (३।१।११ पा०) इति क्यङि भावे क्तः]।

(घ) ननु—अवधारणे। अयमलङ्कारः,—इदं वीरत्वप्रकटनं भूषणमेव, न तु दूषणमिति भावः। क्षत्त्रस्य—क्षत्त्रियजातेरित्यर्थः; पौरुषाविष्करणं हि क्षत्त्रियजातेः न दोषाधायकमिति भावः। ब्रह्मचारिणि लवे मौर्व्वमेखलादिदर्शनात् क्षत्त्रियत्वमवधार्य्यैवमुक्तमिति ज्ञेयम्।

न तेजस्तेजस्वी प्रसृतमपरेषां प्रसहते
स तस्य स्वो भावः प्रकृतिनियतत्वादकृतकः।
मयूखैरश्रान्तं तपति यदि देवो दिनकरः,
किमाग्नेयग्रावा निकृत इव तेजांसि वमति? ॥१४॥

तेजस्विनामन्यतेजोऽसहमानत्वं प्रशस्य तस्य स्वाभाविकत्वमेवैतदित्युपपादयति, नेति।—तेजस्वी वीरः, अपरेषाम् अन्येषां, प्रसृतं समन्तादभिव्याप्तं, प्रदीप्तमित्यर्थः, सर्व्वतोविसारितया सर्वेषामेवाभिभवितृ इति यावत्, तेजः प्रभावं, न प्रसहते न मर्षयति, न क्षमते इत्यर्थः; प्रत्युत तदभिभवितुमेव उद्युङ्क्ते इत्याशयः। किं तर्हि स अन्यविद्वेष्टा? तन्नेत्याह, स इति।—सः असहनमित्यर्थः, [विधेयप्राधान्यात् पुंस्त्वम्] तस्य तेजस्विनः, प्रकृतिनियतत्वात् स्वभावेन नियन्त्रितत्वात्, निसर्गसिद्धत्वादिति यावत्; स्वभाववशादेव उत्पद्यमानत्वादिति भावः; अकृतकः अकृत्रिमः, अविकृत इति यावत्, स्वः स्वकीयः, भावः धर्म्मः; न ह्ययमीर्ष्यया असूयया वा परेषां तेजसामुपरोद्धेति भावः। एतदेव सयुक्तिकं सोपपत्तीकरोति, मयूखैरिति।—देवः द्युतिमान्, दिनकरः दिवाकरः, सूर्य्य इत्यर्थः, यदि चेत्, मयूखैः किरणैः, अश्रान्तम् अविश्रमम्, अविरतमिति यावत्, तपति सन्तापं ददाति, जगत्तापकरान् किरणान् समन्तात् विकिरति इत्यर्थः, तर्हीति शेषः, आग्नेयग्रावा वह्न्युत्पादकशिलाविशेषः, सूर्य्यकान्तमणिरिति यावत्, निकृत इव परिभूत इव; जगदुत्तापकरत्वावसरे आग्नेयग्राव्णामपि सन्तापकत्वादित्याशयः; तेजांसि अग्नीन्, किं कथं, वमति? उद्गिरति?, विसृजतीत्यर्थः; न ह्ययं सूर्य्यकान्तमणिः सूर्य्यतेजोभिरभितप्यमान एव वह्निज्वालान् विमुञ्चति; किन्तु स्वभावादेव तस्मात् वह्निराविर्भवति इति भावः; सूर्य्यसम्पर्केण वह्निप्रज्वलनं सूर्य्यकान्तमणेः प्रसिद्धमेव। अचेतनः मणिरपि यदि सूर्य्यप्रभावमसहमानः तत्तेजः पराभवितुं स्वस्मात् वह्निशिखाः समन्तात् विस्तारयति, तदा का कथा अभिमानधनानां सचेतनानां तेजस्विनाम्? इति विशदार्थः। [अत्र सामान्येनोपात्तस्य तेजस्विनः परतेजःसहनाभावस्य विशेषेणाग्नेयग्राव्णः तेजोवमनेन सोपपत्तिकीकरणात् विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासालङ्कारः, अपिच निकृत इवेति सम्भावनयोत्कीर्त्तनात् जायमानया क्रियोत्प्रेक्षया चासौ सङ्कीर्य्यते। वमतेरिह गौणार्थे प्रयोगात् न ग्राम्यत्वदोषः, तथाहि दण्डी,—"निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम्। अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते॥" इति] ॥ १४ ॥

चन्द्रकेतुः। तात! अमर्षोऽप्यस्य शोभते वीरस्य, पश्यतु हि तातः प्रियवयस्यविनियुक्तजृम्भकास्त्रनिष्कम्पस्तम्भितानि सर्वतः सैन्यानि। (ख)

रामः। [विलोक्य]। वत्स लव! संह्रियन्तामस्त्राणि। त्वमपि चन्द्रकेतो! निर्व्यापारविलक्षितानि सान्त्वय बलानि। (ङ)

लवः। यथा आज्ञापयति तातः।

[इति प्रणिधानं नाटयति]। (क)

चन्द्रकेतुः। यथाऽऽदिष्टम्। [इति निष्क्रान्तः]।

लवः। प्रशान्तमस्त्रम्।

(ख) तातेति।—तात!—पितः!, पितृस्थानीय! इत्यर्थः, पूज्यतम इति यावत्। अस्य वीरस्य—अमुष्य शूरस्य लवस्य। अमर्षोऽपि—अक्षमाऽपि, परोत्कर्षासहिष्णुत्वमपीति यावत्। शोभते—भाति, युज्यते इत्यर्थः। प्रियवयस्येन—प्रियसुहृदा लवेन, विनियुक्तं—निक्षिप्तं, प्रेरितमिति यावत्, यत् जृम्भकास्त्रं—तदाख्यं ब्रह्मादीनां तपःप्रभावसम्भूतमायुधं, तेन निष्कम्पं—निश्चलं यथा तथा, स्तम्भितानि—जडीकृतानि, स्तम्भवन्निर्व्यापारीकृतानि इत्यर्थः। सर्वतः,—समन्तात्। सैन्यानि—बलानि; महाप्रभावस्यास्य लवस्य जृम्भकास्त्रप्रभावेण सम्मोहितानि अस्मद्बलानि समन्तात् चित्रार्पितारम्भाणीवावतिष्ठन्ते, अतो निरतिशयवीर्यस्यास्यामर्षोऽपि स्थाने एवेति भावः।

(ङ) संह्रियन्तां—संयम्यन्ताम्, उपसंह्रियन्तामित्यर्थः, प्रयुक्तान्यप्येतानि जृम्भकास्त्राणि समन्त्रकाणि सपदि समाक्रम्यन्तामिति यावत्। निर्व्यापारविलक्षितानि—व्यापारस्याभावः निर्व्यापारम् [इत्यव्ययीभावः] तेन हेतुना विलक्षितानि—विस्मयान्वितानि, ("विलक्षो विस्मयान्विते" इत्यमरः) निश्चेष्टमवस्थिततया समधिकं विलक्षितानीत्यर्थः, बालस्यैकस्य सकाशे तदुपकरणानाम् असंख्येयानां स्वपक्षीययोद्धॄणां स्तम्भवदवस्थानस्य अतीव लज्जाजनकत्वादिति भावः। सान्त्वय—मधुरवाग्भिः समाश्वासय।

(क) प्रणिधानं—चित्तैकाग्रताम्; उपसंहारकारकेण रहस्येन जृम्भकास्त्राणामुपसंहारायेति भावः। नाटयति—अभिनयेन प्रदर्शयति।

रामः। वत्स! सरहस्यप्रयोगसंहरणानि अस्त्राणि आम्नायवन्ति। (ख)—

ब्रह्मादयो ब्रह्महिताय तप्त्वा
परःसहस्राः शरदस्तपांसि।
एतान्यपश्यन् गुरवः पुराणाः
स्वान्येव तेजांसि तपोमयानि॥ १५॥

अथैतन्मन्त्रपारायणोपनिषदं भगवान् कृशाश्वः परःसहस्र-परिवत्सरान्तेवासिने कौशिकाय विश्वामित्राय प्रोवाच, स तु भगवान् मह्यमित्येष तु पूर्वानुक्रमः। कुमारस्य पुनः कुतः सम्प्रदाय इति पृच्छामि। (ग)

(ख) सरहस्यप्रयोगसंहरणानि—सरहस्ये—समन्त्रके, प्रयोगसंहरणे—निक्षेप-प्रशमने येषां तानि; येषां हि अस्त्राणां विमोकः संहारश्च केवलं मन्त्रेणैव साध्यते, तानि इति भावः। अस्त्राणि—जृम्भकादीनि आयुधानि। आम्नायवन्ति—सम्प्रदायागतानि, गुरुपरम्परोपदेशसापेक्षाणि इत्यर्थः, भवन्तीति शेषः; सम्प्रदायसिद्धतया गुरूपदेशं विना दुर्लभानीति भावः। ("अथाम्नायः सम्प्रदायः" इत्यमरः)।

अथैतेषां जृम्भकास्त्राणां गुरुपरम्पराभ्यः समधिगमं सविशेषमुपवर्णयितुं प्राक् तेषां ब्रह्मादिब्रह्मर्षिगणतपस्तेजोमयत्वमाह, ब्रह्मेति।—श्लोकश्चैष प्रथमाङ्के ४२ पृष्ठे व्याख्यातः॥ १५॥

(ग) कीदृशी हि एतेषां जृम्भकाणां गुरुपरम्परासंस्थितिरासीत्, तदेवेदानीं विवृणोति, अथेत्यादिना।—एतेषां मन्त्राणां—जृम्भकास्त्रप्रयोगसंहारसाधकानामित्यर्थः, पारस्य—अन्तस्य, यत् अयनं—गमनं, समग्रास्त्राभ्यासजनितं ज्ञानमित्यर्थः, तद्रूपा या उपनिषत्—गुह्यविद्या तां, जृम्भकास्त्रप्रयोगसंहारकुशलसमग्रविद्यामिति यावत्। कृशाश्वः,—कौशिकपितामहः। परःसहस्रेति।—सहस्रात् परे इति परःसहस्राः ["पारस्करप्रभृतीनि—" (६।१।१५७ पा०) इति सुट्कः समासः निपात्यते] दशशतसंवत्सरादप्यधिकाः इत्यर्थः, ये परिवत्सराः,—हायनाः, तान् व्याप्य अन्तेवासिने शिष्यभूताय, ["अत्यन्तसंयोगे च" (२।१।२९ पा०) इति द्वितीयासमासः] सहस्रा-

लवः। स्वतःप्रकाशानि (घ) आवयोरस्त्राणि।

रामः। [विचिन्त्य]। प्रकृष्टपुण्यपरिपाकोपादानः कोऽपि महिमा स्यात्; द्विवचनन्तु कथम्? (ङ)

लवः। भ्रातरौ आवां यमजौ। (च)

रामः। स तर्हि द्वितीयः क्व? (छ)

धिकमपि वत्सरान् व्याप्य गुरुशुश्रूषारततयेति भावः। कौशिकाय—कुशिकनन्दनाय। प्रोवाच—उपदिदेश, उपदेशेन ददौ इत्यर्थः। पूर्वेषां,—पूर्व्वतनानाम्, आदिमानामुपाध्यायानामित्यर्थः, अनुक्रमः,—पर्य्यायः, अस्तीति शेषः; एवं हि एतदस्त्रोपदेशकगुरुपरम्परास्थितिः इति भावः। कुमारस्य—शिशोस्तवेति यावत्। कुतः,—कस्मात् आचार्य्यादित्यर्थः। सम्प्रदायः,—पारम्पर्य्योपदेशः, आयातः इति शेषः; कीदृशी हि भवतां जृम्भकास्त्रोपदेशकगुरुकुलस्थितिरिति भावः। इति पृच्छामि—एतत्तु जिज्ञासे; मत्तः भवतां किञ्चित् गुरुकुलवैषम्यमस्ति न वेति तत्त्वतः ज्ञातुमिच्छामि इति विशदार्थः।

(घ) स्वतःप्रकाशानि—स्वतः,—स्वेनैव, उपदेशमन्तरेणैवेति यावत्, प्रकाशः,—आविर्भावः येषां तानि; निसर्गसिद्धानीति भावः।

(ङ) प्रकृष्टेति।—प्रकृष्टं—प्रकर्षं गतं, सर्व्वातिशायीत्यर्थः, यत् पुण्यं—शुभादृष्टं, तस्य यः परिपाकः,—परिणामः, स एव उपादानं—निमित्तं यस्य सः, पुण्यप्रचयप्रकर्षवशादेव समुत्पद्यमान इत्यर्थः। कोऽपि—अनिर्व्वचनीयः एवेति भावः। महिमा—माहात्म्यम्। स्यात्—भवेत्; अपरिज्ञातपुण्यातिरेकप्रभाववशेन एतज्जृम्भकास्त्रलाभरूपाभ्युदयोऽपि भवितुमर्हतीति भावः। द्विवचनम्—"आवयोः" इति द्विवचनप्रयोगः इति यावत्। कथं?—केन हेतुना कृतमित्यर्थः; एकस्मिन्नेव परिदृश्यमाने त्वयि कथं द्विवचनमनुप्रयुज्यते इति भावः; तर्हि भवतोऽपि अन्यः कश्चिदेतादृशः अस्ति किमु? इत्याशङ्कितोऽर्थः।

(च) यमजौ—यमौ भूत्वा जातौ, युगपदेव मातुः द्वौ सम्भूतावित्यर्थः; एतेन ममापरः एकः सहोदरः अस्तीति विज्ञापितमित्यवधेयम्।

(छ) तर्हि—तदा। द्वितीयः,—अपरः, भवतः अन्यः इत्यर्थः। क्व?—कुत्र? आस्ते इति शेषः; यदि भवन्तौ द्वौ भ्रातरौ, तदा अपरस्येदानीं कुत्र वसतेः? इति त्वर्थकतात्पर्य्यम्।

[नेपथ्ये] । भाण्डायन ! भाण्डायन ! (ज)—

आयुष्मतः किल लवस्य नरेन्द्रसैन्यै-
रायोधनं ननु किमात्थ सखे ! तथेति ।
अद्यास्तमेतु भुवनेष्वधिराजशब्दः
क्षत्त्रस्य शस्त्रशिखिनः शममद्य यान्तु ॥ १६ ॥

(ज) भाण्डायन !—भगवत्प्राचेतसशिष्यस्य कस्यचित् मुनिकुमारविशेषस्य आमन्त्रणमिदम् । [सम्भ्रमे द्विर्भावः] अधस्तान्न्यस्तेन श्लोकेन सहास्यान्वयः ।

भगवद्भरताश्रमं रामायणकथाभागं नीत्वा ततः प्रत्यावर्त्तमानः कुमारः कुशः पथि लवकृतरघुकुलविरोधमाकर्णयन् स्वस्य वीर्य्यातिशयवत्तया परेषां वीर्य्यातिरेकमसहिष्णुः स्वकीयां प्रोद्धतक्षत्त्रकुलोपचरैषसां व्यक्तीकरोति, आयुष्मत इति ।—आयुष्मतः दीर्घजीविनः, अमुष्य कनीयस्तया वात्सल्येन तथात्वोक्तिरिति ज्ञेयम् ; लवस्य तदाख्यस्य स्वानुजस्य, नरेन्द्रसैन्यैः नरपतेः रामस्य सैनिकैः सहेत्यर्थः, आयोधनं युद्धं, प्रवृत्तमिति शेषः, किल इति वार्त्तायाम् ; तथाच—नरपतिसैन्यैः सह दीर्घायुषो लवस्य युद्धवार्त्तां यां परम्परा शृणोमि, तत् तथ्यं किम् ? इति भाण्डायनं प्रति नेपथ्ये कुशस्य प्रश्नः ; ननु ! भोः !, सखे ! मित्र !, भाण्डायन ! इति यावत्, किमात्थ ? किं ब्रवीषि ? तथेति ? यत्त्वया श्रुतं, तत् सत्यमेव, इति ब्रवीषि किम् ? इत्यर्थः ; "तथा" इति नेपथ्यस्थितेन भाण्डायनेनोक्तस्य कुशकृतप्रश्नोत्तरवचनस्य प्रतिध्वनिरूपेण कुशस्येत्र पुनरुक्तिरियमिति बोध्यम् ; यद्वा—तथा किल तद्वदेव हि, सत्यमेवेत्यर्थः, किलेति निश्चये, इति इत्थम्, एवम्प्रकारमिति यावत्, किमात्थ ? ब्रवीषि किमु ? यदि सत्यं हि जन्यं स्यात्, ततः किं भवेदित्याशङ्कायां तत्फलमाह, अद्येति ।—अद्य इदानीं, भुवनेषु जगत्सु, अधिको राजा इति अधिराजः ["राजाहःसखिभ्यष्टच्" (५।४।९१ पा०) इति टच्] स एव शब्दः सङ्केतः, सम्राट्संज्ञेत्यर्थः, अस्तं विलयम्, एतु गच्छतु, न केवलमधिराजशब्दलाञ्छितं पुमांसं विनाशयामि, अपितु तच्छब्दमेव जगतः विलोपयामीत्याशयः ; सर्वेषामेव राजन्यानां विलयकरणेन वाच्याभावात् वाचकशब्दस्यापि विलोपसाधनमिति भावः ; अपि च अद्य क्षत्त्रस्य क्षत्त्रियजातेः, शस्त्रशिखिनः शस्त्राणि एव शिखिनः अग्नयः, शस्त्रानलाः इत्यर्थः, शमं निर्व्वाणं, यान्तु गच्छन्तु, आवयोः रणकर्म्मणेति शेषः ; इदानीमेकस्य रघुकुलस्यापराधेन सर्वेषामेव क्षत्त्राणां विलोपो भविष्यति, का कथा केवलमधिराजशब्द-

राम: ।— अथ कोऽयमिन्द्रमणिमेचकच्छवि-
र्ध्वनिनैव दत्तपुलकं करोति माम् ।
नवनीलनीरधरधीरगर्जित-
क्षणबद्धकुड्मलकदम्बडम्बरम् ? ॥ १७ ॥

स्येति भाव: । [अत्र समासेन शस्त्रेषु शिखिनागभेदारोपात् समासगतं निरङ्गं रूपकमलङ्कार:] । वसन्ततिलकं वृत्तम् ॥ १६ ॥

अथ अविज्ञातपुत्रसमागमेनापि समुदितवात्सल्यविवशचेता: रघुमणि: हर्षातिरेकात् उद्गतपुलकां स्वीयां शारीरिकीमवस्थामुपवर्णयति, अथेति ।—अथ प्रश्ने, ("मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ ।" इत्यमर:) इन्द्रमणि: इन्द्रनीलमणि:, तस्य मेचका असिता, ("कृष्णे नीलासितश्यामकालश्यामलमेचका: ।" इत्यमर:) छविरिव छवि: कान्ति: यस्य स:, इन्द्रनीलमणिश्यामलरुचिरकलेवर इत्यर्थ:, तदुक्तं मणिपरीक्षायां—"क्षीरमध्ये क्षिपेन्नीलं क्षीरञ्चेत् नीलतां व्रजेत् । इन्द्रनीलमिति प्रोक्तम्—" इति ; कोऽयं कुमार:, ध्वनिनैव मेघगर्ज्जनगम्भीरेण केवलं कण्ठस्वरेणैव ; न त्वालिङ्गनादिभिरिति भाव: ; दत्त: समर्पित:, पुलक: रोमाञ्च: ; हर्षातिशयाविर्भावित: इति भाव: ; यस्मै तथाविधम् ; यद्वा,—दत्त: उत्पादित इत्यर्थ:, पुलको यस्य तथाविधं, मां, नवेति ।—नवानां नूतनानां, नीलानां श्यामलानां, नीरधराणां जलधराणां, धीरगर्ज्जितस्य क्षणे काले, वर्षाकाले इत्यर्थ: ; क्षणं मुहूर्त्तमभिव्याप्येत्यर्थो वा, बद्धा: समुन्नता:, विकसिता इत्यर्थ: ; मेघगर्ज्जनोदयसमकालमेव विकसिता इत्यर्थो वा ; यद्यपि वर्षासु प्रायश: कदम्बा: मुकुलिता भवन्तीति दृश्यते, तथाप्यत्र कुमारकुशशब्दसमाकर्णनानन्तरमेव भगवद्रामभद्रस्य सर्वेषु गात्रेषु कदम्बकोरकसमपुलकोद्गमदर्शनात् मेघध्वनिसमुत्पत्त्यनन्तरमेव कदम्बमुकुलोदयवर्णनेन साम्यं सुसंरक्षितमिति ज्ञेयम् ; यद्वा—नवनीलनीरधराणां धीरेण गम्भीरेण, गर्ज्जितेन निनादेन, य: क्षण: उत्सव:, तेन बद्धा: धृता:, उद्भिन्ना: इत्यर्थ:, कुड्मला: कोरका: यस्य तथाविध:, य: कदम्ब: नीपतरु:, तस्य डम्बर: समारम्भ:, सादृश्यं वा यस्मिन् तथोक्तं, प्रावृड्भोद्भिन्नकोरककदम्बवृक्षकान्तिमित्यर्थ:, करोति विदधाति ? कोऽयं हि केवलं मधुरवाग्भिरेव हर्षातिशय्यं विदधत् कदम्बकुड्मलप्रफुल्लकलेवरं मामकस्मादेव करोति ? इति समुदितार्थ: । [अत्र कुशशरीरे इन्द्रनीलमणेरवैधर्म्यसाम्योपदेशात् समासगता, एवं रामशरीरेण च सह कदम्बकुड्मलसाम्योत्कीर्त्तनात् वाच्या उपमाऽलङ्कार:, तयोर्मिथ: नैरपेक्ष्येण संस्थिते: संसृष्टि: ;

लवः। अयमसौ मम ज्यायान् आर्य्यः कुशो नाम भरताश्रमात् प्रतिनिवृत्तः। (झ)

रामः। [सकौतुकम्]। वत्स! इत एव आह्वयैनमप्यायुष्मन्तम्। (ञ)

लवः। एवम्। [इति परिक्रामति]।

[ततः प्रविशति कुशः]।

कुशः। [साद्भुतहर्षधैर्य्यं धनुरास्फालयन्]। (ट)—

दत्तेन्द्राभयदक्षिणैर्भगवतो वैवस्वतादा मनो-
र्दृप्तानां दहनाय दीपितनिजक्षत्रप्रतापाग्निभिः।

नकाररकारयोर्यासकृत् साम्यात् वृत्त्यनुप्रासेन च तं संसृज्येति]। मञ्जुभाषिणी वृत्तम्॥ १७॥

(झ) ज्यायान—वर्षीयान्, अग्रज इत्यर्थः। [वृद्धशब्दादीयसुनि "ज्यायादीयसः" (६।४।१६० पा०) इति ईयसुन आकारादेशे "वृद्धस्य च" (५।३।६२ पा०) इति वृद्धस्य ज्याऽऽदेशः] भरतस्य—भगवतः नाट्यशास्त्रकृतः मुनिविशेषस्य, आश्रमात्—आवासात्। प्रतिनिवृत्तः,—प्रत्यागतः।

(ञ) सकौतुकं—कुमारस्य कुशस्य दर्शनाभिलापजनितं यदौत्सुक्यं, तेन सह वर्त्तमानं यथा तथा। आयुष्मन्तं—प्रभूतायुषं, चिरजीविनमिति यावत्। [आयुःशब्दात् "भूमनिन्दाप्रशंसासु—" (वा०) इति भूमार्थे मतुप्प्रत्ययः]।

(ट) अद्भुतं—विस्मयः, हर्षः,—आह्लादः, धैर्य्यं—धीरता, तैः सह वर्त्तमानं यथा तथा; अत्र आकस्मिकयुद्धव्यापारदर्शनेन विस्मयस्य, सूर्य्यवंशीयप्रतिपक्षवीरलाभेन हर्षस्य, तथा युद्धावसरे वीरस्वभावसुलभस्य धैर्य्यस्य च समुद्भवोऽभूदिति ज्ञेयम्। धनुः,—कार्म्मुकम्। आस्फालयन्—समाकर्षन्, प्राहेति शेषः।

अथेदानीं स्वप्रतिपक्षवीरलाभेन स्वभ्यस्तास्त्रविद्यायाः साफल्यलाभमभिव्यञ्जयति, दत्तेन्द्राभयेति।—भगवतः :षड़ैश्वर्य्यशालिनः, विवस्वतः सूर्य्यस्य अपत्यं पुमान् वैवस्वतः तस्मात्, सूर्य्यवंशप्रतिष्ठापकादित्यर्थः, असौ हि सूर्य्यवंश्यानां राज्ञां प्रथमः वैवस्वताऽऽख्यः सप्तमः मनुः आसीत्; मनोः सप्तमात् मन्वन्तराधिपात्, आ वैवस्वतं मनुमारभ्येत्यर्थः, ["आङ्मर्य्यादावचने" (१।४।८९ पा०) इति कर्म्मप्रवचनीयत्वेन, अत्र तु अवचनग्रहणादभिविधावपि "पञ्चम्यपाङ्परिभिः" (२।३।१० पा०) इति

आदित्यैर्यदि विग्रहो नृपतिभिर्धन्यं ममैतत् ततो
दीप्तास्त्रस्फुरदुग्रदीधितिशिखानीराजितज्यं धनुः ॥१८॥

[विकटं परिक्रामति]।

रामः। कोऽप्यस्मिन् क्षत्रियपोतके पौरुषातिरेकः ! ! (ठ)—

आङ्योगात् पञ्चमी]। दत्ता समर्पिता, इन्द्राय देवराजाय, अभयदक्षिणा असुरापद्रवरूपविपत्प्रतिकारात्मकम् अभयदानं यैः तथाविधैः, देवेन्द्रसखैरित्यर्थः, तथा हतानां मदगर्व्वितानां, दुर्वृत्तानामिति यावत्, दहनाय भस्मीकरणाय, समूलमुपघातायेति यावत्; अनसाणामुन्मूलनायेति भावः; दीपितः प्रज्वलितः, निजः स्वकीयः, क्षत्रप्रतापः क्षत्रतेजः, क्षत्रियप्रभाव इत्यर्थः; एव अग्निः अनलः यैः तथाभूतैः; हिंसकाणां विनाशायैव सततं प्रकटितपराक्रमैरिति भावः; आदित्यैः आदित्यस्यापत्यानि पुमांसः तैः, सूर्य्यवंशीयैरित्यर्थः, नृपतिभिः राजभिः सार्द्धमित्यर्थः, यदि चेत्, विग्रहः विवादः, स्यादिति शेषः, ततः तदा, महाबलैः गुणवीर्य्यपरीक्षकैरतैः सह विवादे सतीत्यर्थः, [तच्छब्दात् सप्तम्यां तसिल्] दीप्तानां भास्वराणां, जाज्वल्यमानानामित्यर्थः, अस्त्राणां प्रहरणानां, स्फुरन्तीभिः, विलसन्तीभिः, देदीप्यमानाभिरित्यर्थः, उग्राभिः भयावहाभिः, भीषणाभिरित्यर्थः, दीधितिशिखाभिः मरीचिज्वालाभिः, मयूखरूपहेतितततिभिरिति यावत्, नीराजिता आरत्रिकरूपमाङ्गलिकक्रियाभिः सत्कृता, [निःपूर्व्वकात् राजतेः णिचि कर्म्मणि क्तः] ज्या मौर्व्वी यस्य तत्; यथा हि दीपादिभिः माङ्गलिकोपचारैः देवतादयः समभ्यर्च्य समलङ्क्रियन्ते, तथैव दीप्तास्त्रशिखाभिः तस्य धनुषः ज्या तदानीम् अलमक्रियतेति भावः; मम एतत् धनुः कार्म्मुकं, धन्यं श्लाघ्यं, प्रशस्तमित्यर्थः, भवेदिति शेषः; मन्वन्ववायशेखरायमाणैः असुरविजेतृभिः परन्तपैः गुणपक्षपातिभिः महावीरैः धानुष्कैः राजभिः यदि विग्रहः स्यात्, तदा मे सत्प्रतिपक्षस्य विविधनिशितास्त्रप्रयोगशिक्षाकौशलं फलवद् भवेदिति भावः; गुणवद्भिः विवादोऽपि श्रेयसे भवतीति हृदयम्। [अत्र क्षत्रप्रतापे अग्नेरभेदारोपात् निरङ्गं रूपकमलङ्कारः, नीराजितशब्दशक्त्या ज्यायां देवतात्वारोपोऽपि व्यज्यते इति रूपकालङ्कारध्वनिः]। शार्दूलविक्रीडितं वृत्तम् ॥ १८ ॥

(ठ) कोऽपि—अनिर्व्वचनीयः, अनन्यसाधारण इत्यर्थः। अस्मिन्— पुरतः दृश्यमाने। क्षत्रियपोतके—क्षत्रियशिशौ, कुशे इति यावत्। पौरुषस्य,—प्रभावस्य,

दृष्टिस्तृणीकृतजगत्त्रयसत्त्वसारा
धीरोद्धता नमयतीव गतिर्धरित्रीम् ।
कौमारकेऽपि गिरिवद्गुरुतां दधानो
वीरो रसः किमयमेत्युत दर्प एव !! ॥ १९ ॥

तेजसः इत्यर्थः, व्यतिरेकः अतिशयः, आधिक्यमिति यावत् ; अयं हि क्षत्रियशिशुः निरतिशयं पौरुषं बिभर्त्तीति दृश्यते इति भावः ।

बालस्यामुष्य असामान्यवीर्य्ययोगात् पौरुषविशेषशोभिनीमाकृतिं गतिञ्च विशदीकृत्य व्यनक्ति, दृष्टिरिति ।—दृष्टिः विलोकनम्, अस्य क्षत्रियपोतकस्येति शेषः, तृणीकृतः अतृणं तृणं यथा सम्पद्यते तथा कृतः, तृणवद्विगणित इत्यर्थः, जगत्त्रयस्य त्रिभुवनस्य, सत्त्वसारः बलोत्कर्षः यया तथाभूता, भवतीति शेषः ; अयं हि तेजःपूर्णदृष्टिविक्षेपैः प्राणिसङ्घानां तेजांसि परिभवन् त्रिलोकीमपि तृणाय मन्यते इत्यनुमीयते इति भावः ; तथा धीरा गाम्भीर्य्यवती, अचञ्चलेत्यर्थः, अपिच उद्धता दृप्ता, शौर्य्यभूयिष्ठेत्यर्थः, गतिः पदक्षेपः, धरित्रीं पृथिवीं, नमयतीव अधः प्रेरयतीव ; अस्यातिगुरून् पादन्यासान् विसोढुमशक्नुवाना पृथिवी अपि अधोगता भवतीवेति विभाव्यते ; कौमारकेऽपि अतिबाल्येऽपि, का कथा यौवनस्येत्यपिशब्दार्थः, गिरिवत् गिरितुल्यं, ["तेन तुल्यं क्रिया चेद्वतिः" (५।१।११५पा०) इति तुल्यार्थे वतिप्रत्ययः] गुरुतां गौरवं, भारवत्त्वमित्यर्थः, अप्रतिहतभावमिति यावत, दधानः धारयन्, ["ताच्छील्यवयोवचनशक्तिषु चानश" (३।२।१२९ पा०) इति शक्तौ वयसि वा चानश्]। गिरयो हि उत्पत्तिकालमारभ्यैव गुरुत्वभाजः भवन्तीति विभाव्यम्, अयं कुमारः, वीरो रसः किम ? साक्षात वीरो रसः किमु ? मूर्त्तिमान् वीररसस्य स्थायिभावः उत्साहः किमित्यर्थः, उत अथवा, दर्प एव अन्तःसारसम्भूतः अहङ्कार एव, विग्रहवान् वीरत्वगर्व्व एवेत्यर्थः ; तत्तन्मूर्त्तिमयः सत्त्वेवेति भावः ; एति !! आगच्छति ; शैशवेऽपि अतिशौर्य्यविभूषितोऽयं किमु वीररसस्य दर्पस्य वा रूपं परिगृह्य विचरति ? ("ऐति" इति पाठान्तरम्) नायं हि क्षत्रियपोतः, अपितु मूर्त्तिमान् वीररसः दर्पो वा अयमिति भावः । [अत्र गत्या धरित्र्याः अनमितत्वेऽपि नमितत्वोक्तेः उत्कटैककोटिकसंशयोत्पत्त्या वाच्या क्रियोत्प्रेक्षाऽलङ्कारः, तथा प्रथमपादे दृष्ट्या सत्त्वसारस्यातृणीकृतत्वेऽपि तृणीकृतत्वोक्तेः तथैव संशयोदयात् प्रतीयमानक्रियोत्प्रेक्षाऽलङ्कारः, अपि चात्रोपमेयभूते कुमारे कुश उपमानभूतयोः वीररसदर्पयोः संशयात् प्रकृतरूपानिश्चयाच्च शुद्धसन्देहालङ्कारः,

लवः। [उपसृत्य]। जयति आर्य्यः।

कुशः। नन्वायुष्मन्! किमियं वार्त्ता युद्धं युद्धमिति ? (ड)

लवः। यत्किञ्चिदेतत्। उरुद्धतभावमुत्सृज्यार्य्योऽस्मिन् विनयेन वर्त्तताम्। (ढ)

कुशः। किमर्थम् ?

लवः। अत्र देवो रघुपतिस्तिष्ठति, स च स्निह्यति आवयोः उत्कण्ठते च युष्मत्सन्निकर्षस्य। (ण)

कुमारे गिरेः साम्योत्कीर्त्तनादुपमाऽलङ्कारश्च, एतेषाञ्चतुर्णां मिथः नैरपेक्ष्येण संस्थितेः संसृष्टिः। अत्र हि वीरो रसः, तथाहि, भगवान् रघुमणिरेव आलम्बनविभावः, तस्य तु जगत्त्रयविश्रुतः सत्त्वसार एवात्र उद्दीपनविभावः, कुमारस्य लवस्यान्वेषण-मेवात्रानुभावः, कुमारस्य कुशस्य धीरोद्धतगतौ अभिव्यक्तौ धृतिगर्व्वौ अत्र सञ्चारिभावौ. एतैरभिव्यक्तः उत्साहरूपस्थायिभाव एवात्र वीररसरूपतामिति इति ज्ञेयम्। श्लोकेऽस्मिन् वीररसस्य तथा तत्सञ्चारिभावस्य दर्पस्य स्वशब्देनोल्लेखात् रसदोष इति ज्ञेयं,—"रसस्योक्तिः स्वशब्देन स्थायिसञ्चारिणोरपि।" इति दर्पण-कृल्लक्षणात्]। वसन्ततिलकं वृत्तम्॥ १९॥

(ड) आयुष्मन्!—चिरञ्जीविन्। युद्धं युद्धमिति—युद्धं युद्धमित्याकारिका, [वीप्सायां द्वित्वम्] इयं वार्त्ता—ईदृशी कथा। किम्?—कथम्? अनुश्रूयते इति शेषः; किमर्थं हि युद्धं युद्धमिति वार्त्ता निरन्तरमाकर्ण्यतेऽस्माभिरिति भावः; केन सह कुत्र कथं सङ्घटितमिति पृच्छ्यते इति तु हृदयम्।

(ढ) यत्किञ्चिदेतत्—युद्धं युद्धमिति यदनुश्रूयते, तत्तु न किमपीत्यर्थः; तत्तु श्रुतं वस्तु अतितुच्छमिति बुद्ध्या भवद्भिः परिहातव्यमिति भावः। उरुद्धतभावं—महागर्व्वितभावम्, अतीवौद्धत्यमिति यावत्। ("उरुद्धतभावम्" इत्यत्र "दृप्त-भावम्" इत्येव पाठो बहुपुस्तकेषु दृश्यते) उत्सृज्य—विहाय। आर्य्यः,—तत्र-भवान् भवान्। अस्मिन्—भगवति रघुमणौ रामभद्रे। विनयेन—प्रह्वतया, अनौद्धत्येन इत्यर्थः, भक्तिनम्रतयेति यावत्। वर्त्तताम्—तिष्ठतु; इदानीं वीरभावं विहाय पुरोवर्त्तिनि अस्मिन् भगवति रघुमणौ प्रश्रयविनम्रमूर्त्तिभाक् भवतु भवानिति भावः।

(ण) अत्र—अस्मिन् स्थाने, युद्धभूमावित्यर्थः। देवः,—महाराजः। रघुपतिः,—

कुश:। [सतर्कम्]। स रामायणकथानायको ब्रह्मघोषस्य गोपायिता ? (त)

लव:। अथ किम् ?

कुश:। आशंसनीयपुण्यदर्शनः स महात्मा, किन्तु कथमस्माभिरुपगन्तव्य इति न सम्प्रधारयामि। (थ)

रघुकुलनायकः भगवान् रामभद्रः। तिष्ठति वर्त्तते। स च—रघुमणिश्च। आवयोः—त्वयि मयि चेत्यर्थः। स्निह्यति—निरतिशयं वात्सल्यं विधत्ते। युष्मत्सन्निकर्षस्य—भवत्सन्निधानस्य, तव सामीप्यमिति यावत्। उत्कण्ठते—औत्सुक्येन स्मरति, आकाङ्क्षते इत्यर्थः, अत्युत्कण्ठितः सन् भवद्दर्शनमभिवाञ्छतीति यावत्; उभयोरप्यावयोः सातिशयां प्रीतिं प्रकाशयति, भवतश्चेदानीमप्यप्राप्यत्वात् तल्लाभाय नितरामुत्सुकायते इति भावः। ["युष्मत्सन्निकर्षस्य" इत्यत्र "षष्ठी शेषे" (२।३।५० पा०) इति सम्बन्धसामान्यविवक्षायां षष्ठी, "भजे शम्भोश्चरणयोः" इतिवत् इति ज्ञेयम्। उत्पूर्व्वकस्य भौवादिकस्य कण्ठेर्लटि रूपम्]।

(त) सतर्कं—तर्केण—अयं रामायणकथानायको न वेत्याकारकसंशयेन सह वर्त्तमानं यथा तथा, ससन्दिग्धमिति यावत्। रामायणकथानायकः—रामायणमहाकाव्यस्याश्रयभूतः महापुरुष इत्यर्थः। ब्रह्म घुष्यते—स्तूयते अस्मिन्निति [कर्म्मणि घञ्] ब्रह्मघोषः—वेदः तस्य। ("ब्रह्मकोषस्य" इति पाठान्तरम्) गोपायिता—रक्षकः। [गोपायतेः शीलार्थे तृच्] राज्ञः वर्णाश्रमधर्म्मसंरक्षकतया, वेदानामपि तन्मूलकतया परम्परया तद्रक्षकत्वं ज्ञेयम्; अथवा प्रलयपयोधिनिमग्नेषु वेदेषु पुरा भगवान् मीनरूपमास्थाय तानुद्धधार इति पौराणिकाः आमनन्ति, अस्यापि भगवतः वेदविद्वेषिणां राक्षसादीनां निहन्तुः तदंशसम्भूततया तथाभूतत्वमित्यपि समाधेयम्।

(थ) आशंसनीयेति।—आशंसनीयं—प्रार्थनीयं, सततमाकाङ्क्षणीयमिति यावत्, पुण्यं—पवित्रं, निरतिशयपावनमित्यर्थः, दर्शनम्—अवलोकनं यस्य सः। स महात्मा—महात्मना रघुमणिरित्यर्थः। कथं—केन प्रकारेण, कीदृशोपचारेणेति यावत्। उपगन्तव्यः,—उपसेवितव्यः, सत्कर्त्तव्य इत्यर्थः। सम्प्रधारयामि—निश्चिनोमि; कीदृशेनोपचारेण असौ महापुरुषः अस्माभिरुपसर्पणीय इतीदानीं न स्थिरीकर्त्तुं शक्नोमि इति भावः।

लवः। यथा गुरुस्तथोपचारेण। (द)

कुशः। अपि कथं नामैतत्?

लवः। अत्युदात्तः सुजनश्चन्द्रकेतुः और्म्मिलेयः प्रियवयस्य इति सख्येन मामुपतिष्ठते, तेन तत्सम्बन्धेन च धर्म्मतात एवायं राजर्षिरिति। (ध)

कुशः। सम्प्रति करणीयो राजन्येऽपि प्रश्रयः। (न)

(द) यथा—यादृशेनोपचारेण। गुरुः,—पित्रादिरूपः महागुरुजनः इत्यर्थः, उपसेव्यते इति शेषः। तथोपचारेण—तादृशेनैव सत्कारेण; तस्मादविशेषेणैव उपचारेण पितृस्थानीयः महापुरुषोऽसौ अस्माभिः समभ्यर्चनीय इति भावः; प्रश्रयविनम्रमूर्त्तिर्द्धृक् भवान् तत्समीपमुपगच्छत्विति तात्पर्य्येण।

(ध) अत्युदात्तः,—अत्युदारचेताः, महामना इत्यर्थः। सुजनः,—निरतिशयसौजन्याधारः। और्म्मिलेयः,—ऊर्म्मिलायाः अपत्यं पुमानित्यर्थे [ऊर्म्मिलायाः "स्त्रीभ्यो ढक्" (४।१।१२० पा०) इति ढक्] ऊर्म्मिलानन्दन इत्यर्थः। (अतिस्नेहवत्ताद्योतनार्थं मातृनामोल्लेखः) प्रियवयस्य इति—प्रियबन्धुरिति सम्भाषणेनेति यावत्। सख्येन—मैत्र्या, सौहार्द्देनेति यावत्। मामुपतिष्ठते—मां समभ्युपैति; मया सह दृढां मैत्रीं करोतीति भावः। ["उपाद्देवपूजासङ्गतिकरण—" (वा०) इत्यात्मनेपदम्]। तेन तस्मात्; अमुना सह मैत्रीविधानादिति भावः। तत्सम्बन्धेन—तस्य—चन्द्रकेतोः, सम्बन्धेन—ज्येष्ठपितृत्वरूपसम्पर्केण; यतोऽयं चन्द्रकेतोः ज्येष्ठतातः, तेन हेतुनेति भावः। अयं राजर्षिः,—राजा भूत्वाऽपि क्षमादिगुणशतयोगात् ऋषिसन्निभः अयं रघुमणिः। [राजा चासौ ऋषिश्चेति कर्म्मधारयः]। धर्म्मतातः,—धर्मेण—लोकाचारानुसारेणेति यावत्, तातः,—पिता; पितृस्थानीय इति भावः; तेन हि पितृवदेवासौ सबहुमानमस्माभिरुपसेवनीय इति निगूढाशयः।

(न) सम्प्रति—अधुना, धर्म्मतातत्वसम्पर्कात् सम्प्रहारदशायामपीति यावत्। राजन्येऽपि—क्षत्रियेऽपि; जात्या आवयोः समे एतस्मिन् महापुरुषे रघुमणौ ततोऽप्यधिकपितृत्वसम्बन्धयोगादित्यपिकाराशयः। प्रश्रयः,—प्रणयः, विनयः इति यावत्; अनौद्धत्येनोपचार इति भावः। ("प्रश्रयप्रणयौ समौ" इत्यमरः) करणीयः,—विधातव्यः; क्षत्रियस्यापि मे अतीवपूज्यतमे क्षत्रिये पितृस्थानीये विनयित्वप्रदर्शनं

लवः। पश्यतु एनम् आकारानुभावगाम्भीर्य्यसम्भाव्यमान-विविधलोकोत्तरचरितातिशयमार्य्यो महापुरुषम्। (प)

कुशः। [निर्वर्ण्य]।—

अहो! प्रामोदिकं रूपमनुभावश्च पावनः।
स्थाने रामायणकविर्देवीं वाचं व्यवीवृधत्॥ २०॥

समुचितमेवेति भावः। ("करणीयः" इत्यत्र "अवचनीयः" इति पाठान्तरं दृश्यते, तत्र अवचनीयः,—अनिन्दनीयः इत्यर्थः; चापियत्वसाम्येऽपि गौरववत्त्वात् विनयित्व-प्रदर्शनं मे न दोषायेति भावः)।

(प) आकारेति।—आकारेण—सौम्यमूर्त्त्या, अनुभावेन—प्रभावेण, तथा गाम्भीर्य्येण—अनभिज्ञैरविज्ञायमाननिगूढहृद्गतभावेन च, सम्भाव्यमानः,—अनुमीयमानः, विविधः,—अनेकविधः, प्रभूत इत्यर्थः, लोकोत्तरः,—अलौकिकः, सर्वातिशायी इति यावत्, चरितातिशयः,—चारित्रोत्कर्षः, हरधनुर्भङ्गाहल्यामुक्तिसेतुबन्धनरावणवधादिरूप इत्यर्थः, यस्य तं, महापुरुषं—प्रधानं पुमांसम्; निसर्गसौम्येन आकारेण सर्व्वतेजोऽभिभाविना प्रभावेण चायं महापुरुषः हरधनुर्भङ्गप्रभृति लोकोत्तरं कार्य्यजातं सम्पादयितुमेव भूलोकमवतीर्ण इति सुस्फुटमेव प्रतीयते इति भावः; "यत्राकृतिस्तत्र गुणा वसन्ति" इति सामुद्रिकवचनादित्याशयः।

अथ रघुनाथो सर्व्वलोकविस्मयकरं रूपं प्रसमीक्ष्य महामुनेः प्राचेतसस्य यथायथं तत्प्रभाववर्णनानुगुणानां वाचां प्राक् ततः विधिवत् स्वैरधीतानां सम्यक्तां निरपवादत्वञ्च विशिष्य प्रतिपादयति, अहो इत्यादिना।—अहो!—अतीव विस्मयकरम्; प्राक् कदाऽपि एवंविधस्य रूपस्य नयनपथेषु अपरिपतनादिति भावः; प्रामोदिकं निरतिशयहर्षसंविधायकं, रूपं लावण्यम्; अस्मिन् मोहनीये रूपे नयनपथे समापतिते एव कुतश्चिदेव देशात् अप्रज्ञातः अननुभूतपूर्व्वश्च अमृतायमानः आनन्दसन्दोहः शोकनिर्द्दग्धमरुमयेऽपि मानसपथे समुदेतीति भावः। ("प्रामोदिकम्" इत्यत्र "प्रासादिकम्" इति पाठान्तरं दृश्यते, प्रसादगुणपरिचायकमिति तदर्थः, प्रसादो हि विशुद्धिः अनुग्रहप्रवणता वा, तथाच एतादृगनवद्यरूपवानयं ननु निरतिशयविशुद्धचित्तः कृपालुहृदयो वा भवेदिति तु तात्पर्य्यम्)। अपिच, पावनः पवित्रश्च, अनुभावः प्रभावः; आर्त्तत्राणायैव शस्त्राणां परिग्रहात् कदाचिदपि अनागसामपरिपीडकत्वाच्च, सततविपन्नोद्धारवद्धपरिकरस्य महाप्राणस्यास्य तेजोऽपि निरतिशयपवित्रताऽऽधायकमेवेति भावः; अतः रामायणकविः रामायणमहाकाव्यस्य रचयिता महर्षिः

[उपसृत्य]। तात ! प्राचेतसान्तेवासी कुशोऽभिवादयते। (फ)

रामः। एहि आयुष्मन् !—

अमृताध्मातजीमूतस्निग्धसंहननस्य ते।
परिष्वङ्गस्य वात्सल्यादयमुत्कण्ठते जनः ॥ २१ ॥

भगवान् प्राचेतसः, स्थाने योग्यपात्रे; स्वस्य हि वाचां यथा पावनत्वं, तथैव स्वप्रतिपाद्यवस्तुनः सर्वाधिकपवित्रत्वादित्याशयः; यद्वा—स्थाने सम्यक्, युक्तमेवेत्यर्थः; समीचीनस्य विषयस्योपवर्णनात्, सुयोग्यविषयोपवर्णनेन स्वकाव्यप्रणयनप्रयासस्य साफल्योदयादिति भावः; देवीं वाचं वाग्देवीं, स्वस्य निर्गलन्तीं भारतीमिति यावत्; व्यवीवृणत्—विवृतवान्, व्यग्रथ्नादित्यर्थः; कृतिनः महामुनेः वाग्विगुम्फनं धीरोदात्तनायकरूपविशुद्धविषयलाभात् सातिशयं हृद्यमभूदिति भावः। [वृणोतेः तानादिकात् धातोः णिचि लुङि रूपं, "व्यवीवर्णत्" इत्यप्यत्र पदान्तरं भवतीति विभाव्यम्। अत्र तु "व्यवीवृतत्" इति पाठान्तरं दृश्यते, तत्रापि स एवार्थः। अत्र भगवतो रघुमणेः प्रभाववर्णने एकस्मिन् प्रामोदिकरूपकारणे सत्यपि पावनानुभावरूपस्य हेत्वन्तरस्योपादानात् समुच्चयोऽलङ्कारः; अपिच परार्द्धं प्रति पूर्वार्द्धस्य हेतुतयोपन्यासात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः, एतयोः सापेक्षतया संस्थितेः सङ्करः]। पथ्यावक्त्रं वृत्तम् ॥ २० ॥

(फ) उपसृत्य—उपगम्य, रामस्यान्तिकमागम्येत्यर्थः। तात !—पितः, अविज्ञातसम्बन्धस्य कुशस्यैतत् सम्बोधनं चन्द्रकेतुना सह भ्रातुर्लवस्य मैत्रीसंस्थापनकृतमिति ज्ञेयम्। प्राचेतसस्य—वाल्मीकेः, अन्तेवासी—शिष्यः। अभिवादयते—नमस्यति। [अभिपूर्व्वको वदधातुः णिचि नमस्कारे वर्त्तते, फलवत्कर्त्तरि आत्मनेपदम्]।

अथेदानीं रघुमणिरप्रज्ञातसम्बन्धोऽपि स्वपुत्रे कुशे नैसर्गिकवात्सल्योदयात् तदङ्गसंश्लेषजं सुखं समनुभवितुमौत्सुक्यमावेदयति, अमृतेति।—अयं जनः रामरूपोऽहम् इत्यर्थः, वात्सल्यात् स्नेहात्, त्वां दृष्ट्वा अकस्मात्समुद्भूतस्नेहविवशकायः सन्नित्यर्थः, अमृतेन जलेन, ("अमृतं यज्ञशेषे स्यात् पीयूषे सलिले घृते।" इति मेदिनी) आध्मातः परिपूर्णः; सजलनवजलधरस्यातीव स्निग्धकरत्वादित्याशयः; यद्वा—अमृतं पीयूषमयमित्यर्थः, आध्मातं शब्दितं, ध्वनिरिति यावत्, यस्य तथाभूतः, ("आध्मातः शब्दिते दग्धे वातदरभेदसंयुते।" इति मेदिनी) स्निग्धगम्भीरनिर्घोष इति भावः; यः जीमूतः मेघः, [जीवनं जलं, तत् मूतं बद्धमनेनेति विग्रहे पृषोदरादित्वात् साधु; यद्वा—जिनातीति जीः जराजीर्णः इत्यर्थः, तेन मूयते बध्यते असौ इति व्युत्पत्त्या,

[परिष्वज्य स्वगतम्]। तत् किमपत्यमयं दारकः ? (व)—

अङ्गादङ्गात् स्रुत इव निजः स्नेहजो देहसारः

प्राटुर्भूय स्थित इव बहिश्चेतनाधातुरेव ।

जिनातेः कर्त्तरि क्विपि, भवतेः चौरादिकस्य कर्म्मणि निष्ठायां रूपम् इति जीमूत-शब्दसिद्धिः ; अथवा—जीवस्य मूतः पटबन्ध इव इति विग्रहः]। तद्वत् स्निग्धं मसृणं, सुखस्पर्शमिति यावत् ["उपमानानि सामान्यवचनैः" (२।१।५५ पा०) इति उपमितसमासः]। संहननं वपुः यस्य तथाभूतस्य ; ("गात्रं वपुः संहननम्" इत्यमरः) नवजलधरसुशीतलकोमलकलेवरस्येति भावः ; ते तव, [कृद्योगात्कर्म्मणि षष्ठी] परिष्वङ्गस्य समालिङ्गनस्य, ["षष्ठी शेषे" (२।३।५० पा०) इति सम्बन्धमात्र-विवक्षायां षष्ठी । "परिष्वङ्गाय" इति पाठे तु—परिष्वङ्गाय समाश्लेषाय, त्वां परिष्वङ्-क्तुमित्यर्थः, "तुमर्थाच्च भाववचनात्" (२।३।१५ पा०) इति चतुर्थी] उत्कण्ठते समु-त्सुको भवति, व्याकुलीभवतीत्यर्थः, "सर्व्वेन्द्रियसुखास्वादो यत्रास्तीत्यभिमन्यते । तत्प्राप्तीच्छां ससङ्कल्पामुत्कण्ठां कवयो विदुः ॥" इत्युत्कण्ठालक्षणात् । तथा चैवमभि-लाषुको भवतीति वा भावः । [अत्र समासेन जीमूतेन सह संहननस्यावैधर्म्यसाम्योप-देशात्समासगतोपमाऽलङ्कारः]। पथ्यावक्त्रं वृत्तम् ॥ २१ ॥

(व) तत्—तर्हि । अयं दारकः,—बालकः, कुशः इत्यर्थः । किमपत्यम् ?—मम औरसः तनयः किमु ? ; नो चेदेवं, तदा अस्य समालिङ्गने एतादृशानिर्व्वचनीय-सुखस्योदयासम्भवादिति भावः ।

अथ स्वस्य अपत्यसमालिङ्गनसदृशानिर्व्वचनीयसुखसमुद्भूतिप्रकारमाह,—अङ्गा-दिति ।—निजः स्वकीयः, मदीय इति यावत्, स्नेहजः वात्सल्यातिरेकात्समुद्भूतः, देहसारः देहस्य शरीरस्य, सारः स्थिरांशः ; यद्वा—देहे मांसपिण्डमये निरुपमरूपा-धारे अस्मिन् शरीरे, यः सारः लावण्यराशिः एवेत्यर्थः, अङ्गात् अङ्गात् प्रत्यवयवात्, सर्व्वेभ्यः अङ्गेभ्यः इत्यर्थः, स्रुतः इव चरित इव, संस्थितोऽयमित्यन्वयः ; मम शरीरस्य संरक्षकः प्रवर्द्धकश्च आन्तरः सारसमुदायः विगलितो भवन् झटिति अभ्यन्तर-प्रदेशात् बहिर्निःसृत्य पिण्डीभूतः दारकरूपेण संस्थित इवेति मन्ये इति भावः ; अमुष्य बालस्य समाश्लेषसमकालं हि मम शरीरोपादानकः सारसमुदायः तूर्णं द्रवीभूय बहि-र्विगलितो भवतीवेति मन्ये, तत्क्षणे शरीरस्य सपदि विवशभावोदयात् इति ज्ञेयम् ; "अङ्गादङ्गात्सम्भवसि हृदयादभिजायसे" इत्यादिश्रुतौ पुत्रस्य स्वशरीराभिन्नत्वोत्कीर्त्तना-दित्थं द्रव्योत्प्रेक्षेति विभाव्यम् ; चेतना चैतन्यं, ज्ञानमित्यर्थः, स एव धातुः शरीर-

सान्द्रानन्दक्षुभितहृदयप्रस्रवेणेव सृष्टो
गात्रं श्लेषे यदमृतरसस्रोतसा सिञ्चतीव ॥ २२ ॥

लवः। तात! ललाटन्तपो घर्मदीधितिः, तदत्र सालच्छाये मुहूर्त्तमासनपरिग्रहं करोतु तातः। (भ)

धारकवातपित्तादिवस्तुनिचयः, तत्तद्वस्तुनिचयानामविकृतिभावेन सत्तायामेव चैतन्यस्य सत्त्वात् तत्र तदभेदारोप इत्यवधेयम्; स एव प्रादुर्भूय आविर्भूय, शरीराभ्यन्तरात् निःसृत्येत्यर्थः, बहिः बहिर्देशे, स्थित इव वर्त्तमान इव, अयं दारक इत्यन्वयः; अयं मूर्त्तिमान् मे चैतन्यपदार्थ इव प्रतिभाति, अन्यथा कथं हि समालिङ्गनसमये तदद्भुतसुखोपभोगसमकालं चैतन्यलोपः सञ्जायते इत्यवधेयम्; यत् यतः, सान्द्रः प्रगाढ़ः, यः आनन्दः हर्षः, तेन क्षुभितम् आलोड़ितं, यत् हृदयम् अन्तःकरणं, स एव प्रस्रवः प्रस्रवणं, निर्झरः इत्यर्थः, तेन; निविड़ानन्दोदयात् स्वतः संक्षुब्धेन हृदयोत्सेनेति भावः; सृष्टः इव निर्मित इव, अयं दारकः इति प्रागुक्तेनान्वयः; अन्तःसंक्षुभ्यमाणस्य निर्झरस्य बहिः प्रकटीभाववत् तत्समये सहसा चञ्चलीभूतस्य हृदयस्यापि अभ्यन्तरदेशात् दारकरूपतया बहिः प्रकटनमुत्प्रेक्षितमिति वेदितव्यम्। श्लेषे एतस्य समालिङ्गनावसरे, गात्रं मदीयं सकलमेवाङ्गम्, अमृतरसस्रोतसा अतिप्रभूतेन पीयूषरसप्रवाहेण, सिञ्चतीव अभिवर्षतीव; प्रतिप्रतीकमेवासामान्यसुखोदयादिति भावः; अस्य दारकस्य परिष्वङ्गसमये एवं हि मे अननुभूतपूर्वेण हर्षातिशयेन अनुभूयते, यदसौ दारकः मे शरीरभारं बहिर्विगलितमिव कुर्व्वन्, चेतनामपि सर्व्वदैव विलोपयन्, अकस्मात् निर्म्मलानन्दसन्दोहं प्रस्रवणरूपेण बहिः सम्यगाविर्भावयंश्च मोहविवशानि मदङ्गानि सुधारसधारासु निमज्जयतीवेति मन्ये इति समुदिततात्पर्य्यम्। [अत्र दारकस्य सुतस्नेहसाररूपत्वेन तथा धातुरूपत्वेन चोत्कीर्त्तनात् द्रव्योत्प्रेक्षाऽलङ्कारः, अपिच अमृतरसस्रोतसा सेचनासत्त्वेऽपि सेचनोत्कीर्त्तनात् क्रियोत्प्रेक्षाऽलङ्कारः, चेतनायां धातोरभेदाध्यासाच्च रूपकमलङ्कारः, इत्येषां चतुर्णां परस्परमपेक्षतया संस्थितिः सङ्कर इति ज्ञेयम्। "स्नेहजो देहसारः" इत्यत्र "देहजः स्नेहसारः" इति पाठान्तरं दृश्यते, तत्रापि नास्ति कश्चित् अर्थगतो विशेष इति ज्ञेयम्]। मन्दाक्रान्ता वृत्तम् ॥ २२ ॥

(भ) ललाटन्तपः,—भालदेशसन्तापकारः, अतिप्रदीप्तः इत्यर्थः। [ललाटं तपतीति व्युत्पत्त्या "असूर्य्यललाटयोर्दृशितपोः" (३।२।३६ पा०) इति खश्प्रत्ययः]। घर्माः,—उष्णाः, दीधितयः,—किरणाः यस्येति घर्मदीधितिः,—सूर्य्यः। सालस्य—

रामः । यदभिरुचितं वत्साय । (न)

सर्वे । [परिक्रम्य उपविशन्ति] ।

रामः । [स्वगतम्] ।—

अहो ! प्रश्रययोगेऽपि गतिस्थित्यासनादयः ।
साम्राज्यशंसिनो भावाः कुशस्य च लवस्य च ॥ २३ ॥

वपुरविहितसिद्धा एव लक्ष्मीविलासाः
प्रतिजनकमनीयं कान्तिमत् केतयन्ति ।

वृक्षविशेषस्य, छाया इति सालच्छायं तस्मिन् ["विभाषा सेनासुरा--" (२।४।२५ पा०) इति पाक्षिकं क्लीवत्वम्] सज्जंतरुतले । मुहूर्त्तं—कियन्तं कालमित्यर्थः । ["कालाध्वनो—" (२।३।५ पा०) इति व्याप्त्यर्थे द्वितीया] । आसनस्य परिग्रहः,—स्वीकारः तम् उपवेशनमित्यर्थः । करोतु—विदधातु ।

(न) यत्—यादृशं कर्मेत्यर्थः । अभिरुचितं—रुचेः विधायकं, रोचते इत्यर्थः । वत्साय—स्नेहास्पदाय, आयुष्मते तुभ्यं यदेवाभिरोचते, तदेव क्रियते मयेत्यर्थः । ["रुच्यर्थानां प्रीयमाणः" (१।४।३३ पा०) इति चतुर्थी । वत्सस्य प्रीयमाणत्वात् सम्प्रदानत्वम्] ।

अथ कुमारयोः विनम्रमूर्त्तिधरयोः चक्रवर्त्तिलक्षणयोगं समालोक्य तत्र सार्व्वभौमपदभाक्त्वं वितर्कयति, अहो इति ।—प्रश्रयस्य विनयस्य, योगेऽपि सम्बन्धेऽपि, यद्यप्येतौ मुनिवत् प्रशान्तचेतसौ दृश्येते तथाऽपीत्यर्थः, कुशस्य च लवस्य च तदाख्ययोरेतयोः बालयोः, गतिः गमनं, पादविक्षेपादिकमित्यर्थः, तथा स्थितिः अवस्थानं, निर्व्यापारतया अवस्थितिरित्यर्थः, अपिच आसनम् उपवेशनं, तानि एव आदयः येषां ते तथाभूताः, आदिशब्दात् भाषणवीक्षणादेः परिग्रहः ; भावाः अवस्थाः ; शरीरसम्पाद्यक्रियासमूहा इति भावः ; साम्राज्यशंसिनः राज्यलक्ष्मीलाभसंसूचकाः, भवन्तीति शेषः ; तथाहि सामुद्रके—"अकर्म्मकठिनौ हस्तौ पादावध्वनि कोमलौ । यस्य पाणितलौ रक्तौ तस्य राज्यं विनिर्द्दिशेत् ॥" इति । यद्यप्येतौ मुनिबालकाविव तपोवननिवासमुलभं गमनमुपवेशनादिकञ्च बिभ्रतः, तथाऽप्येतौ न हि ब्राह्मणतनयौ, क्षत्रियोचितौद्धत्यादेरसत्त्वेऽपि एतयोः बहुशः तत्तोविशेषविभावितराजलक्ष्मीलाभविज्ञापकानि चिह्नानि दृश्यन्ते, अतः राजन्यवंशसम्भूतौ एतौ इति तर्कयामि इति तु समुदितार्थः ॥ २३ ॥

- अपिच प्रकारान्तरेण भाविसाम्राज्यलक्ष्मीलाभसूचकान् भावविशेषान् विवृणोति,

अमलिनमिव रत्नं रश्मयस्ते मनोज्ञा
विकशितमिव पद्मं विन्दवो माकरन्दाः ॥ २४ ॥

भूयिष्ठाञ्च रघुकुलकुमारच्छायामनयोः पश्यामि। (य)—

कठोरपारावतकण्ठमेचकं
वपुर्वृषस्कन्धसवन्धुरांशकम्।

वपुरित्यादि।—ते प्रसिद्धाः, मनोज्ञाः हृदयग्राहिणः, रश्मयः दीधितयः, अमलिनं समुज्ज्वलं, रत्नमिव भास्वरमणिविशेषमिव ; मकरन्दः पुष्परसः, तस्य इमे माकरन्दाः पुष्परससम्बन्धिन इत्यर्थः, [मकरन्दशब्दात् तत्सम्बन्धार्थे अण्] विन्दवः कणाः, विकसितं प्रस्फुटितं, पद्ममिव कमलमिव ; यथाहि मनोहररश्मिराजयः सुविशुद्धरत्नं समधिकं विभूषयन्ति, यथा वा पुष्परसलवाः प्रफुल्लपद्मप्रसूनं सातिशयं समलङ्कुर्व्वन्ति, तथैवेत्यर्थः, अविहितसिद्धाः नास्ति विहितं विधानं, प्रयत्नः इति यावत, यस्मिन् कर्म्मणि तद्यथा स्यात्तथा, सिद्धाः स्वयमुत्पन्नाः, कमपि प्रयत्नं विनैव समुद्भूता इति यावत्, लक्ष्म्याः सौन्दर्य्यस्य, विलासाः विलसितानि, स्फुरणानि इति यावत्, लक्ष्मीविलासा एव सौन्दर्य्यस्फुरणानि एव, लावण्यसम्पत्तय एव इति यावत्, प्रतिजनकमनीयं सर्व्वजनमनोहरं, कान्तिमत् सौन्दर्य्यपूर्णं, वपुः शरीरं, कुशलवयोरिति शेषः, केतयन्ति अलङ्कुर्व्वन्ति, निरुपमस्वाभाविकरूपराशयः मनोहरमेतच्छरीरं सुशोभयन्ति इत्यर्थः ; असामान्यलावण्यपरिस्फूर्त्तिः स्वाभाविकसौन्दर्य्याकरं वालयोरेतयोरेतत्कलेवरं न हि विजहाति, प्रत्युत रश्मयः रत्नमिव मकरन्दविन्दवः पद्ममिव च एतयोः शरीरं नितरां सुशोभयति, निसर्गसौन्दर्य्यस्य कदाऽप्यनपायात् इति भावः ; तथाच नूनमेतौ साम्राज्यलक्ष्मीधरौ अचिरादेव भविष्यत इति विभाव्यते इत्याशयः। [धातूनामनेकार्थत्वात् चौरादिकस्यामन्त्रणार्थकस्यापि केतधातोः भूषणार्थे लटि रूपम्। अत्र लक्ष्मीविलासानां रश्मिभिः मकरन्दविन्दुभिश्च साङ्गसवैधर्म्यसाम्योपदेशादुपमेऽलङ्कारौ निरपेक्षतया स्थितत्वेन संसृष्टौ]। मालिनी वृत्तम् ॥ २४ ॥

(य) भूयिष्ठां—वहुलाम्। [वहुशब्दात् इष्ठनि "इष्ठस्य यिट् च" (६।४।१५९ पा०) इति वहोर्भूरादेशः इष्ठस्य लोपः यिडागमश्च]। रघुकुलस्य—रघुवंशस्य, यः कुमारः,—बालकः, तस्य छायां—प्रतिविम्बं, सादृश्यमित्यर्थः। ("छाया सूर्य्यप्रिया कान्तिप्रतिविम्बमनातपः।" इत्यमरः) रघुवंशीयकुमारा यां शरीरशोभां विभ्रति, सैवाविसंवादिनी शोभा एतयोः बालयोः परिदृश्यते इति भावः।

अथेदानीं तत्सादृश्यं स्फुटीकृत्योपपादयति, कठोरेति।—वपुः शरीरम्, एतयो।

प्रसन्नसिंहस्तिमितञ्च वीक्षितं
ध्वनिश्च माङ्गल्यमृदङ्गमांसलः ॥ २५ ॥

बालयोरिति शेषः, कठोरः परिपुष्टाङ्गः, तरुण इति यावत, यः पारावतः कपोतः, तस्य कण्ठः इव गलदेश इव, मेचकं श्यामलं, पूर्णावयवपारावतकण्ठदेशसदृशं श्यामभास्वरमित्यर्थः, अपिच वृषस्य स्कन्ध इव स्कन्धौ भुजशिरसी यस्मिन् तत् तथोक्तं, स्थूलस्कन्धमित्यर्थः, तथा अबन्धुराः अनुन्नतानताः, समाः इत्यर्थः, मांसला इति यावत्, अंशाः अवयवाः यस्य तत्, सर्वावयवानवद्यमित्यर्थः, ["शेषाद्विभाषा" (५।४।१५४ पा०) इति बहुव्रीहौ कप्] दृश्यते इति शेषः, ("अबन्धुरांसकम्" इति पाठे—अबन्धुरौ अंसौ भुजोपरिभागौ यत्र तादृशम् ; अस्मिन् पक्षे "वृषस्कन्धम्"इत्यत्र स्कन्धशब्देन भुजशिरसः उपरिभागो ग्रीवैकदेशो बोध्यः) अपिच वीक्षितम् अवलोकनं, प्रसन्नञ्च तत् सिंहवत् स्तिमितञ्च इति प्रसन्नसिंहस्तिमितं [विशेषणकर्मधारयः] प्रसन्नं निर्मलं, प्रसादगुणभूयिष्ठत्वादनुद्वेजकमित्यर्थः, तथा सिंहवत् स्तिमितञ्च निश्चलञ्च, सिंहस्य दृष्टिः यथा प्रशान्तं निर्भयं गाम्भीर्य्यव्यञ्जकञ्च दृश्यते, तथा एतयोरपीति भावः ; तथा ध्वनिश्च निनादश्च, कण्ठस्वरश्चेत्यर्थः, माङ्गल्यस्य मङ्गलसूचकस्य, अनुद्धतं विराविणः इत्यर्थः, मृदङ्गस्येव वाद्यभेदस्येव, मांसलः मन्द्रः, कर्णसन्तर्पणः इत्यर्थः ; स्निग्धगम्भीरः इति भावः ; [मांसशब्दात् अस्त्यर्थे लच्प्रत्ययः] अनुभूयते इति शेषः। [अत्र सिंहस्येव स्तिमितं, मृदङ्गस्येव च मांसलः इति विग्रहेण प्रोक्तस्थलद्वये "उपमानानि सामान्य—" (२।१।५५ पा०) इति उपमानसमासः, उपमेयभूतयोः बालयोः उपमानतया उपन्यासादिति ज्ञेयम् ; यतो हि रघुकुलसन्तानानामिव एतयोः बालकयोः शरीरं नवजलधरश्यामरुचिरं मांसलं स्थूलं वलिष्ठञ्च दृश्यते, वीक्षणमपि धीरम् अनुद्वेगकरं, तथा कण्ठस्वरोऽपि गम्भीरः सुमधुरश्च प्रतीयते, ततः नूनमेतौ रघुकुलाङ्कुरौ भवत इति मन्ये इति भावः। [अत्र समासेन पारावतकण्ठेन सह वपुषः, वृषस्कन्धेन सह स्कन्धस्य, सिंहवीक्षणेन सह वीक्षणस्य, तथा मृदङ्गध्वनिना सह कण्ठध्वनेः अवैधर्म्यसाम्योत्कीर्त्तनात्, समासगता लुप्ताः चतस्र उपमाः अलङ्काराः, तासाञ्च नैरपेक्ष्येण संस्थितः संसृष्टिरिति ज्ञेयम्। अत्र सिंहस्येव स्तिमितमेतयोः वीक्षितं, तथा मृदङ्गस्येवैतयोः ध्वनिः मांसलः इति उपमानसमासाश्रयणात्, उपमानोपमेयभावमहिम्नैव सिंहवीक्षणसदृशस्तिमितवीक्षणस्य मृदङ्गध्वनिसदृशमांसलध्वनेः अर्थवशसम्पन्नतया लाभेन लक्षणां विनाऽप्युपपत्तेः "कमलि चरणाघातं मुखं सुमुखि ! तेऽकरोत्" इत्यत्र यथा मुखस्य चरणयोः सर्व्वथैवासम्भवात् स्फुटतरार्थसङ्गतये चरणाघातशब्दस्य

[सूक्ष्मं निरूप्य]। अये! न केवलमस्मदङ्गसंवादिनी आकृतिः। (र)—

अपि जनकसुतायास्तच्च तच्चानुरूपं
स्फुटमिह शिशुयुग्मे नैपुणोन्नेयमस्ति।
ननु पुनरिव तन्मे गोचरीभूतमक्ष्णो-
रभिनवशतपत्रश्रीमदास्यं प्रियायाः॥ २६॥

निर्जितत्वार्थकत्वमङ्गीकृत्य अशक्तिकृता हि लक्षणा स्वीकृता, तथैव रूढिप्रयोजनविनाकृतलक्ष्यार्थप्रकाशनरूपनेयार्थत्वदोषः नाशङ्कनीय इत्यवधेयम्]। वंशस्थविलं वृत्तम्॥ २५॥

(र) सूक्ष्मं निरूप्य—सविशेषमवलोक्य, निपुणतरं विभाव्येत्यर्थः। अस्मदङ्गं—मदीयावयवं, संवदति—अनुकरोति या तथाविधा अस्मदङ्गसंवादिनी—मदङ्गानुरूपा, अनयोराकृतिर्न केवलं मदाकृतिसौसादृश्यशालिनीत्यर्थः।

अत्र बालकद्वये न केवलं मदवयवसाम्यम्, अपि तु वैदेह्याः सौसादृश्यं दृश्यते इत्याह, अपीति। इह अत्र, शिशुयुग्मे बालकद्वये, नैपुणेन निपुणतया, उन्नेयं ज्ञायतावं, प्रणिधानगम्यमित्यर्थः, तच्च तच्च प्रसिद्धं, मया प्राक् सततमेव परिलक्षितमित्यर्थः, जनकसुताया अपि वैदेह्या अपि, मत्प्राणसमायाः सीताया अपीत्यर्थः, अनुरूपं सौसादृश्यं, [रूपस्य योग्यम् इत्यानुरूप्येऽव्ययीभावः] स्फुटं सुव्यक्तम्, अस्ति विद्यते; न केवलं मम, अपि तु सीतायाः अङ्गलावण्यं वाङ्माधुर्यं दृष्टिविक्षेपादिकञ्च सर्व्वमेवात्राविरुद्धभावेनैवास्तीति दृश्यते इति भावः। एतदेव प्रमाणयितुं सीतायाः पुनः प्रत्यक्षायमाणतामाह, नन्विति।—ननु वितर्के, तत् प्राक् बहुशो दृष्टमित्यर्थः, अभिनवं सद्यःप्रस्फुटितं, यत् शतपत्रं पद्मं, तदिव श्रीमत् रमणीयं, प्रियायाः प्राणसमायाः सीतायाः, आस्यं वदनं, पुनः भूयः, मे अक्ष्णोः मम नयनयोः, गोचरीभूतमिव विषयीभूतमिव, नयनपथमापतितमिवेत्यर्थः; ध्रुवम्, इदानीमेवाहं तत् मे प्रियामुखं पुनः पश्यामीति भावः। [अत्राक्षोरगोचरीभूतेऽपि तदास्ये तद्गोचरीभूतत्वोत्कीर्त्तनेन उत्कटैककोटिकसंशयोदयात् उत्प्रेक्षाऽलङ्कारः, समासेन शतपत्रश्रिया अवैधर्म्यसाम्योक्तेरुपमा समासगता, सादृश्यदर्शनेन सीतामुखस्मरणोदयाच्च स्मरणालङ्कारः, एतेषाञ्चान्योऽन्यसापेक्षतया स्थितेः सङ्करः]। मालिनी वृत्तम्॥ २६॥

मुक्ताच्छदन्तच्छविदन्तुरेयं
सैवौष्ठमुद्रा स च कर्णपाशः।
नेत्रे पुनर्यद्यपि रक्तनीले
तथाऽपि सौभाग्यगुणः स एव ॥ २७॥

सीतायाः सौसादृश्यं पुनरपि विशदीकृत्य प्रदर्शयति, मुक्तेति।—मुक्ता इव मौक्तिकानीव, अच्छाः विशदाः, ये दन्ताः दशनाः, तेषां या छविः कान्तिः, तया दन्तुरा उन्नतानता; आलापसमये मुक्ताफलधवलदन्तकान्तीनां समन्तात् विसरणशीलतया सर्व्वत्र समभावेन अपरिपतनात् बन्धुरवत् प्रतीयमानेति भावः; धवलदन्तकिरणमनोहारिणीत्याशयः; ("दन्तुरस्तून्नतरदे तथोन्नतानते त्रिषु।" इति मेदिनी। "मुक्ताच्छदन्तच्छविसुन्दरी" इति तु कुत्रचित् पाठः, तदर्थस्तु स्फुट एव)। इयं प्रत्यक्षं दृश्यमाना, शिशुयुग्मसम्बन्धिनी इत्यर्थः, ओष्ठमुद्रा ओष्ठयोः मुद्रा आवरणम्, ओष्ठाधरावित्ति यावत्, सैव सीताऽनुरूपा एव; एतयोः दशनवाससी सर्व्वथा सीतारदनच्छदसाम्यं बिभ्रत एवेति भावः; स च सीतासम्बन्धी एव, कर्णपाशः शोभनकर्णः, (पाशशब्दस्य केशोत्तरवर्त्तित्वे सङ्घार्थकत्वं, कर्णोत्तरवर्त्तित्वे तु शोभनार्थकत्वं ज्ञेयं, तथा च मेदिनी "पाशः केशादिपूर्व्वः स्यात् तत्सङ्घे कर्णपूर्व्वकः। सुकर्णे च" इत्यादि। "प्रशंसावचनैश्च" (२।१।६६ पा०) इति समासः)। पुनः किन्तु, यद्यपि, नेत्रे नयने, एतयोर्बालयोरिति शेषः, रक्तनीले प्रान्ते लोहिते तारकायाञ्च श्यामे, नीललोहिते इति यावत्; पितुर्विलोचनानुकारित्वादित्याशयः; ["वर्णो वर्णेन" (२।१।६९ पा०) इति समासः]। तथाऽपि एवं सीतानयनवैषम्ये विद्यमानेऽपीति भावः; स एव सीताऽनुरूप एव, सौभाग्यगुणः सौन्दर्य्यलक्ष्मीविलासः; पुंस्त्वयोगात् रक्तिमांशे सम्यक् तत्साम्याभावेऽपि नीलिमांशे सौसादृश्यमस्त्येवेति भावः; यतः सीतानेत्रसाम्यमत्र सातिशयं विद्यते, तर्हि एतत् तस्या एवापत्ययुगलमिति शङ्का न हि सपदि मानसपथात् साकल्येनापसरतीति हृदयम्। पुरुषाणां नेत्रयोः रक्तिमा नीलिमा च यथा शुभलक्षणं, स्त्रीणान्तु न तथा, इति सामुद्रिका आमनन्ति। [कथं हि अन्यदन्तच्छविमपरः धारयेदिति बिम्बानुबिम्बभावमुद्रया तद्दन्तच्छविसादृश्यप्रतीतेः असम्भवद्वस्तुसम्बन्धरूपो निदर्शनाऽलङ्कारः, समासेन मुक्तानां दन्तसाधर्म्योत्कीर्त्तनाच्च समासगतोपमेति सङ्करः, सीतायाश्चैताभ्यां बालकाभ्यां

तदेतत् प्राचेतसाध्युषितमरण्यं, यत्र किल देवी परित्यक्ता। इयञ्च अनयोराकृतिर्वपुश्च। यदपि स्वतःप्रकाशानि अस्त्राणीति, तत्र विमृशामि, अपि खलु तच्चित्रदर्शनप्रासङ्गिकमस्त्राभ्यनुज्ञानमुद्भूतं स्यात्? न हि असाम्प्रदायिकानि अस्त्राणीति पूर्वेषामपि अनुशुश्रुम। अयञ्च संप्लवमानमात्मानं सुखातिशयो हृदयस्य मे विस्रम्भयते। भूयिष्ठञ्च मया द्विधा प्रतिपन्नो देव्या गर्भभार आसीत्। (ल) [सास्रम्]।—

नैवरक्तिमांशे न्यूनत्वप्रतीतेः व्यतिरेकालङ्कारश्च व्यज्यते, इत्यलङ्कारध्वनिः]। वृत्तमुपजातिः॥ २७॥

(ल) एतत्—पुरो दृश्यमानमित्यर्थः। प्राचेतसेन—वाल्मीकिना, अध्युषितम्—अधिष्ठितम्। तत् अरण्यं—वनं, जनस्थानमिति यावत्; वाल्मीकेराश्रमपदमिति भावः। यत्र किल—यस्मिन्नेवारण्ये। देवी—जानकी। परित्यक्ता—निर्वासिता, कुमारलक्ष्मणेनेति शेषः। इयञ्च—सीतासदृशी इत्यर्थः। अनयोः,—बालयोः। आकृतिः,—शरीरसङ्घटनपद्धतिः। वपुश्च—शरीरञ्च। यदपि—यच्च, उक्तं प्राक् लवेनेति शेषः। स्वतः,—स्वेनैव, गुरूपदेशमन्तरेणेत्यर्थः, प्रकाशः,—आविर्भावः येषां तानि। अस्त्राणि—जृम्भकाऽऽस्त्राणि। तत्र—जृम्भकास्त्राणां स्वतःप्रकाशे; तेषामाजन्मसंसिद्धाविति भावः। विमृशामि—अवधारयामि। अपि खलु—किमु एतदित्यर्थः। चित्रदर्शनप्रासङ्गिकं—सीतायै चित्रपटप्रदर्शनावसरे मया प्रस्तावक्रमेणोक्तम्। अस्त्राभ्यनुज्ञानं—जृम्भकास्त्राणां मया स्वतःप्रकाशानुमोदनम्, आलेख्यप्रदर्शनसमये "सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्ति" इति मया अनुमोदितमित्यर्थः। उद्भूतं—फलवज्जातमित्यर्थः। स्यात्?—भवेत्; मदभ्यनुज्ञावशेनैवैतेषामत्र समुदयः समजनीति भावः। कुतः एवं तर्क्यते, तदेव सोपपत्तीकरोति, न हीति।—सम्प्रदायः,—गुरुपरम्परा, तं विना समुद्भूतानि असाम्प्रदायिकानि—गुरुपारम्पर्य्योपदेशादृते अनधिगमनीयानीत्यर्थः। पूर्वेषां—पूर्व्वतनानां, ब्रह्मक्षत्राद्यादीनामित्यर्थः। अस्त्राणि—आयुधानि, जृम्भकास्त्राणीत्यर्थः। न हि अनुशुश्रुम—नैव आकर्णितवन्तः; पूर्वैरपि केश्चित् गुरूपदेशाद्विना एतादृशानि अस्त्राणि लब्धानीति कदाचिदप्यस्माभिर्नाकर्णितमिति भावः। [श्रणोतेः लिटि रूपं, केचित्तु लिटि उत्तमपुरुषप्रयोगस्य क्वचिदप्य-

पुराऽऽरूढ़े स्नेहे परिचयविकासादुपचिते
रहो विस्रब्धाया अपि सहजलज्जाजड़दृशः ।
मयैवादौ ज्ञातः करतलपरामर्शकलया
द्विधा गर्भग्रन्थिस्तदनु दिवसैः कैरपि तया ॥ २८ ॥

दर्शनात् असनीचीनतामाहुः, सत्यप्येवमेकत्वप्रयोगस्य प्रथमपुरुषैकत्वाभिन्नतया तथात्वेऽपि अत्र बहुले प्रयोगस्य तु तथाभूतत्वाभावात् तथात्वोक्तिरिति ज्ञेयम्]। अयच मे हृदयस्य सुखातिशयः,—आनन्दातिरेकः, कुशलवयोरवलोकननिबन्धनः सुखसन्तान इत्यर्थः। संप्लवमानं—निमज्जन्तम्; आनन्दप्रवाहे इति भावः। आत्मानं विस्रम्भयते—प्रत्याययति, "तवैव एतौ तनुजौ" इति प्रतीतिमुत्पाद्य आश्वासयतीत्यर्थः; अन्यथा बालयोरेतयोर्दर्शनानन्तरमेव कथमियान् मे सुखातिरेकः इति भावः। [अत्र "आत्मा विस्रम्भते" इति अणिकर्तुरात्मनः चित्तवत्कर्तृकत्वाभावात्, "अणाव-कर्मका—"(१।३।८८ पा०) इत्यनुशासनेन परस्मैपदत्वं नाशङ्कनीयम्]। भूयिष्ठश्च—बहुशश्च। द्विधा प्रतिपन्नः,—द्वितयत्वेनाभिज्ञातः, भ्रूणद्वयमस्मिन् गर्भे विद्यते इत्यमनु-मितः इत्यर्थः। देव्याः,—सीतायाः। गर्भभारः,—भारभूतमुदरसंस्थानमिति यावत्। आसीत्—अभूत्; सीतायाः जठराभ्यन्तरे यमौ एव बालौ विराजेते इत्यसन्ना-देवाहं प्राक् हस्तेन संवाहनाद्यवसरेऽन्वभवमिति भावः।

एतौ यमौ एव बालौ सीतागर्भसम्भूताविति प्रत्याययितुं प्रोक्तमेवार्थं स्वयं विशदी-कृत्य व्यनक्ति, पुरेति।—पुरा पूर्व्वम्; उद्वाहात् परमिति भावः; आरूढ़े समुत्पन्ने, प्रथमसद्भावस्थानावसरे ईषन्मुकुलिते इति यावत्, स्नेहे प्रणये, परिचयस्य दीर्घकालं व्याप्य साहचर्य्यस्य, विकासात् प्रभावात्, उपचिते विवर्द्धिते सति; यदा हि तदीयं प्रेम निरतिशयं विवर्द्धितमासीत् तदेति भावः; रहः निर्ज्जने, विस्रब्धायाः विश्वस्तायाः, अपि; अहमत्र ईदृशो कैरपि न वीक्षिता भवेयमिति असङ्कुचितायाः अपि इति भावः; सहजया स्वाभाविक्या, लज्जया त्रपया, जड़े निर्व्यापारे, निमीलिते इत्यर्थः, दृशौ चक्षुषी यस्याः तस्याः; तस्या मुग्धदशत्वादिति भावः; गर्भग्रन्थिः ग्रन्थीभूतगर्भपिण्डः, जठराभ्यन्तरे गर्भस्य सन्निवेशविधिरिति यावत्, मयैव न तु तयेति भावः; (अन्ययोगव्यवच्छेदकोऽयमेवकारः) आदौ प्राक्; सीतायाः अपि अभिज्ञानात् पूर्व्वमिति भावः; करतलेन पाणितलेन, यः परामर्शः संवाहनक्रिया, तस्य कलया कलनया, विधानेनेत्यर्थः, चातुर्य्येणेति यावत्; हस्तेन मृदु परिवाहणावसरे इति भावः; यद्वा—परामर्श एव कला शिल्पं, शिल्पकौशलं-

[रुदित्वा] । तत्किमेतौ पृच्छामि केनापि उपायेन ? (व)

लवः। तात ! किमेतत् ?—

वाष्पवर्षेण नीतं वो जगन्मङ्गलमाननम् ।

अवश्यायावसिक्तस्य पुण्डरीकस्य चारुताम् ॥ २९ ॥

विशेष इति यावत्, ("कला स्यात् मूलरैवृद्धौ शिल्पादावंशमात्रके। षोड़शांशे च चन्द्रस्य कलनाकालमानयोः ॥" इति मेदिनी) अधिकतया कौशलविशेषपर्य्यातिरिक्ततया वा परामर्शने क्षते अतिशालीना जानकी हस्तमपसारयतीति तथ्यनिर्णयः अशक्यः स्यात् इति कलाशब्दप्रयोगोऽत्र बोध्यः ; द्विधा द्वितयत्वेन, द्विधाविभक्तत्वेनेति यावत्, ज्ञातः विदितः, तदनु तत्पश्चात्; मदभिज्ञानात् परमिति भावः ; कैरपि दिवसैः कैश्चिद्दिवाहोभिः, (करणैः) तया सीतया, ज्ञात इति पूर्वेणान्वयः ; मद्दर्शनात् परं हि सुस्फुटे गर्भे सञ्जाते यमरूपोऽयमिति स्वयमपि समवेदि इति भावः ; तथा चेमौ बालौ नूनं सीतासुतौ भविष्यतः इत्याशङ्कितार्थः। [अत्र प्रस्तुतयोरेव कर्त्रोः सीतारामयोः एकज्ञातत्वरूपक्रियाऽभिसम्बन्धात् तुल्ययोगिताऽलङ्कारः]। शिखरिणी वृत्तम् ॥ २८ ॥

(व) रुदित्वा—सीतानिर्व्वासनमनुस्मृत्य शोकवेगं विसोढुमशक्नुवन् सुचिरं वाष्पं विमुच्येत्यर्थः। तत्—तर्हि, एतयोः सीतासुतत्वसंशये इत्यर्थः। एतौ—कुमारौ। केनापि उपायेन—कमपि व्याजमनुसृत्येत्यर्थः। किं पृच्छामि ?—किं जिज्ञासे ; "भवन्तौ कौ, कस्य सुतौ च ?" इत्यादिकमिति भावः।

रोदनकारणं किमिति पृच्छति, वाष्पेति।—जगन्माङ्गलं विलोकं शुभकरं, विलोकितं सत् जगतां निरतिशयशुभाधायकमित्यर्थः, वः युष्माकम्, आननं मुखं, वाष्पवर्षेण अविरलधारमश्रुविमोचनेन, अवश्यायेन नीहारेण, ("अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम्।" इत्यमरः) अवसिक्तस्य आर्द्रीकृतस्य, अभ्युक्षितस्येत्यर्थः, पुण्डरीकस्य पद्मस्य, चारुतां रमणीयतां, नीतं प्रापितम्, एतत् किम् ? इति चूर्णकस्यवाक्येनान्वयः ; तव प्रफुल्लपुण्डरीकसन्निभे मुखे कथं हि नियतं नीहारराशिप्रतीकाशः वाष्पासारविमोकः दृश्यते इति भावः ; इन्दीवरकल्पं भगवतो राघवस्य आननं तदानीं विरहविपाण्डुरतया पुण्डरीकोपममभूदिति ध्येयम्। [अत्र एकस्य चारुतामपरः कथं हि प्राप्तुं शक्नुयात् इति वस्तुसम्बन्धे असम्भवत्यपि बिम्बप्रतिबिम्बभावमुद्रया तच्चारुतासदृशचारुताबोधस्य आक्षेपेणोपपादनात् असम्भवद्वस्तुसम्बन्धरूपो निदर्शनाभेदः]। पथ्यावक्त्रं वृत्तम् ॥ २९ ॥

कुशः । अयि वत्स !—

विना सीतादेव्या किमिव हि न दुःखं रघुपतेः ?
प्रियानाशे कृत्स्नं किल जगदरण्यं हि भवति ।
स च स्नेहस्तावानयमपि वियोगो निरवधिः
किमित्येवं पृच्छस्यनधिगतरामायण इव ? ॥ ३० ॥

दुर्व्वहसीताविप्रयोगजन्मुत्थ एवैष वाष्पनिर्म्मोक इत्युक्ता रामायणतत्त्वार्थानभिज्ञत्वेन लवं सनिकारमाह, विनेति ।—सीतादेव्या देवीस्वरूपया वैदेह्या, विना ऋते ; तद्विप्रयुक्तस्येति भावः ; रघुपतेः रघुनायकस्य रामचन्द्रस्य, किमिव हि त्रिलोकीस्थितं किमपि वस्तु हि, न दुःखं न दुःखकरम् ? इह जगति निखिलसुखसंसाधकं राजैश्वर्य्यादिकं वस्तुजातं समासाद्याप्यसौ रघुमणिः केवलं सीताविरहितः सततमेव दुःखायते इति भावः ; अतः सीताविरह एव ईदृशस्य वाष्पविसर्गस्य हेतुः इत्याशयः । एतदेव सामान्याकारेणोपपादयति, प्रियेति ।—प्रियायाः प्रियतमायाः पत्न्याः, नाशे वियोगे सति ; यद्वा—प्रियाणां प्रेमास्पदीभूतानां विषयाणाम्, आ सम्यक्, नाशे अदर्शने, निधने सतीत्यर्थः, मनसोऽभीष्टवस्तूनां सर्व्वथा अप्राप्तौ सत्यामिति यावत्, कृत्स्नं किल समग्रमेव ; न तु अंशविशेष इति भावः ; जगत् निखिलप्राणिपूर्णमेवैतत् भूमण्डलम्, अरण्यं वनकल्पं, भवति हि सम्पद्यते एव ; प्रियाविप्रयोगे हि सर्वं द्रव्यजातपूर्णमपि जगदरण्यप्रायं शून्यमेव प्रायशो विरहिभिरनुभूयते इति भावः । दुःखिनः जगति बहवः सन्ति, न हि भवन्ति ते एवं विह्वलाः इति शङ्कामपनेतुम् अस्य तु तदसामान्यम् इत्येतदेव विशदीकृत्य विवृणोति, स चेति ।—स च तादृशः, अन्यत्र क्वाप्यदृष्टः इत्यर्थः, तावान् तत्परिमितः, अपरिमेय इत्यर्थः, स्नेहः प्रणयः, उभयोरासीदिति शेषः, अयमपि इदानीमनुभूयमानश्च, निरवधिः असीमः, आजीवनं स्थायितया अपार इति यावत्, वियोगः विरहः ; यत्र हि प्राक् निरतिशया सुखसन्ततिः व्यराजत, तत्र चेदिदानीम् अनन्तः विरहजक्लेशः विलसति, तदा असौ नितरामसहनीय एव भवति इति भावः ; प्राक् सीतासविधे तया सार्द्धं सततं विमलं सुखमुपेयुषः रघुमणेः इदानीं समापतिते कथञ्चिदपि असहनीये तद्विरहे न हि भवति विस्मयकरः विच्छाये कमलप्राये तदीये मुखे तुषारपातप्रतिमः अश्रुसेकः इति तु गर्भिताशयः । कथं हि रामभद्रः सुचिरं विरहजं क्लेशमनुभूय वाष्पसेकैः सर्व्वामपि वनस्थलीमभ्यषिञ्चत्, तत्तु करुणरसाकरे रामायणे तदध्येतृभिरनिशमेव दृश्यते,

रामः। [स्वगतम्]। अये! तटस्थित आलापः, कृतं प्रश्नेन। दग्धहृदय! कोऽयमाकस्मिकस्ते स्नेहपरिप्लवो विकारः? एवञ्च निर्भिन्नहृदयावेगः शिशुजनेनाप्यनुकम्पितोऽस्मि, भवतु तावत्, अन्तरयामि। [प्रकाशम्]। वत्सौ! रामायणमिति श्रूयते भगवतो वाल्मीकेः सरस्वतीनिष्यन्दः प्रशस्तिरादित्यवंशस्य; तत्र कौतूहलेन यत्किञ्चिच्छ्रोतुमिच्छामि। (श)

तेन हि त्वत्प्रश्नः विफल एवेत्याह, किमिति।—अनधिगतम् अपठितं, रामायणं येन तादृश इव, रामायणतत्त्वानभिज्ञः जन इवेत्यर्थः, किमिति कथं हि, एवम् इत्थं, "किमेतत्" इत्यादिकमिति यावत्, पृच्छसि? जिज्ञाससे? महामुनेः वाल्मीकेः समीपे समग्रं रामायणमधीतवतः तव नैषः प्रश्नः युज्यते इति भावः। [अत्र पूर्वार्द्धे प्रियानाशजनितजगदरण्यानुभवरूपसामान्यार्थेन सीताविरहकृतदुःखोपभोगरूपविशेषार्थस्य समर्थनात् सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासालङ्कारः, अपिच जगति अरण्यस्य तादात्म्याध्यासात् निरङ्गं रूपकञ्चालङ्कारः, तृतीयपादेन च एकत्र विरुद्धयोः तादृशस्नेहवियोगयोः सङ्घटनात् विरूपसङ्घटनारूपो विषमालङ्कारः, चतुर्थपादेन तु अनधिगतरामायणेन पुरुषेण सार्द्धं लवस्यावैधर्म्यसाम्योत्कीर्त्तनादुपमाऽलङ्कारश्च, एषां चतुर्णां परस्परसापेक्षतया स्थितेः सङ्करः इति ज्ञेयम्]। शिखरिणी वृत्तम्॥ ३०॥

(श) तटे—समीपे, स्थितः,—समासीनः, सीतासम्बद्धकथायाः मध्यमप्रविश्यैव तदुपान्ते वर्त्तमान इत्यर्थः, उदासीनपुरुषाभ्यामिव प्रवर्त्तित इति यावत्। आलापः,—अनयोः आर्चोः मातृत्वसम्बन्धोल्लेखरहितं मिथः भाषणम्; संलापेनैतेन स्फुटं परिज्ञायते, यन्नैतौ सीतासुतौ इति, तथात्वे कथं हि कुशः "सीतादेव्याः" इत्यत्र "जनन्याः" इत्यादिकं नाभिदध्यादिति हृदयम्। प्रश्नेन—सीतारामौ किं युवयोः मातापितरौ इत्येवं परिपृच्छयेति यावत्। कृतम्—अलम्। दग्धहृदय!—हतचेतः; सीतासुतावेवैतौ इति प्राक् कृताऽऽशायाः सर्व्वथेदानीं वैफल्योदयेन निर्दग्धीभूतस्यास्य नाशप्रायत्वमाशङ्क्यानास्थयैवैषा सम्बुद्धिः कृतेति ज्ञेयम्। आकस्मिकः,—अकस्मादुद्भूतः, अहेतुक इति यावत्। स्नेहपरिप्लवः,—स्नेहेन—वात्सल्येन, परिप्लवः,—चञ्चलः, वात्सल्यविवशतया समधिकमस्थिर इति यावत्। विकारः,—अन्यथाभावः, स्नेहाधिक्योदयात् निरतिशयचाञ्चल्यमिति यावत्। एवञ्च—इत्यञ्च; अश्रुप्रवाह-

कुश:। स कृत्स्न एव सन्दर्भोऽस्माभिरावृत्तः, स्मृत्युपस्थितौ तावदिमौ बालचरितस्यान्त्येऽध्याये द्वौ श्लोकौ। (घ)

राम:। उदीरयतु वत्सः। (ङ)

कुश:।—

प्रकृत्यैव प्रिया सीता रामस्यासीन्महात्मनः।
प्रियभावः स तु तया स्वगुणैरेव वर्द्धितः॥ २१॥

वर्षणादिति भावः। निर्भिन्नः,—प्रकटीभूतः, हृदयस्य—चेतसः, आवेगः,—चाञ्चल्यं, दुःखसंक्षोभ इति यावत्, यस्य तथाभूतः, अहमिति शेषः। शिशुजनेन—बालकजनेन। अनुकम्पितः,—अनुगृहीतः, कृपापात्रीकृत इत्यर्थः। अस्मि—भवामि; स्वभावधीरस्य मे एतादृशमधैर्य्यं सर्व्वथैवानुपपन्नमिति भावः। भवतु तावत्—अस्त्वेवमित्यर्थः। किं तत्? तदेवाह, अन्तरयामीति।—अन्तरयामि—आपतितं शोकावेगं विषयान्तरसञ्चारणेन अपनयामि, [अन्तरं करोमीत्यर्थे "तत्करोति—" (ग०) इति णिचि लटि रूपम्] सरस्वत्याः,—वाचः, ("गीर्वाग्वाणी सरस्वती" इत्यमरः) निष्यन्दः,—प्रवाहः, विरचनमित्यर्थः, वाक्यश्रेणी इति यावत्। आदित्यवंशस्य—सूर्य्यवंशस्य। प्रशस्तिः,—प्रशंसा, चरितकीर्त्तनमित्यर्थः। तव—प्रशस्तौ। कौतूहलेन—औत्सुक्येन, तच्छ्रवणे तर्षातिरेकोदयेनेत्यर्थः। यत्किञ्चित्—कञ्चिदंशविशेषमिति यावत्। श्रोतुमिच्छामि—आकर्णयितुमभिलषामि।

(घ) कृत्स्न एव—समग्र एव। सन्दर्भः,—रामायणग्रन्थः। आवृत्तः,—अधीतः। स्मृत्युपस्थितौ—स्मरणपथमापतितौ। बालचरितस्य—पूर्व्वचरितस्य, प्रथमस्य बालकाण्डस्येत्यर्थः। अन्त्ये—चरमे। अध्याये—परिच्छेदे। द्वौ श्लोकौ—द्वे पद्ये; अधीतनिखिलरामायणप्रबन्धोऽपि अहं केवलमिदानीमनयोः श्लोकयोः स्मरामि, तेन हि भवत्कौतुकविनिवृत्तये तावेव पठितुं शक्नोमि इति भावः।

(ङ) उदीरयतु—अभिदधातु। वत्सः,—अतिस्नेहास्पदं भवानित्यर्थः।

तौ एव श्लोकौ इदानीं क्रमेणाभिधत्ते, प्रकृत्यैवेति।—सीता वैदेही, महात्मनः महोदारचेतसः, रामस्य रघुमणेः, प्रकृत्यैव स्वभावेनैव; न तु कृत्रिमतयेति भावः; प्रिया प्रीतिकरी, आसीत् अभूत्; महामनाः राघवः जानक्यां तत्त्वत एव प्रणयी आसीत्, न ह्यसौ अस्यां मनागपि कपटप्रणयं व्यधत्त इति भावः। कालक्रमेण तत्प्रणयस्य अन्यथात्वशङ्कां निरस्यति, प्रियभाव इति।—तया सीतया, स तु प्रियभावः तथाविधः अनिर्व्वचनीयः प्रणयः इत्यर्थः, स्वगुणैरेव स्वकीयपातिव्रत्यादिगुणसन्दोहैरेव, वर्द्धितः वृद्धिं

तथैव रामः सीतायाः प्राणेभ्योऽपि प्रियोऽभवत्।
हृदयं त्वेव जानाति प्रीतियोगं परस्परम् ॥३२॥ इति।

रामः। कष्टम्!! अतिदारुणो हृदयमर्म्मोपघातः। हा देवि! एवं किल तदाऽऽसीत्। अहो! निरन्वयविपर्य्यास-विरसवृत्तयो विप्रलम्भपर्य्यवसायिनस्तापयन्ति संसार-वृत्तान्ताः। (ढ)—

नीतः; महात्मा रघुप्रवरः सीतायाः केवलमनुपमं लावण्यमभिसमीक्ष्य न तस्यामति-प्रणयी अभूत्, न वा कृपासिन्धुः रघुमणिः महौदार्य्येण तस्यां वात्सल्यवानासीत्, यत् तत्प्रियभावे कृत्रिमता आशङ्क्येत, असौ तया स्वकीयविनयाऽऽर्ज्जवादिगुणगरिम्णैवोपा-र्ज्जितः, तेन हि महात्मनोरेतयोरतिविशुद्धः सुधाऽवदातः तादृशः प्रियभावः अन्यत्र दुर्लभ एवेति भावः; एतादृशः प्रियभावः निर्व्वासनावसरे कथं हि ततः सपदि विलुप्तोऽभूत्, तदतीव विस्मयकरमिति तु हृदयम्। पथ्यावक्त्रं वृत्तम् ॥ ३१ ॥

सीताया अपि अकपटः तथैव प्रियभावः रघुमणौ आसीदित्यावेदयति, तथैवेति।—तथैव सीता यथा रामस्य आसीत् तद्वदेवेत्यर्थः, सीतायाः वैदेह्याः, रामः रघूद्वहः, प्राणेभ्योऽपि स्वजीवनादपि, प्रियः प्रीत्यास्पदम्, अभवत् आसीत्; रामवत् सीता अपि न हि रामे कृत्रिमप्रणयवती बभूवेति भावः। कीदृशं तत्? इति प्रश्ने तस्यानुपमत्व-माह, हृदयमिति।—हृदयमेव तयोरुभयोः मानसमेव, परस्परम् अन्योऽन्यगतं, प्रीतियोगन्तु प्रणयसम्बन्धं पुनः, इतरेतरगतम् अतिविशुद्धं हार्द्दमिति यावत्, जानाति वेत्ति; तयोरुभयोः परस्परहृदयं विना अन्यस्य कस्यापि तत् तादृशं प्रीतियोगं नाभि-जानाति, अन्यत्र तादृशप्रेमादर्शनात् दृष्टान्तस्य सौलभ्यविरहादिति भावः। एतादृशे परस्परसुदृढप्रणये सति कथं हि तयोरेवम् अरुन्तुदः वियोगः उदपादि, तद्विषयक-विस्मयस्य भगवति रामभद्रे समुत्पादनार्थं श्लोकयोरेतयोरवतारणा इत्यवधेयम्। [श्लोकावेतौ अस्मद्देशीये वाल्मीकीये रामायणे वालकाण्डान्तिमाध्याये न दृश्येते, एतदनुरूपौ हि अवलोक्येते, तेन तत्प्रतिच्छायामवलम्ब्य कविना अभिनवावेवैतौ श्लोकौ विरचिताविति विभावयामः। तच्छ्लोकौ यथा,—"प्रिया तु सीता रामस्य दाराः पितृकृता इति। गुणाद्रूपगुणाच्चापि प्रीतिर्भूयो विवर्द्धते ॥ तस्याश्च भर्त्ता द्विगुणं हृदये परिवर्त्तते। अन्तर्गतमपि व्यक्तमाख्याति हृदयं हृदा ॥" इति]। पथ्यावक्त्रं वृत्तम् ॥ ३२ ॥

(ढ) कष्टम्—अतीव क्लेशकरम्, अतिदुःखप्रदमित्यर्थः। अतिदारुणः,—अति-

क्व तावानानन्दो निरतिशयविस्रम्भबहुलः ?
क्व तेऽन्योन्यं यत्नाः ? क्व च नु गहनाः कौतुकरसाः ?
सुखे वा दुःखे वा क्व नु खलु तदैक्यं हृदययोः ?
तथाऽप्येष प्राणः स्फुरति न तु पापो विरमति ! ॥ ३३ ॥

भयङ्करः, कथमपि सोढुमशक्य इत्यर्थः। हृदयमर्म्मोपघातः,—हृदयस्य—अन्तःकरणस्य, मर्माणि—शिरास्नायुस्थिसन्धिप्रभृतीनां सन्निपातस्थानानि, तेषामुपघातः,—ताड़नं, संक्षोभः इति यावत्; यद्वा—हृदयमर्म्मणः,—अन्तःकरणरूपमर्मस्थलस्य, उपघातः,—विदारणम्; बालस्यैतत् भाषणं समुद्बुद्धपूर्व्वस्मृतेर्मे हृदयं सर्व्वथा निकृन्ततीति भावः। ("उद्घातः" इति पाठान्तरम्) अथ स्मृतेरभ्युदयेन अतिविषमं तथाविधं शोकं सोढुमपारयन् अधीरतया विलपति, हा देवीति।—तदा—बाल्ये वयसि। एवं किल—इत्थमेव। आसीत्—अवर्त्तिष्ट; आवयोः प्रीतियोगः आयुष्मता कुशेन महर्षिविवर्णितः यथा उक्तः, स तथैव तत्त्वतः आसीदिति भावः। निरन्वयेति।—निः,—नास्ति, अन्वयः,—सम्बन्धः हेतुर्वा यस्मिन् तथाभूतः, आकस्मिक इति यावत्, यः विपर्य्यासः,—विपरिणामः, पूर्वावस्थाया अन्यथाभावः इत्यर्थः, तेन विरसाः,—अहृद्याः, वृत्तयः,—व्यापाराः येषां तथाभूताः; अहेतुकदशाविपर्य्ययोत्पादकतया सुतरां मर्म्मपीड़का इति भावः। विप्रेति।—विप्रलम्भे—वियोगोद्भूते शोके, पर्य्यवस्यन्ति—परिणमन्ति ये तथाभूताः; सन्तापोदर्का इति भावः। संसारस्य—सृष्टेः, एतज्जगत इति यावत्, वृत्तान्ताः,—वृत्तवस्तूनि, कर्म्मनिचयाः इत्यर्थः। सन्तापयन्ति—व्यथयन्ति; वियोगबहुले इह जगति मर्म्मोपपीड़काः व्यापारनिवहाः सततं हि संसारिणां मानसानि व्याकुलीकुर्वन्ति, नास्ति कियानपि इह सुखलेश इति भावः।

शोके हि सांसारिकं विपर्य्यासमिदानीं स्वस्मिन्नेव विशदीकृत्य विवृणोति, क्वेति।—निः नास्ति, अतिशयः आतिशय्यं यस्मात् तथाभूतः, लोकोत्तरः इत्यर्थः, यः विस्रम्भः विश्वासः, प्रीतिप्रवणतेति यावत्, तेन बहुलः घनः; असीमप्रणयपरिपूर्णः इति भावः; तावान् तत्परिमितः, आनन्दः हर्षः, क्व कुत्र ? अधुना प्रागनुभूता तादृशी प्रेमगर्भसुखसन्ततिधारा क्व विलुप्तेति भावः; अन्योऽन्यम् इतरेतरम्, अधिश्रिताः इति शेषः, ते तथाविधाः, अकपटाः इति यावत्, यत्नाः सुखाधायकाः चेष्टाविशेषाः, क्व कुत्र ? विलुप्ताः इति शेषः; ते हि इदानीं नानुभूयन्ते इत्याशयः; गहनाः निविड़ाः, निर्भरा इत्यर्थः, कौतुकेषु कौतूहलोत्पादकेषु विषयेषु इति यावत्; नर्म्महासादिकेषु

भोः ! कष्टम् ।—

प्रियागुणसहस्राणामेकोन्मीलनपेशलः ।
य एव दुःस्मरः कालस्तमेव स्मारिता वयम् ॥ ३४ ॥

वा, रसाः रागाः, क्व च नु ? कुत्र हि अपसृत्य गता इत्यर्थः ; प्रागिव वयमिदानीं कौतुकोद्दीपकविषयव्यापृता न भवेम इति भावः ; सुखे वा आनन्दे वा, दुःखे वा विषादे वा, तत् प्रागवस्थितं, तथाविधमित्यर्थः, हृदययोः सीतायाः मम च मानसयोः, ऐक्यम् ऐकीभावः, सुखदुःखयोरभिन्नानुभूतिरिति यावत्, क्व नु खलु ? कुत्र हि विलुप्तं सत् गतमित्यर्थः ; पुरा हि पतिव्रता सीता यथा मम सुखे सुखिनी दुःखे च दुःखिनी आसीत्, तथैवाहमपि आसम्, उभौ हि आवां समसुखदुःखौ आस्व, इदानीन्तु तादृग्भावः कथं हि सपदि अदृश्यतां गतः, इत्यहो विचित्राः संसारगतयः इति भावः ; तथाऽपि पूर्व्वमेवम्भूते अकपटे प्रणये उपभुक्ते अधुना तु दुर्व्विपाके तस्या विरहे समुदिते अपीत्यर्थः, एषः मदीयः इति भावः ; पापः दारुणदुःखदायकतया दुरदृष्टफलभूत इत्यर्थः, दग्ध इति यावत्, प्राणः हृदयस्थवायुविशेषः, प्राणवायुरिति यावत्, ("प्राणो हृन्मारुते वोले काव्यजीवेऽनले बले ।" इति मेदिनी । अत्र प्राणस्य आन्तरवायुविशेषार्थकतया एकत्वमवधेयम्) ; स्फुरति स्पन्दते, इदानीमपि निश्वसिमि इति यावत्, न तु विरमति न श्वसनकर्म्मणः निवर्त्तते, नाहं म्रिये इत्यर्थः ; सम्प्रति प्राणविहानमेव मे वरमित्याशयः । ["व्याङ्परिभ्यो रमः" (१।३।८३ पा०) इति परस्मैपदम् । अत्र प्राणनाशकरकठोरदुःखकारणसत्त्वेऽपि प्राणवियोगरूपफलोदयस्याभावात् विशेषोक्त्यलङ्कारः] । शिखरिणी वृत्तम् ॥ ३३ ॥

अथ खेषां शैशवसमयस्य क्रमेण महर्षिभारत्या स्मृतिपथमापादितस्य सातिशयदुःखदायकत्वमाह, प्रियेति ।—प्रियायाः सीतायाः, गुणसहस्राणाम् असंख्यानां सारल्यपातिव्रत्यादिगुणानाम्, एकेन असाधारणेन, उन्मीलनेन उदयेन, पेशलः मनोरमः ; वैदेह्याः ये ये हि श्रेष्ठाः गुणसङ्घा मया यस्मिन् यस्मिन् काले प्रागनुभूताः, तेषां तेषां हि विभिन्नकालिकानां सर्व्वेषाम् एव गुणानां युगपत् एतस्मिन्नेव काले स्मृतिपथे समुदयात् अतीव रमणीयतमः इति भावः ; यद्वा—प्रियागुणसहस्राणाम् एकोन्मीलने असाधारणोन्मेषे, सम्पूर्णतया स्मृतिविषयीभूतसम्पादने इत्यर्थः, पेशलः दक्षः, निपुण इत्यर्थः ; ("चारौ दक्षे च पेशलः" इत्यमरः) प्रियायाः असंख्येयगुणावलीनामतिशयेन स्मारक इति समुदितार्थः, य एव यो हि, कालः पूर्व्वतनः सुखकरः समयः, दुःस्मरः सर्व्वथा दुःखदायकतया अधुना स्मर्त्तुमशक्यः ; इदानीन्तन-

तदा किञ्चित् किञ्चित् कृतपदमहोभिः कतिपयै-
स्तदीषद्विस्तारि स्तनयुगलमासीन्मृगदृशः ।
वयःस्नेहाकूतव्यतिकरघनो यत्र मदनः
प्रगल्भव्यापारः स्फुरति हृदि मुग्धस्य वपुषि ॥ ३५ ॥

वियोगसमयस्य सुखकरकालोत्तरवर्त्तितया स्वत एव दुर्व्विषहत्वेन प्रागनुभूतसुखसमयः स्मृतिपथमापतितः सुतरामेवासहनीयो भवतीति भावः ; तमेव तादृशं कालमेव, वयं स्मारिताः स्मृतिपथमापादिताः ; सीतागुणसम्पृक्तस्य पूर्वतनसुखसमयस्य अधुना स्मरणात् शोकः नितरामेव मर्म्माणि पीड़यतीति भावः । [वयमित्यस्य "गतिबुद्धि—" (१।४।५२ पा०) इत्यादिना अणिकर्त्तुः कर्म्मत्वेन उक्ते कर्म्मणि प्रथमा ज्ञेया । अत्र "स्मारिताः" इत्यस्य ज्ञानसामान्यार्थपरत्वेन व्याख्याने स्मृतिरूपज्ञानविशेषार्थकतया च अव्याख्याने प्रदर्शितसूत्रस्य ज्ञानसामान्यार्थकत्वेन विषयतया प्रोक्तार्थसङ्गतिरित्यव-धेयम् । तथा च "दृशेश्च" इति वार्त्तिकसूत्रे दीक्षिताः,—"सूत्रे ज्ञानसामान्यार्थाना-मेव ग्रहणं, न तु तद्विशेषार्थानामित्यनेन ज्ञाप्यते, तेन स्मरति जिघ्रतीत्यादीनां न, स्मारयति घ्रापयति वा देवदत्तेन" इति । अन्ये तु दर्शनरूपज्ञानविशेषार्थकदृशि-धातोरेवाणिकर्त्तुः कर्मत्वस्य वैकल्पिकत्वं, ज्ञानसामान्यार्थकानान्तु नित्यत्वं विदधति, तथा च तन्मते न कश्चिद्दोषः, इत्यलमनल्पजल्पनेन इति] । पथ्यावक्त्रं वृत्तम् ॥ ३४ ॥

तादृशरमणीयतरः कालः कथम्भूत एवासीत्, यो हि इदानीं सर्वथा दुःस्मरणीय इत्युच्यते, तमेवाभिधत्ते, तदेति ।—तदा बाल्ये वयसि, विवाहात् परत एवेत्यर्थः ; प्रागेव स्तनोद्भेदकालात् उपयमनविधेः प्राशस्तिकत्वादित्याशयः ; मृगदृशः कुरङ्ग-नयनायाः, प्रियायाः सीताया इत्यर्थः, स्तनयुगलं कुचयुग्म, किञ्चित् किञ्चित् ईष-दीषत्, कृतपदं लब्धस्थानं, क्रमेण मुकुलमिव कियत् लब्धोदयं सदित्यर्थः, कतिपयैः कतिभिः, अहोभिः दिवसैः, कियद्दिनाभ्यन्तर एवेत्यर्थः, [अपवर्गे तृतीया] तत् स्तनयुगलम्, ईषद्विस्तारि सीकविकाशि, स्वल्पविस्तृतमिति यावत्, आसीत् अभूत् ; यौवनोद्गमात् क्रमशः तत्कालोचितं स्थौल्यमधिगन्तुमारेभे इति भावः ; यत्र यस्या-मवस्थायां, वयसः यौवनस्य, स्नेहस्य प्रणयस्य, आकूतस्य अभिप्रायस्य च, व्यतिकरेण सम्पर्केण, घनः निविड़ः, निरतिशयं परिपुष्टः इति यावत्, मदनः कामः, हृदि मानसे, प्रगल्भः प्रौढ़ः, व्यापारः क्रिया यस्य सः, सम्यगुद्बुद्धः सन् इत्यर्थः, स्फुरति विकाशते, वपुषि शरीरे, वहिराकारे इति यावत्, मुग्धस्य मृदुस्य, लज्जावशात् नाति-प्रबल इत्यर्थः, तादृशस्य सन्, स्फुरति इत्यन्वयः ; तथा च तदानीं कामः वयसा प्रेम्णा

कुशः। अयञ्च मन्दाकिनीचित्रकूटवनविहारे सीतादेवी-मुद्दिश्य रघुपतेः श्लोकः। (क)—

त्वदर्थमिव विन्यस्तः शिलापट्टोऽयमग्रतः।
यस्यायमभितः पुष्पैः प्रवृष्ट इव केशरः॥ ३६॥

अभिप्रायविशेषेण च नितरां प्रवर्द्धितः सन् हृदये समुत्कटः, शरीरे सौम्यदर्शनः समजनि इति भावः। [अत्र एकस्यैव मदनस्य हृदयदेहरूपस्थलद्वयगोचरत्वेन पर्य्यायालङ्कारः, अपि च प्रगल्भत्वमुग्धत्वयोर्विरुद्धयोः एकत्र तदीयवपुषि अविरुद्धतया समावेशेन विरोधाभासोऽलङ्कारः, इत्युभयोरङ्गाङ्गिभावेन सङ्करः]। शिखरिणी वृत्तम्॥ ३५॥

(क) मन्दाकिनी—चित्रकूटोपान्तचारिणी काचित् गिरिनदी, गङ्गा इति केचित्, तथा च रघौ कालिदासः,—"मन्दाकिनी भाति नगोपकण्ठे मुक्तावली कण्ठगतेव भूमेः।" इति; चित्रकूटश्च—तदाख्यः पर्व्वतविशेषः, तत्र यानि वनानि—अरण्यानि, तेषु विहारः,—क्रीड़ा तस्मिन्, तत्र तत्र विहारावसरे इत्यर्थः। सीतादेवीं—वैदेहीम्। उद्दिश्य—सम्बोध्य। रघुपतेः श्लोकः,—रघुपतिना एषः वक्ष्यमाणः श्लोकः अभ्यधायि इत्यर्थः।

अथ विहारकालिकं तमेव श्लोकमिदानीमभिधत्ते, त्वदर्थमिवेति।—अग्रतः पुरतः, अयं परिदृश्यमानः, शिलापट्टः शिलाखण्डरूपमासनं, त्वदर्थमिव तवोपवेशनार्थमिव, विन्यस्तः स्थापितः, यस्य शिलापट्टस्य, अभितः सर्व्वतः, अयं केशरः वकुलपादपः, पुष्पैः कुसुमैः, प्रवृष्टः इव वर्षणकर्म्मनिरत इव; वकुलपादपः स्वकुसुमानि शिलातलेषु सन्न्यस्य तव सुखशय्यां विरचयितुं प्रवृत्त इव प्रतीयते इति भावः। [अत्र "यस्य" इत्यत्र अभितःशब्दयोगात् द्वितीयाप्रसक्तेः "अभितःपरितः—" (वा०) इत्याद्यनुशासनोल्लङ्घनेन षष्ठीप्रयोगात् च्युतसंस्कारताऽऽख्यः दोषः। श्लोकश्चैष रामायणे न दृश्यते इति कविकृतोऽयमिति विभावयामः। अत्र स्वाभाविकशिलाविन्यास-पुष्पप्रवर्षणयोः सीतासङ्गतत्वार्थकत्वाभावेऽपि तदर्थगतत्वेनाभिधानेन उत्कटैक-कोटिकसंशयसमुदयात् क्रियोत्प्रेक्षे अलङ्कारौ, तयोश्चान्योऽन्यसापेक्षत्वात् सजातीय-सङ्करः; एतेन सुखकरविहारस्थानमेतदिति च गम्यते इत्यलङ्कारेण वस्तुध्वनिः]। पथ्यावक्त्रं वृत्तम्॥ ३६॥

रामः । [सलज्जितस्नेहकरुणम्] । अतिनामायं मुग्धः शिशुजनः, विशेषतस्त्वरण्यचरः । हा देवि ! स्मरसि वा तस्य प्रदेशस्य तत्समयविस्रम्भातिशयप्रसङ्गसाक्षिणः ? कष्टं भोः ! कष्टम् । (ख)—

श्रमाम्बुशिशिरीभवत् प्रसृतमन्दमन्दाकिनी-
मरुत्तरलितालकाकुलललाटचन्द्रद्युति ।

(ख) सलज्जितं—लज्जा ; प्रियासङ्गतस्य गोप्यविषयस्य बहिः प्रकाशनादिति ज्ञेयम् , स्नेहः,—सीतागतः प्रणयः, पुत्रत्वबोधाद्वा तत्र शिशुजने वात्सल्यं, करुणश्च—सीताविरहकृतः शोकश्च, तैः सह वर्त्तमानं यथा तथा, आहेति शेषः । अतिनाम—अत्यर्थमेव । अयं शिशुजनः,—बालः कुश इत्यर्थः । मुग्धः,—सरलभावसम्पन्नः । विशेषतः,—विशेषेण । अरण्यचरः,—आरण्यकः ; बालजनः स्वभावत एव चातुर्य्यलेशरहितः भवति, वनवासिबालस्तु सुतरामेवेति भावः । अथ तत्प्रदेशस्य स्मृत्युदयात् निलपति, हेति ।—देवि !—सीते ! । स्मरसि ?—स्मृतिविषयतां नयसि ? इत्यर्थः । तस्य प्रदेशस्य—शिलापट्टादिसनाथं तं देशमित्यर्थः । ["अधीगर्थदयेशाम्—" (२।३।५२ पा०) इति स्मृत्यर्थयोगात् कर्म्मणि षष्ठी] तत्समये—वनविहारकाले, यः विस्रम्भातिशयः,—विश्वासबाहुल्यम् ; तत्तद्देशानां निरुपद्रवत्वात् तत्र मिथः सम्भाषणादेरनायासेनैव जायमानत्वादित्याशयः ; तस्य प्रसङ्गः,—व्यापारः, अनुष्ठानमिति यावत्, तस्य साक्षी—द्रष्टा तस्य, आवयोः विश्रब्धालापविहरणादिक्रियाणां परिदर्शकस्येत्यर्थः ; यत्र हि आवां सुखेन प्रागवसाव, तं देशमिति भावः । कष्टं भोः कष्टं—दुर्विषहस्य दुःखस्य जनकमेतदिति भावः ।

अथ तत्तद्देशानां स्मृत्या सपदि सीतासुखप्रत्यभिज्ञानोदयात् तस्य तस्य वस्तुनः नितरां दुर्विषहतामाह, श्रमेति ।—श्रमाम्बुभिः श्रमजनितैः जलैः, घर्म्मोदबिन्दुभिरिति यावत् ; सर्व्वत्र वनोद्देशे पादाभ्यां विहरणादिति भावः ; शिशिरीभवत् शीतलीभावमापद्यमानम्, अपि च प्रसृतेन उच्चलितेन, मन्देन मृदुना, मन्दाकिनीमरुता मन्दाकिनीसलिलसम्पृक्तवायुना, तरलितैः चञ्चलतामापादितैः, अलकैः चूर्णकुन्तलैः, आकुला तिरोहिता, ललाटचन्द्रस्य भालरूपशशधरस्य, द्युतिः दीप्तिः, शोभेति यावत्, यस्मिन् तत्, [कर्म्मधारये कृते "श्रम···द्युति" पर्य्यन्तमेकपदम् इति केचित्] कुङ्कुमेन कलङ्कितौ चिह्नितौ, रञ्जितौ इति यावत्, कुङ्कुमकलङ्कितौ, ("कलङ्काङ्कौ लाञ्छनञ्च चिह्नं लक्ष्म च लक्षणम्" इत्यमरः) न कुङ्कुमकलङ्कितौ अकुङ्कुमकलङ्कितौ कुङ्कुमरागरहितौ इति यावत्, तथाऽपि उज्ज्वलौ दीप्यमानौ,

अकुङ्कुमकलङ्कितोज्ज्वलकपोलमुत्प्रेक्ष्यते
निराभरणसुन्दरश्रवणपाशसौम्यं मुखम् ॥ ३७ ॥

[स्तम्भित इव स्थित्वा सकरुणम्]। अहो नु खलु भोः! (ग)—

चिरं ध्यात्वा ध्यात्वा निहित इव निर्माय पुरतः
प्रवासेऽप्याश्वासं न खलु न करोति प्रियजनः।

स्वत एव मनोहराविल्यर्थः, कपोलौ गण्डौ यस्मिन् तथाविधम्, अपि च निराभरणौ अनलङ्कृतौ, तथाऽपि सुन्दरौ रमणीयौ, यौ श्रवणपाशौ प्रशस्तौ कर्णौ, निसर्गरमणीयौ कर्णावित्यर्थः, ("पाशः केशादिपूर्वः स्यात् तत्सङ्घे कर्णपूर्वकः। सुकर्णे च" इति मेदिनी) ताभ्यां सौम्यं रुचिरं, रमणीयमिति यावत्, मुखं सीतावदनम्, उत्प्रेक्ष्यते दृश्यते, सततमनुध्यानेन तव तादृशं मुखं विलुप्तदर्शनमपि इदानीं दृग्विषयतामासाद्यते इवेत्यर्थः; अहो! पुरा वनविहारजनितघर्मबिन्दुसुशोभितं मृदुशीतलमारुतान्दोलित-कुन्तलराजिरञ्जितभालशोभासुन्दरं कपोलरागरुचिरं सुमनोहरकर्णयुगलविमण्डितं ते मुखं कियद्भि स्मर्तुमिदानीं कथमपि शक्नोमीति भावः। [अत्र तथाविधसीतासुखस्या-नुत्प्रेक्षितत्वेऽपि सम्भावनया तथात्वेनोत्प्रेक्षणात्, वाचकेवादिशब्दस्य च गम्यमानत्वात् प्रतीयमानक्रियोत्प्रेक्षाऽलङ्कारः, चन्द्रेण सह ललाटस्य च अभेदाध्यासात् निरङ्ग रूपकमलङ्कारः, अपि च कुङ्कुमरूपरञ्जनसाधनाद्यभावेऽपि तथा श्रवणप्रसाधनाद्य-भावेऽपि च अहेतुकसौन्दर्योदयदर्शनात् विनाहेतुककार्योत्पत्तिरूपविभावना-ऽलङ्कारश्च, इत्येतेषामन्योऽन्यसापेक्षतया संस्थितेः सङ्करः]। पृथ्वी वृत्तं—"जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः" इति लक्षणात् ॥ ३७ ॥

(ग) स्तम्भित इव—शोकावेगेन नितरां जडीभूतः इव, पिशाचोपहत इव निर्व्यापारतया संस्थित इवेत्यर्थः। सकरुणं—सखेदम्। अहो नु खलु भोः!,—अहोवत, निरतिशयशोकसङ्कुलमेतदित्यर्थः।

तदेव शोककारणं विशेषेण विवृणोति, चिरमिति।—चिरं सुदीर्घकालं, ध्यात्वा ध्यात्वा अभीक्ष्णं चिन्तयित्वा, [वीप्सायां द्विः] नियतं तद्रूपानुध्यानेनेत्यर्थः, निर्माय सृष्ट्वा, पुरतः अग्रतः, निहित इव स्थापित इव; सततचिन्तनमहिम्ना काल्पनिकचित्रं नयनयोः पुरतः आनीय संस्थापित इवेति भावः; प्रियजनः प्रीत्यास्पदीभूतो जनः, प्रवासेऽपि देशान्तरेऽपि, दीर्घविप्रयोगावसरेऽपि इति यावत्, आश्वासं सान्त्वनाम्; विरहिणां तद्विरहदग्धहृदयस्येति भावः; न खलु करोति नैव विदधाति, इति न,

जगज्जीर्णारण्यं भवति हि विकल्पव्युपरमे
कुकूलानां राशौ तदनु हृदयं पच्यत इव ॥ ३८ ॥

[नेपथ्ये] ।—वशिष्ठो वाल्मीकिर्दशरथमहिष्योऽथ जनकः
सहैवारुन्धत्या शिशुकलहमाकर्ण्य सभयाः ।

अपि तु करोत्येवेत्यर्थः, विकल्पस्य ताद्दशानुध्यानस्य, व्युपरमे निवृत्तौ, (सति) जगत् भूमण्डलं, जीर्णारण्यं पुरातनतया पत्रपुष्पादिपरिशून्यशुष्कशाखापादपादिप्रतिभयं. वनमिव सर्वथा अशोभनं, केवलं शोकदुःखादिसङ्कुलमिति यावत्, भवति हि सम्पद्यते एव; सर्वं सुशोभनमपि सर्वथा अशोभनमिव प्रतिभाति इति यावत्; "तदा रम्याण्यरम्याणि प्रियाः शल्यं तदाऽसवः। तदेकाकी सबन्धुः सन् इष्टेन रहितो यदा ॥" इति भावः; तदनु तत्पश्चादित्यर्थः, हृदयं चेतः, विरहिजनस्येति शेषः, कुकूलानां तुषाग्नीनां, ("कुकूलं शङ्कुभिः कीर्णे श्वभ्रे ना तु तुषानले ।" इत्यमरः) राशौ प्रचये, पच्यते इव दह्यते इव; आदौ चेतः उदासीनं कृत्वा पश्चात् नितरां तेनाऽऽधिना भस्मीक्रियते इवेति भावः; निरन्तरानुचिन्तनवशात् यद्यपि प्रियजनप्रतिकृतिः मानसपटे समुदीय कथञ्चित् मानसिकं सन्तापमपनयति, तथाऽप्यसौ क्षणात् परमेव याथार्थ्यमननुभाव्य विलुप्तीभूय मानसं नितरां दन्दह्यते इत्यहो ! प्रियजनविप्रयोगस्य दुर्विषहतेति संक्षेपः । [अत्र प्रियजनप्रतिकृतेः पुरतः अनिहितत्वेऽपि सम्भावनया तथात्वोत्कीर्तनात्, अपि च हृदयस्य पचनाद्यभावेऽपि सम्भावनया तथात्वोपदेशात् क्रियोत्प्रेक्षेऽलङ्कारौ, एवमेव जगतः जीर्णारण्यरूपत्वासत्त्वेऽपि तथात्वेन सम्भावनात् द्योतकेवादेरभावात् प्रतीयमानोत्प्रेक्षाऽलङ्कारः, अपि च जगति जीर्णारण्यतादात्म्याध्यासाच्च निरङ्गं रूपकमलङ्कारः, इत्येतेषां चतुर्णां परस्परनैरपेक्ष्येण संस्थितेः सङ्करः]। शिखरिणी वृत्तम् ॥ ३८ ॥

अथ एतदङ्के विशेषतो विततस्य रामभद्रीयापारशोकस्य सपदि प्रकृतावान्तरीपक्षेपणेन विपर्य्ययभावमुपपादयितुमिदानीं नेपथ्यभाषणेन लवचन्द्रकेत्वोः युद्धवार्ताश्रवणात् सभयानां भगवद्वशिष्ठादीनां कौशल्यायाश्च युद्धक्षेत्रागमनमुपवर्णयति, वशिष्ठ इति ।—वशिष्ठः तदाख्यः रघुकुलगुरुः, वाल्मीकिः भगवान् प्राचेतसः, दशरथस्य महिष्यः कृताभिषेका पत्नी कौशल्या इत्यर्थः; [एकत्वेऽपि गौरवात् बहुवचनम् । केचित् तु "महिष्यः" इति बहुवचनदर्शनात् सर्वासामेव दशरथपत्नीनामागमनमामनन्ति, तन्न, यतः तस्या एकस्या एवागतत्वात्, उपरिष्टात् रामवचसैतत् विवृतिमेष्यतीति

जराग्रस्तैर्गात्रैरथ खलु विदूराश्रमतया
चिरेणागच्छन्ति त्वरितमनसोऽपि श्रमजडाः ॥ ३९ ॥

रामः। कथं भगवन्तौ अरुन्धतीवशिष्ठौ अम्बा जनकश्च अत्रैव खलु एते द्रष्टव्याः? [सकरुणं विलोक्य]। अहह! तातजनकस्तु दैवादत्रैवायात इति वज्रेणैव ताडितोऽस्मि मन्दभाग्यः। (घ)—

ज्ञेयम्] अथ जनकः विदेहराजोऽपि; एते सर्वे इति भावः; अथशब्दोऽत्र समुच्चयार्थकः; अरुन्धत्या वशिष्ठपत्न्या, सहैव सार्द्धमेव, शिश्वोः लवचन्द्रकेत्वोः, कलहं सङ्ग्रामम्, आकर्ण्य श्रुत्वा, सभयाः कलहायमानयोः सन्तानसम्बन्धयोः बालयोः अनिष्टापातमाशङ्क्य वित्रस्ताः, सञ्जाता इति शेषः, अथ अनन्तरं, विदूरः अति-दूरवर्त्ती, असन्निकृष्टः इति यावत्, आश्रमः येषां तेषां भावः, तत्ता तया; तेषामाश्र-मस्य अतीव दूरवर्त्तित्वादिति भावः; श्रमेण पथिभ्रमणक्लान्त्या, जडाः कातराः सन्तः, श्लथगमना भूत्वा इति यावत्, त्वरितं त्वरायुक्तं, सोत्कण्ठमित्यर्थः, मनः येषां तथाभूताः सन्तोऽपि, जरया वार्द्धकेन, ग्रस्तैः आयत्तीकृतैः, वार्द्धक्योदयात् सामर्थ्य-हीनैरिति यावत्, गात्रैः देहैः उपलक्षिताः, ["प्रकृत्यादिभ्यः" (वा०) इति तृतीया] चिरेण विलम्बेन, आगच्छन्ति खलु आयान्ति खलु; खलुशब्दोऽत्र वाक्यालङ्कारे सान्त्वनायां वा, ("खलु स्यात् वाक्यभूषायां जिज्ञासायाञ्च सान्त्वने"। इति मेदिनी) लवचन्द्रकेत्वोः समरदर्शनेन तयोरनिष्टाशङ्कया नितराम् उत्कण्ठितानामाश्रम-वासिनां केषाञ्चित् परिसान्त्वनार्थं कस्यचिन्मुनेरुक्तिरियमिति बोध्यम्; रघुकुल-हितैषिणः भगवन्तः वशिष्ठादयः बालयोः संग्राममाकर्ण्य सत्वरं युद्धव्यवसायात् वारयितुमेतौ अभिलषन्तोऽपि आश्रमस्यातीव सुदूरस्थितत्वात् स्वेषाञ्च जराजीर्णगात्र-तया त्वरान्वितमनसोऽपि पथिश्रमाभिभूततया क्लाम्यन्तः अत्वरितपदविक्षेपमागच्छन्तीति भावः। [अत्र चिरेणागमनं प्रति जराग्रस्तगात्रत्वस्य श्रमजड़त्वस्य च हेतुगर्भत्वेनोप-न्यासात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारः]। शिखरिणी वृत्तम् ॥ ३९ ॥

(घ) भगवन्तौ—माहात्म्यवन्तौ। अरुन्धतीवशिष्ठौ—गुरुपत्नी गुरुश्च एता-वित्यर्थः। अम्बा—माता कौशल्या। जनकश्च—विदेहराजः श्वशुरश्च। एते—सर्वे। अत्रैव खलु—अस्मिन् सीतानिर्व्वासनस्थाने जनस्थाने एवेत्यर्थः, उपस्थिता इति शेषः। कथं—केन प्रकारेण। द्रष्टव्याः,—अवलोकयितव्याः; एतेषां पुरतः मूढ़धीः दुर्दैव-

सम्बन्धस्पृहणीयताप्रमुदितैर्जुष्टे वशिष्ठादिभिः
दृष्ट्वाऽपत्यविवाहमङ्गलमहे तत् तातयोः सङ्गतम्।
पश्यन्नीदृशमीदृशे पितृसखं वृत्ते महावैशसे
दीर्य्ये किं न सहस्रधाऽहमथवा रामेण किं दुष्करम्?॥४०॥

विवशचेताश्चाहं कथमपि स्वमुखं दर्शयितुं न शक्ष्यामीति भावः। विशेषतो जनकदर्शनस्य दुःसहदुःखदायकत्वमाह, अहहेति।—अहह!—हा कष्टमेतदित्यर्थः। तातजनकस्तु—पितृतुल्यविदेहराजोऽपि। दैवात्—मम दुर्दैवविलसनात् हेतोः। अत्रैव—अस्मिन् सीतानिर्वासनस्थाने एव। आयातः,—उपस्थितः। इति—अस्मात् हेतोः। वज्रेणेव—अतिकठोरकुलिशेनेव। ताड़ितः,—अभिहतः। अस्मि—भवामि। मन्दभाग्यः,—हतदैवः; सीताया निर्वासनात् अतिशुचः मां प्रति कुपितस्य च तज्जनकस्य जनकस्य साक्षात्करणं वज्रहननवत् मे नितरां पीड़ाजननमिति भावः।

अथेदानीं राजर्षेः जनकस्य सन्दर्शनेन पुनर्नवीभूतस्य शोकस्य तीव्रतायां हेतुं प्रदर्शयति, सम्बन्धेति।—सम्बन्धस्य वैवाहिकसम्पर्कस्य; विदेहवंशीयैः सह रघुवंशीयानामिति भावः; स्पृहणीयतया वाञ्छनीयतया, श्लाघनीयतयेत्यर्थः, प्रमुदितैः प्रहर्षपुलकितैः, वशिष्ठादिभिः वशिष्ठप्रभृतिभिः रघुकुलहितैषिभिः मुनिभिः, जुष्टे सेविते, स्वोपस्थित्या पूर्णतां प्रापिते इत्यर्थः, अपत्यानां सीतारामादीनां, विवाहः परिणयः, स एव मङ्गलः माङ्गलिकः, शुभकर इत्यर्थः, महः उत्सवः तस्मिन्, ("मह उद्धव उत्सवः" इत्यमरः) तातयोः पितुः दशरथस्य विदेहराजस्य च, तत् तथाविधम्, अतीव आनन्दविधायकमित्यर्थः, सङ्गतं पुरातनं समागमं, दृष्ट्वा प्राक् अवलोक्य, अधुना ईदृशे एवंविधे, दुर्विषहे इति यावत्, महावैशसे निर्व्वासनेन सीताहत्यारूपे अतिक्रूरे कर्म्मणि, वृत्ते सङ्घटिते, सम्पादिते सति इत्यर्थः, ईदृशं शोकसंविग्नं, पितुः दशरथस्य, सखायं परममित्रं, राजर्षिं जनकमित्यर्थः, ["राजाहःसखिभ्यष्टच्" (५।४।९१ पा०) इति समासान्तः टच्प्रत्ययः], पश्यन् अवलोकयन्, अहं, किं कथं, सहस्रधा सहस्रप्रकारं, सहस्रखण्डेनेति यावत्, न दीर्य्ये? न विदीर्णो भवामि? शोकक्रकचेन कथं नाहं दशशतधा विपाटितो भवामीति भावः; इदानीं मे निधनमेवोचितमित्याशयः। [दीर्य्यतेः दैवादिकस्य परस्मैपदित्वेऽपि वैवक्षिकं कर्त्तरि आत्मनेपदम्, अथवा कर्म्मकर्त्तर्य्येयं प्रयोगः]। अथवा किं वा; अन्यत् किमु अत्र वक्तव्यमिति भावः; रामेण अतीवा·

[नेपथ्ये]। कष्टं भोः ! कष्टम् ।—

अनुभावमात्रसमुपस्थितश्रियं
सहसैव वीक्ष्य रघुनाथमीदृशम् ।
प्रथमप्रमूढजनकप्रबोधनाद्
विधुराः प्रमोहमुपयान्ति मातरः ॥ ४१ ॥

रामः। हा तात ! हा मातरः ! हा जनक !—

धन्येन मया इत्यर्थः ; स्वनामग्रहणेन स्वस्याविमृश्यकारित्वं निःस्नेहत्वञ्च व्यक्तीकृतमिति ज्ञेयम ; किं दुष्करम ? किमिह दुःसाध्यमस्ति ? सर्व्वमप्येतेन जनेन कर्त्तुं योग्यं सहनीयञ्चेत्यर्थः ; येन निरपराधा पतिव्रता सीता परित्यक्ता, तस्य किमप्यकार्य्यं नास्तीति भावः । [अत्र रामस्य सर्व्वकार्य्यकरणसमर्थत्वरूपकारणेन, दारुणशोकसमयेऽपि अविदारणरूपकार्य्यस्य समर्थनात् कारणेन कार्य्यसमर्थनरूपोऽर्थान्तरन्यासालङ्कारः]। शार्द्दूलविक्रीडितं वृत्तम ॥ ४० ॥

अथेदानीं सीताशोकविकलेन्द्रियस्य रघुमणेः तथाभूतं शोकोच्छ्वासं प्रस्तावान्तराक्षेपेणोपसंहर्त्तुं शीर्णदेहं रामभद्रमवलोक्य शोकात विमूर्च्छितानां गुरुजनानां प्रमोहं नेपथ्यभाषणेनावतारयति, अनुभावेति ।—अनुभावमात्रेण केवलेन नैसर्गिकशारीरिकतेजोविशेषेण, समुपस्थिता विद्यमाना, श्रीः कान्तिः यस्य तथोक्तं, लावण्यमात्रावशेषं न तु पूर्व्ववत् दैहिकपीनत्वादियुक्तमित्यर्थः, ईदृशम् एवंविधं, सीतावियोगेन नितरां शीर्णकायमिति यावत्, रघुनाथं रामं, सहसैव अकस्मादेव, वीक्ष्य अवलोक्य, प्रथमं प्रागेव, प्रमूढस्य विलुप्तचैतन्यस्य, जनकस्य विदेहराजस्य, प्रबोधनात् चैतन्यलाभात, अनन्तरमिति शेषः, विधुराः विवशाः, मातरः रामजनन्यः, कौशल्येत्यर्थः ; विलापावसरे राघवेण केवलं कौशल्याया एव नामग्रहणेन तस्या एवात्रागमनस्य सूचितत्वात ; [अत्र गौरवात् बहुत्वं ज्ञेयम्] ; प्रमोहं मूर्च्छाम्, उपयान्ति गच्छन्ति ; तत्तत्स्थानेषु तावत् कालं पर्य्यटतः श्रीरामचन्द्रस्य सीतायाः कृते दुर्विषहशोकसमुदयात् छायामात्रावशेषं शरीरकार्श्यं समजनि; दूरादेव तद्दृष्ट्वा प्राक् राजर्षिः जनकः मोहमुपागतः, कथञ्चिच्च तस्मिन् संज्ञामुपगमिते राममाता कौशल्याऽपि विमूर्च्छिताऽभूदिति तु समुदितवाक्यार्थः । [अत्र अनुभावमात्रेत्याद्युक्त्या गम्यार्थस्य सीताशोकविधुरस्य रामचन्द्रस्य शोकाधिक्यस्य भङ्ग्या प्रतिपादनात् पर्य्यायोक्तमलङ्कारः]। मञ्जुभाषिणी वृत्तम् ॥ ४१ ॥

जनकानां रघूणाञ्च यत् कृत्स्नं गोत्रमङ्गलम्।
तस्मिन्नकरुणे पापे वृथा वः करुणा मयि॥ ४२॥

यावत् सम्भावयामि। (ङ) [इति उत्तिष्ठति]।

कुशलवौ। इत इतस्तातः। (च)

[सकरुणं परिक्रम्य निष्क्रान्ताः सर्वे]। (छ)

इति कुमारप्रत्यभिज्ञानो नाम षष्ठोऽङ्कः॥ ६॥

अथ वृथाऽपवादभयात् रघुकुलनक्षत्रीभूतायां सीतायामन्याय्यमाचरितरि अतीवाधन्ये स्वस्मिन् कृपापात्रत्वाभावमुपदर्शयति, जनकानामिति।—जनकानां जनकवंशीयानां, रघूणाञ्च रघुवंशीयानाञ्च, यत् सीतारूपं वस्तु, कृत्स्नं समग्रं, गोत्रयोः वंशयोः, रघुजनककुलयोरित्यर्थः, मङ्गलं शुभं, ययैव हि सदा जनकाः रघवश्च मङ्गलवन्तः अभवन् इत्यर्थः, तस्मिन् रघुजनककुलयोः सर्व्वमङ्गलनिदाने सीतारूपे वस्तुनि, अकरुणे निर्द्दये, अतिनृशंसकर्म्मचारिणि इति यावत्; पूर्णगर्भावस्थायां विनापराधं तस्याः हिंस्रकसङ्कुले वने निर्व्वासनादिति भावः; अत एव पापे पापकारिणि, दुष्टे इत्यर्थः, मयि रामे, वः युष्माकं, करुणा दया, वृथा निष्फला; ईदृशक्रूरकर्म्मविधायिजनो न हि भवति भवतामनुकम्पाभाजनमिति भावः। [यतो हि अहम् अकरुणः पापश्च, अतो मयि वः करुणा वृथा, इति करुणाभावं प्रति अकरुणत्वस्य पापत्वस्य च हेतुभूततया उपन्यासात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारः, अपि च गोत्रदीपस्थानीये सीतारूपे वस्तुनि गोत्रमङ्गलत्वस्य अभेदाध्यासात् निरङ्गं रूपकमित्यनयोः तिलतण्डुलवत् संसृष्टिः]। पथ्यावक्त्रं वृत्तम्॥ ४२॥

(ङ) यावत्—वाक्यालङ्कारे। सम्भावयामि—स्वयं गत्वा समागतान् गुरुजनान् प्रणिपातादिना संवर्द्धयामि, शोकविमूर्च्छितान् तातप्रभृतीन् प्रीणयामीति वा भावः। [अत्र भविष्यदर्थे "यावत्पुरा—" (३।३।४ पा०) इति लट्]।

(च) तातः,—पितृवत् पूजनीयः भवानित्यर्थः। ("पुत्रे पितरि पूज्ये च तातशब्दः प्रयुज्यते" इति नियमात्) इतः इतः,—अस्मिन्नेव पथि, पथाऽनेनेत्यर्थः, समागच्छतु इति शेषः।

(छ) सकरुणं—सशोकम्। परिक्रम्य—परिभ्रम्य, कियत्पदपादविक्षेपं कृत्वेत्यर्थः। निष्क्रान्ताः,—गताः, रङ्गात् प्रचलिता इत्यर्थः।

——:०:——

अथ षष्ठाङ्कस्य सङ्क्षेपः।

विष्कम्भके विद्याधरमिथुनं दिव्यं विमानमधिरुह्य रङ्गमाजगाम। विद्याधरस्तु स्वां प्रियां रणप्रचण्डयोः कुमारयोः भीषणमायोधनं प्रदर्शयितुमारेभे। दिवि च देवाः कुमारयोरनयोः श्रेयसे दुन्दुभिं विनेदुः। निपेतुश्च तदा तयोः शिरसि अनवरतमेव मकरन्दरम्याणि कुसुमानि। अथ विद्याधरी प्राह, कथं हि सहसा अम्बरतलं तडित्प्रभापिङ्गलमाभाति? इति। विद्याधरस्तु प्रत्याह, समारोपितः किमु अद्य त्वष्ट्रा शाणयन्त्रे मार्त्तण्डः! उत वा समुन्मीलयति जगत्संहारार्थं तृतीयं लोचनं भगवान् नीललोहितः! येन हि अलौकिकः तेजसां राशिः नभोमण्डलं समुद्भासयतीति। क्षणं विचिन्त्य पुनराह, आं ज्ञातं, वत्सेन चन्द्रकेतुना आग्नेयास्त्रमभिप्रयुक्तं, तस्मादेवैषा पावकप्रभा समाविर्भवतीति, यतो हि तदस्त्रप्रभाभिः कर्बुरितकायैः वैमानिकानां विमानमण्डलैः दाहभयात् द्रुतं पलायितमेव, अहमपि प्रचण्डाग्निज्वालातः स्वप्रियामात्मानञ्च संरक्षितुं सुदूरमपसरामीति उक्त्वा तथा अकरोत्। तदा पत्युः सुशीतलाङ्गसंस्पर्शेन प्रशमितानलसन्तापा विद्याधरी प्राह, कथं हि विद्युद्विलासपरिशोभितैः श्यामलैः नवजलधरैः नभस्तलं सहसा समाकीर्य्यते? इति। तदाकर्ण्य विद्याधरः आह, अहो! कुमारलवेन वारुणास्त्रं सम्प्रयुज्य पावकास्त्रं प्रशमितमिति। पुनराह, हन्त भोः! प्रगाढान्धकारनिमग्नमिव भूतजातमिदानीं प्रतिपते, यतो हि कुमारचन्द्रकेतुना वायव्यास्त्रमीरितं, तेन च मरुता, ब्रह्मविद्यया ब्रह्मणि विवर्त्तानामिव, भूयसां मेघानां सहसा विलयः संजनित इति। अत्रान्तरे अपृच्छत् विद्याधरी, को हि महापुरुष इदानीं दूरत एव युद्धव्यापारविरतिमुपदिशन् कुमारावन्तरा विमानमवतारयति? इति। तद्दृष्ट्वा विद्याधरः आह, भगवान् रघुपतिः शम्बूकवधादिदानीं प्रतिनिवृत्तः; तेन हि तद्गौरवात् कुमारौ युद्धकर्म्मणः त्वरितमेव व्यरंसिष्टाम्। अधुना सुतसमागमेन राज्ञः रामभद्रस्य शुभं भूयादित्युक्त्वा शुभमनुध्यायन् विद्याधरः पत्न्या सह रङ्गान्निरक्रामीति।

अथ पुष्पकविमानादवतीर्य्य रामः चन्द्रकेतुमाह, वत्स! द्रुतमागत्य मां सुदृढं परिष्वजस्व, तव सुशीतलाङ्गानां संस्पर्शेन मम चित्तदाहः प्रशममुपगच्छत्विति। ततः, आर्य्य! अभिवादये इत्यभिधाय राममभिववन्दे चन्द्रकेतुः। अपि कुशलं दिव्यास्त्रधारिणः तव देहस्य? इति पृष्टवति रामे, अत्यद्भुतकर्म्मणः लवस्य लाभादेव मे कुशलं,

तेन हि मामिवेमं वीरमपि भवान् सस्नेहं पश्यत्विति चन्द्रकेतुराह। कुमारं लवमवलोक्य राम आह, अहो! जगत् रक्षितुमेवावतीर्णः मूर्त्तिमानस्त्रवेद इव, वेदनिधिरक्षार्थे धृतकायः क्षात्त्रधर्म्म इव, सामर्थ्यसमुदाय इव, गुणनिचय इव, पुण्यराशिरिव चायं वीरपोत इति। अथ लव आह, पुण्यदर्शनोऽयं महापुरुषः, स्नेहभक्तीनामेकाधारभूतः मूर्त्तिमान् धर्म्मप्रकर्ष इवेति। आश्चर्य्यम्!! इदानीं विरोधः कुतोऽप्यपसृतः, निर्वृतिघनरसश्च प्रसरति, औद्धत्यञ्च सुदूरपराहतमेव, अवनमयति च मां विनयनस्वभावः, महापुरुषमिमञ्च दृष्ट्वा आत्मनि नाहं प्रभवामि, अहो! पुण्यक्षेत्राणामिव महतामलौकिकं माहात्म्यमिति। अथ रामः आह, कथं मे सहसा सर्वाण्येव दुःखानि विलुप्तानि? स्नेहश्च मेऽन्तरात्मानं विद्रावयति? एष हि कारणान्तरजन्यः इति लोकोक्तिः अलीकेवेति, यतः सूर्य्योदये कमलमेव विकाशमेति, चन्द्रोदये च चन्द्रकान्तमणिर्विगलति, केनापि तु आन्तरेण हेतुना इमे पदार्थाः परस्परं स्नेहपाशसंयताः भवन्ति, किञ्चिदपि कारणं तेषां नाभिज्ञायते, यतः हि स्नेहाः वाह्यानि कारणानि न समाश्रयन्तीति।

लवस्तु चन्द्रकेतोर्वचनात् ज्येष्ठतातपादा इमे इति विदित्वा, अहो! सुप्रभातमद्य, यतः देवो रघुमणिः दृष्ट इति कथयित्वा सविनयं पुनराह, तात! लवो भवन्तमभिवादयते इति। ततः रामः सस्नेहमाह, आयुष्मन्! एह्येहि, मां सुदृढ़ परिष्वजस्व, चन्दनसारसुकुमारस्तेऽङ्गसंस्पर्शः मां नितरां नन्दयतु। तदाकर्ण्य लवः पुनरभिदधे, अश्वरक्षिणां मुखात् तत्रभवतां वीरत्वगाथामुपश्रुत्य स्ववीरत्वप्रदर्शनजनितां मे वालिशतां क्षम्यन्त्विति। नन्वयमलङ्कार एव क्षत्त्रस्य, यथा सूर्य्यकान्तमणिः दिनकरकिरणैः समुत्तापितः तेजांसि वमति, तथैव महान्तः तेजस्विनः स्वभावादेव परेषां तेजः न विषहन्ते इत्यभिधाय, जृम्भकास्त्रप्रभावेण चित्रलिखितानीवावस्थितानि स्वसैन्यानि विलोक्य रामः तदस्त्रजातमुपसंहर्त्तुं लवमादिदेश। स तु तथैवाकरोत्।

अथ रामः जृम्भकास्त्राणां स्वसम्प्रदायमुपवर्ण्य लवं तत्सम्प्रदायमपृच्छत, तन्मुखात् तदस्त्राणां स्वत एव प्रकाशमधिगत्यासामान्यपुण्यप्रभावादेव एतेषां सम्भवोऽपि भवितुं शक्नुयादिति कियत्कालमनुदध्यौ। ततः प्रसङ्गक्रमेण तौ तु यमजौ विदित्वा, को हि नानायं द्वितीयो भवतीति अजिज्ञासत। अपि च नेपथ्ये कुशस्य भाण्डायनं प्रति क्षात्त्रवीर्य्यप्रकर्षसंसूचिकां सगर्वोक्तिं समाकर्ण्य आह, को हि नामायं वीरपोतः नवजलधरगम्भीरध्वनिना मे हर्षं समुत्पादयति? इति। ततः लवमुखादिमं ज्यायांसं भ्रातरं कुशं भरताश्रमात् प्रतिनिवृत्तमाकर्ण्य पुनराह, आयुष्मन्नितः समाह्वयेति।

अत्रान्तरे कुशः महनीयकीर्त्तिभिरादित्यवंशीयैः नृपतिभिः विग्रहं स्वगौरवसूचकमभिमन्य धनुरास्फालयितुमारेभे। रामस्तु धीरोद्धतगतिसमलङ्कृतं तदीयमसामान्यं वीर्य्यं विलोक्य परं मुमुदे। तदा लवस्तु कुशस्य समीपमागत्य रघुमणेः तद्दर्शनेच्छां तं विज्ञापितवान्। कुशस्तु रामायणकथापुरुषं वेदगोपायितारं दुःखदर्शनं रघुमणिमवलोक्य परं पिप्राय, चन्द्रकेतौ भ्रात्रा सखिभावसंस्थापनात् तत्सम्पर्केण धर्म्मतातवदमुं राघवं सवर्द्धितवांश्च। रामस्तु तं निर्भरं परिष्वज्य पुत्रसमालिङ्गनवत् परां निर्वृतिमधिजगाम। ततश्च सर्वे कियत्कालं प्रच्छायावहुले शालतले समुपविश्य गोष्ठीसुखमनुबभूवुरिति।

अथ रामः राजलक्ष्मीविलाससुशोभितं कुशलवयोः निसर्गकान्तं कलेवरं वीक्ष्य, रघुकुलकुमारवर्द्धितयोः प्रसन्नस्निग्धस्मितवीक्षणं मङ्गलमृदङ्गगम्भीरध्वनिश्च भवतीति विभाव्य, स्वशरीरसंवादिनीमाकृतिं जनकसुताऽनुरूपामङ्गसङ्घटनाञ्च समवलोक्य, तदा सीतायाः श्रीमदङ्गलावण्यं पुनः प्रत्यक्षीकृतवानिवेत्यमन्यत ; किञ्च एतर्हि सीतानिर्वासनस्थानं स्वतःप्रकाशानि चैतयोः जृम्भकास्त्राणि, प्राक् स्वयं समोचितं द्विधाप्रतिपन्नं सीतायाः गर्भभारमित्यादिकं तदा मनसा समालोच्य विह्वलः सन् भृशं रुरोद च। तदा लवः रामस्य मेघावश्यायसिक्तं पुण्डरीकमिवाश्रुसलिलाप्लुतमाननमवलोक्य विस्मयान्वितो बभूव, तात ! किमेतदित्यपृच्छच्च। तदाकर्ण्य कुशः आह, वत्स ! रामायणं सम्यगधीत्यापि कथमेवमनभिज्ञ इव जिज्ञाससे ? देवीं सीतां विना रघुपतेः किमपीह सुखकरं नास्ति, तादृशप्रणयात् परममुं दुर्विषह एतादृक् वियोगो जगत् जीर्णारण्यप्रायमनुभावयतीति।

अथ रघुपतिः वाल्मीकिसरस्वतीनिस्यन्दभूतां रामायणकथां श्रोतुमभिललाष। ततः कुशमुखात् बालचरितस्यान्तिमौ द्वौ श्लोकौ समाकर्ण्यात्यधिकां मर्म्मव्यथामापत्। हा वैदेहि ! तदा किल त्वमेवमेवासीरित्युक्त्वा समधिकं विलपितवान्। कुशस्तु तदा पुनः मन्दाकिनीचित्रकूटवनविहारावसरे देवीं सीतां प्रति रघुपतेः श्लोकान्तरमपठत्। मुग्धस्यारण्यचरस्य शिशोर्मुखात् तदाकर्ण्य रामः सीतां संस्मृत्य विललाप, सवाष्पगद्गदम् उवाच च, हा देवि ! स्मरसि किमु तस्य देशस्य ? यत्र तु मन्दाकिनीमरुता तव श्रमाम्बूनि निःशेषमेव विशोषमुपगतानि, अलकजालकानि च कुङ्कुमरागवान्निसर्गरम्ये त्वन्मुखचन्द्रे परिपत्य क्षणं तदीयां प्रभां पर्य्याकुलामकरोदिति। अपि चाह, अहो ! सुचिरमनुध्यानात् प्रवासेऽपि प्रियजनेन कल्पनाप्रसूतेन सता पुरतः स्थीयते इवेत्यभिमन्यते विरहिजनः, विकल्पे विनिवृत्ते च तेन पुनः जगत् जीर्णारण्यप्रायमनुभूयते, हृदयञ्च तस्य तुषानलेन विदह्यते इवेति।

अथ नेपथ्ये वशिष्ठादयः महर्षयः देव्या कौशल्यया अरुन्धत्या च सह शिशुकलहं समाकर्ण्य त्वरितमागन्तुमभिलषन्तोऽपि जराग्रस्ततया सुचिरेणैव कालेनाव समायान्तीति कलरवमाकर्ण्य राघवः प्राह, कष्टं भोः! कष्टं, गुरुजनाः विशन्तस्तु तातजनकोऽपि सीताविवासनदेशं सममेव द्रष्टव्यः इति भृशं वज्रेणाभिताड़ितोऽस्मि मन्दभाग्यः। इत्थमभिदधदेवासौ पुनः, अहो! प्राक् वैवाहिकसम्बन्धप्रमुदितानां वशिष्ठादीनां जनकादीनाञ्च विवाहमङ्गलमहोत्सवे समागमं पश्यन्निदानीं पितृसखस्य जनकस्यातिनिर्विषण्णस्य सीताविवासनस्थले ईदृशीं शोचनीयामवस्थामवलोकयन्नहं हतदैवः कथं सहस्रधा न विदीर्ये? इत्युक्त्वा बहुधा व्यलपत्। अथ सीतावियोगपरि-क्लेशस्य रघुपतेरीदृशीमनुभावमात्रैकगम्यां शरीरश्रियं विलोक्य विधुराः मातरः गुरु-जनाश्च सपदि प्रमोहमुपगताः इति नेपथ्यभाषितमाकर्ण्य रामः, हा तात! हा मातरः! हा जनक! एतस्मिन् पापे जनकरघुकुललक्ष्मीपरिहारके मयि भवतां करुणा ह्येवेति समाश्वासनार्थं तदन्तिकमगात्।

इत्यशेषशास्त्राटवीसञ्चरणपञ्चानन-कुलपतिकल्प-"बि, ए" इत्युपनामक-
श्रीमज्जीवानन्दविद्यासागर-भट्टाचार्यविरचितायां, तदात्मजाभ्यां
श्रीमदाशुबोधविद्याभूषण-श्रीमन्नित्यबोधविद्यारत्नाभ्यां
परिवर्त्तित-परिवर्द्धितायां सुखबोधिनीसमा-
ख्यायाम् उत्तररामचरितव्याख्यायां
षष्ठोऽङ्कः॥ ६॥

अथ सप्तमोऽङ्कः ।

लक्ष्मणः । भो भोः ! भगवता खलु वाल्मीकिना सब्रह्मक्षत्र-पौरजानपदाः प्रजाः सहास्माभिराहूय कृत्स्न एव सदेवासुर-तिर्य्यगुरगनायकनिकायो जङ्गमः स्थावरश्च भूतग्रामः स्वप्रभावेण सन्निधापितः । आदिष्टश्चाहमार्य्येण,—"वत्स लक्ष्मण ! भगवता वाल्मीकिना स्वकृतिमप्सरोभिः प्रयुज्यमानां द्रष्टुमुपनिमन्त्रिताः स्मः ; तद्गङ्गातीरमातोद्यस्थानमुपगम्य क्रियतां समाजसन्निवेशः" इति । कृतश्च मर्त्त्यामर्त्त्यस्य भूतग्रामस्य समुचितस्थानेषु समुपवेशनं मया । (क) अयन्तु,—

(क) अथ वियोगान्तनाटकोपवर्णनस्य आलङ्कारिकजनाचारविरुद्धतया तत्रभवान् भवभूतिः तन्मतं सर्व्वथाऽनुवर्त्तमानः वास्तविकवियोगान्तमपि रामचरितं काल्पनिकवृत्तोपन्यासेन मिलनान्तरूपतया समापयितुं विष्कम्भकरूपलक्ष्मणवाक्यमूलेन स्वोपस्थापितवृत्तमवतारयति, भो भोः इति ।—भो ! भोः !—इति स्वानुचराणां सम्बुद्ध्यर्थकमव्ययम् । सब्रह्मेति ।—ब्रह्मभिः,—ब्राह्मणैः, ("ब्रह्मतत्त्वतपोवेदे न द्वयोः पुंसि वेधसि । ऋत्विग्योगभिदोर्विप्रे" इति मेदिनी) क्षत्त्रैः,—क्षत्त्रियैः, पौरैः,—नागरिकैः, जानपदैः,—जनपदवासिभिश्च सह वर्त्तमानाः याः ताः, प्रजाः,—प्रकृतिपुञ्जान् । अस्माभिः,—साङ्गैः राजपरिजनैरित्यर्थः । सह—सार्द्धम् । आहूय—आमन्त्र्य । कृत्स्न एव—समग्र एव । सदेवेति ।—देवाः,—अमराः, असुराः,—दितिसुताः, तथा तिर्य्यञ्चः,—पशवः पक्षिणश्च, उरगाः,—सर्पाश्च तेषां तेषु वा ये ये नायकाः,—मुख्याः, ("नायको नेतरि श्रेष्ठे हारमध्यमणावपि ।" इति वैजयन्ती) तेषां निकायः,—समूहः, ["सङ्घे चानौत्तराधर्य्ये" (३।३।४२ पा०) इति घञन्तस्य चिनोतेः समूहार्थे कादेशः । "निकायस्तु पुमान् लक्ष्ये सधर्म्मिप्राणिसंहतौ । समुच्चये संहतानां निलये परमात्मनि ॥" इति मेदिनी) तेन सह वर्त्तमानः । जङ्गमः,—गमनशीलः, मनुष्यादिः इत्यर्थः । स्थावरश्च—स्थितिशीलश्च, पर्व्वतादिश्चेत्यर्थः । (एवम्भूतः) भूतग्रामः,—भूतानां—जङ्गमस्थावरात्मकजीवाजीवानां, ग्रामः,—समूहः ।

राज्याश्रमनिवासेऽपि प्राप्तकष्टमुनिव्रतः।
वाल्मीकिगौरवादार्य्य इत एवाभिवर्त्तते ॥ १ ॥

स्वप्रभावेण—स्वकीयतपोमहिम्ना। सन्निधापितः,—संस्थापितः, एकत्र सन्निवेशित इत्यर्थः; स्थावराणां सन्निधानन्तु तत्तदधिष्ठातॄणां सन्निधानेनेति ज्ञेयम्। आदिश्य—आज्ञाप्य। आर्य्येण—पूज्येन, रामचन्द्रेणेत्यर्थः। स्वकृतिं—स्वस्य—आत्मनः, कृतिं—रचनां, दृश्यकाव्यविशेषरूपामित्यर्थः। अप्सरोभिः प्रयुज्यमानाम्—उर्व्वशीप्रभृतिभिरभिनीयमानाम्। उपनिमन्त्रिताः स्मः,—आहूता भवामः, वयमिति शेषः, भगवता वाल्मीकिना इत्यन्वयः। तत्—तस्मात्। गङ्गातीरं—सुरधुनीतटम्। आतोद्यस्थानं—चतुर्व्विधवाद्यविशेषस्थानं, रङ्गमित्यर्थः। ("ततं वीणादिकं वाद्यमानद्धं मुरजादिकम्। वंश्यादिकन्तु सुषिरं कांस्यतालादिकं घनम् ॥ चतुर्व्विधमिदं वाद्यं वादित्रातोद्यनामकम् ॥" इत्यमरः)। उपगम्य—प्राप्य। क्रियतां—विधीयताम्। समाजसन्निवेशः,—समाजस्य—सदसः, सन्निवेशः,—संस्थापनम्, अभिनयं द्रष्टुं समागतानां देवासुरादिसामाजिकसङ्घानां सुखोपवेशनयोग्यं रमणीयं रङ्गविरचनमित्यर्थः। मर्त्त्यामर्त्त्यस्य—मर्त्त्यस्य—मरणधर्म्मवतः मनुष्यादेः, तथा अमर्त्त्यस्य—अमरस्य। भूतग्रामस्य—प्राणिनिचयस्य। समुचितस्थानेषु—यथायोग्यप्रदेशेषु, गुणसम्माननाद्यनुरूपस्थलेषु इति यावत्। समुपवेशनं—संस्थापनम्; इक्ष्वाकुवंशीयानां गुणग्रामविशेषगुम्फितां प्राचेतसकृतिं द्रष्टुं समागताः सर्वे एव प्रेक्षकाः मया यथायोग्यस्थानेषु गुरोराज्ञाऽनुसारतः सन्निवेशिता इति भावः।

अथेदानीं भगवतो रघुमणेः स्ववंशप्रशस्तिं वाल्मीकिरचितां श्रोतुं तत्स्थलसमागममाह, राज्याश्रमेति।—राज्य प्रजापालनरूपं राजकर्म्म, स एव आश्रमः गार्हस्थ्याश्रम इत्यर्थः; राज्यरूपः अतिविशालगृहस्थजनाश्रम इति भावः; तत्र यः निवासः अवस्थानं तस्मिन्नपि; गृहमेधिधर्म्मं यथाविध्यनुतिष्ठतः भगवतः रघुमणेः राजत्वात् तदनुपालितस्थलस्य तदीयाश्रमत्वेनाभेदारोपः कृत इति ज्ञेयम्; गृहस्थजनोचिते स्थले निवासं कृतवत्यपीति भावः; प्राप्तकष्टमुनिव्रतः प्राप्तं स्वीकृतं, कष्टं क्लेशकरं, मुनिव्रतं दाराद्युपभोगविनिवृत्तत्वेन मुनीनामिव व्रतं कृच्छ्रसाध्यः नियमविशेषः येन तथाविधः; गृहमेधिप्रवरोऽपि स्त्र्यन्तरपरिग्रहमकृत्वा मुनिवत् यमनियमाद्यवलम्बनपूर्व्वकं निर्विकारतया स्थित्वा केवलं राजधर्म्ममनुपालयन् आहारविहारादिविविधभोगसाधनसामग्रीतः सर्व्वथैव विनिवृत्ततया संस्थित इति भावः; आर्य्यः रामः, वाल्मीकिगौरवात् वाल्मीकौ यत् गौरवं सातिशयसमादरः तस्मात्; तस्मिन् मुनिप्रवरे निरतिशयभक्तिमत्त्वादिति

[ततः प्रविशति रामः]।

रामः। वत्स लक्ष्मण ! अपि स्थिता रङ्गप्रेक्षकाः ? (ख)

लक्ष्मणः। अथ किम् ?

रामः। इमौ पुनर्वत्सौ कुशलवौ चन्द्रकेतुसदृशीं स्थान-प्रतिपत्तिं लम्भयितव्यौ। (ग)

लक्ष्मणः। प्रभुस्नेहप्रत्ययात् तथैव कृतम्। इदन्तु आस्तीर्णं राजासनमुपविशतु आर्य्यः। (घ)

भावः ; इत एव अस्मिन्नेव स्थले, मद्विरचितरङ्गस्थाने इति यावत्, अभिवर्त्तते आगच्छति ; सर्वविषयविद्वेषीऽपि केवलं भगवति वाल्मीकौ वहुमानात् अत्र रङ्गे समायाति, न तु अभिनयदर्शनकौतुकोपभोगार्थमिति भावः। [अत्र गृहिणां मुनि-जनोचिताश्रमानुपालनस्य असम्भवितत्वात् विरोधः, श्रीरामचन्द्रस्य अलौकिकमहिम-वत्त्वेन तत्परिहारात् विरोधाभासोऽलङ्कारः]। पथ्यावक्त्रं वृत्तम ॥ १ ॥

(ख) अपि—प्रश्ने। [रज्यते अस्मिन्नित्यर्थे रजतेः अधिकरणे घञ्] रङ्गः,—नाट्यभूमिः, तस्य प्रेक्षकाः,—दर्शकाः, सामाजिकजना इत्यर्थः। स्थिताः ?—यथा-योग्यस्थलेषु सुसुखमवस्थिताः किम् ? इत्यर्थः।

(ग) चन्द्रकेतुसदृशीं—चन्द्रकेतुसमानाम्। स्थानप्रतिपत्तिं—स्थानस्य—समुप-वेशनयोग्यस्य आसनस्य, प्रतिपत्तिं—समादरं, यथायोग्यासनप्रदानेन गौरवमित्यर्थः। लम्भयितव्यौ—प्रापयितव्यौ, यादृशे आसने चन्द्रकेतुरुपविशति, तादृशे आसने इमौ बालकौ कुशलवौ अपि समुपवेशनीयावित्यर्थः। [लभतेः णिचि "लभेश्च (७।१।६४ पा०) इति नुमागमे कर्म्मणि तव्यप्रत्ययः, "लभेर्गत्यर्थत्वात् णिचि अणौ कर्त्तुः कर्म्मत्वाकर्म्मत्वे" (५ अधि० २ अ० ८ सू०) इति वामनोक्तौ प्राप्त्युपसर्ज्जनगत्यर्थत्वे तु अणिकर्त्तुः कर्म्मत्वमेवेति व्याख्यानरहस्यात् अत्र प्राप्त्युपसर्ज्जनगत्यर्थत्वात् अणिकर्त्तृ-भूतयोः कुशलवयोः कर्म्मत्वं, कर्म्मणि चोक्तत्वेन प्रथमा ज्ञेया]।

(घ०) प्रभिर्वति।—प्रभोः,—जगत्पतेः भवतः, यः स्नेहः,—कुशे लवे च वात्सल्यं, तस्मिन् प्रत्ययः,—विश्वासः तस्मात्, कुशलवयोः भवतः तादृशं स्नेहं विलोक्येत्यर्थः। तथैव कृतं—भवत्कथनानुरूपम् अभिप्रायाभिज्ञेन मया प्रागेवानुष्ठितमित्यर्थः ; चन्द्र-केतुसदृशमेव आसनम् एताभ्यां प्रदत्तमिति भावः। आस्तीर्णम्—उपस्थापितम्, उपकल्पितमित्यर्थः। राजासनं—सिंहासनम्। उपविशतु—उपवेशनेनालङ्करो-त्वित्यर्थः।

रामः । [उपविशति । सर्वे चोपविशन्ति] ।

रामः । प्रस्तूयतां भोः ! (ङ)

सूत्रधारः । [प्रविश्य] । भो भोः ! भगवान् भूतार्थवादी प्राचेतसः सजङ्गमस्थावरं जगदाज्ञापयति,—"यदिदमस्माभिरार्षेण चक्षुषा समुद्वीक्ष्य पावनकरुणाद्भुतरसं किञ्चिदुपनिबद्धं, तत्र कार्य्यगौरवादवधातव्यम्" इति । (च)

(ङ) प्रस्तूयतां—प्रारभ्यतां, नाटकीयं वस्तु अभिनीयतामित्यर्थः ।

(च) सूत्रधारः,—सूत्रं—नाट्योपकरणादिकं, सप्तमाङ्कोदरप्रविष्टस्य गर्भाङ्कस्य इति शेषः, धारयति—प्रवर्त्तयति यस्तधीनः, "नाट्योपकरणादीनि सूत्रमित्यभिधीयते । सूत्रं धारयतीत्यर्थे सूत्रधारो निगद्यते ॥" इत्युक्तेः आमुखादिमतः गर्भाङ्करूपाभिनवनाटकीयवस्तुनः प्रवर्त्तकः नटविशेष इति यावत् ; "अङ्कोदरप्रविष्टो यो रङ्गद्वाराऽऽमुखादिमान् । अङ्कोऽपरः स गर्भाङ्कः सवीजः फलवानपि ॥" इति दर्पणात् । भो भोः !—इति सामाजिकजनसम्बोधनं, हे प्रेक्षकसङ्घा इत्यर्थः । भूतेति ।—भूतम्—ऋतं, सत्यमित्यर्थः, ("युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु" इत्यमरः) अर्थं—वस्तु, वदितुं—कथयितुं शीलमस्येति तथोक्तः, यथार्थभाषी इत्यर्थः । प्राचेतसः,—वाल्मीकिः । सेति ।—जङ्गमैः,—गतिमद्भिः मनुष्यादिभिः, स्थावरैः,—स्थितिशीलैः वृक्षलतादिभिश्च सह वर्त्तमानं यथा तथेत्यर्थः ; अचेतनेषु स्थावरेषु भगवतो वाल्मीकेः आज्ञापनं तत्तदधिष्ठातृषु ज्ञेयम्, अतो न विरोधः ; जगत्—सचराचरं विश्वम् । आज्ञापयति—आदिशति । किं तत् ? एतदेवाह, यदिति ।—यत्—यस्मात् कारणात् । अस्माभिः,—मयेत्यर्थः । [अविशेषणत्वेनावास्मदः बहुत्वम्] आर्षेण—ऋषिसम्बन्धिना, अतीन्द्रियेण इत्यर्थः ; भूतं भविष्यत् वर्त्तमानञ्च विषयजातं सममेव प्रत्यक्षीकुर्व्वतेति भावः । चक्षुषा—नेत्रेण ; योगजसन्निकर्षेण सर्व्वार्थदर्शकेन ज्ञानमयेन वीक्षणेनेति भावः । समुद्वीक्ष्य—सम्यगवलोक्य ; यद्यद्वीक्षितं तत् सर्व्वमेव पूतं निःसन्दिग्धं कलङ्कलेशविनिर्मुक्तञ्च ज्ञेयमित्याशयः । पावनेति ।—पावनः,—अतिपवित्रः, दर्शनश्रवणादिनाऽन्येषामपि पवित्रताविधायक इत्यर्थः, करुणाद्भुतरसः,—करुणः,—शोकस्थायिभावकः, सातिशयदुःखप्रद इत्यर्थः, अद्भुतः,—विस्मयस्थायिभावकः, रसः,—आस्वाद्यमानं वस्तु यत्र तादृशम्, अतिपवित्रं वियोगबहुलं सातिशयविस्मयकरञ्चेत्यर्थः । ("पावनं करुणाद्भुतरसञ्च" इत्यसमस-

रामः। एतदुक्तं भवति। साक्षात्कृतधर्म्माणः ऋषयः, तेषामृतसाराणि भगवतां परोरजांसि प्रज्ञानानि न क्वचिद् व्याहन्यन्ते इत्यनभिशङ्कनीयानीति। (छ)

पाठान्तरम्) किञ्चित्—रूपकमित्यर्थः। उपनिबद्धं—विरचितम। तत्र—रूपके। कार्यगौरवात्—कार्य्यस्य—विवर्णितवस्तुनः, गौरवात्—बहुमानात, तस्य अतीवादरणीयत्वादित्यर्थः। अवधातव्यं—मनः विषयान्तरात् विनिवर्त्त्य आग्रहं सन्निवेशयितव्यमित्यर्थः। इति—एवम्, आज्ञापयतीत्यनेनान्वयः। अस्य तात्त्विकोपनिबद्धतया एतादृशी प्रार्थना न दोषावहेति ज्ञेयम्।

(छ) एतत्—एवमित्यर्थः। उक्तं भवति—कथितं भवति, सूत्रधारेणेति शेषः; सूत्रधारेण भगवतो महर्षेः आशयः इत्थमेव व्यक्तीकृतः इति भावः। तस्य स्वयमेव निष्कृष्टार्थमभिदधाति, साक्षादिति।—साक्षात्कृताः,—प्रत्यक्षीकृताः, धर्म्माः,—अलौकिकश्रेयःसाधनरूपः यैः तथाभूताः, योगजसन्निकर्षेण सर्व्वार्थदर्शिनः इत्यर्थः; यद्वा—साक्षात्कृताः,—आर्षेण चक्षुषा प्रत्यक्षवत् परिज्ञाताः, धर्म्माः,—वस्तुतत्त्वं यैः ते तथोक्ताः। ["धर्म्मादनिच् केवलात्" (५।४।१२४ पा०) इति बहुव्रीहौ धर्म्मशब्दात् समासान्तः अनिच्प्रत्ययः]। अमृतसाराणि—अमृतस्येव—पीयूषरसस्येव, सारः,—उत्कर्षः येषां तानि, पीयूषरसवदतिसरलानि इत्यर्थः; यद्वा—अमृतस्य—मोक्षस्य, सारः,—स्थिरांशः येषु तानि, मोक्षलाभोपायभूतानि इति भावः; "ज्ञानान्मुक्तिः" इति शास्त्रसिद्धान्तः। परोरजांसि—परम—अतीतं, रजः,—रजोगुणः येभ्यः तानि, रजोगुणासम्पृक्तानि, रजसः पराणि इति वा अर्थः। रज इति तमसोऽप्युपलक्षणं, तेन सत्त्वगुणप्रधानानि इति यावत्। [राजदन्तादिवत् परनिपातः। "पारस्करप्रभृतीनि च संज्ञायाम" (६।१।१५७ पा०) इति परशब्दात् सुट् निपात्यते]। तेषां भगवतां—वाल्मीकिप्रभृतीनाम्। प्रज्ञानानि—प्रकृष्टतत्त्वज्ञानानि। क्वचित्—कुत्रापि, विष्वपि कालेष्वित्यर्थः। न व्याहन्यन्ते—न प्रतिहतानि भवन्ति। इति—अस्मात् हेतोः; एतेषां विशुद्धसत्त्वमयत्वादिति भावः। अनभिशङ्कनीयानि—न संशयितव्यानि; महर्षिभिः विज्ञानमयेन चक्षुषा यानि यानि हि प्रत्यक्षीकृतानि, तानि हि तत्त्वानि कुत्रापि अयथार्थभूतानि भवितुं नार्हन्ति, अतः महर्षिणा वाल्मीकिना यद्धि उपनिबद्धं, तत् सर्वं निःसन्दिग्धचेतसा गृहीतव्यं, कुत्रापि संशयः कियानपि न कार्य्यः इति भावः।

[नेपथ्ये]। हा अज्जउत्त ! हा कुमारलक्खण ! एआइणीं मंदभाइणीं असरणं अरण्णे आसण्णपसववेअणं हदासं सावदा मं अहिलसंति, साहं दाणिं मंदभाइणी भाइरहीए अत्ताणं णिक्खिवेमि । * (ज)

लक्ष्मणः । [आत्मगतम्]। कष्टं वतान्यदेव किमपि । (झ)

---

* हा आर्य्यपुत्र ! हा कुमारलक्ष्मण ! एकाकिनीं मन्दभागिनीम् अशरणा-मरण्ये आसन्नप्रसववेदनां हताशां श्वापदा मामभिलषन्ति, साऽहमिदानीं मन्दभागिनी भागीरथ्यामात्मानं निक्षिपामि ।

(ज) कुमारलक्ष्मणेन विजने वने वैदेह्याः निर्वासनानन्तरं तस्याः किं हि वृत्तं, तद्धि अभिनवभाविनीपवर्णयितुमिदानीं नेपथ्यभाषितमवतारयति, इति ।—हा आर्य्यपुत्र !—हा प्राणसलग्ने रघुमणे ! ; हा कुमारलक्ष्मण !—हा स्नेहास्पद सौमित्रे ! एकाकिनीं—द्वितीयरहितां, सहायहीनामित्यर्थः । मन्दभागिनीं—हतभाग्याम्; अशरणां—नास्ति शरणं—रक्षिता यस्याः तां, रक्षकहीनामित्यर्थः । आसन्ना—समुप-स्थिता, प्रसवस्य—गर्भमोचनस्य, वेदना—व्यथा यस्याः ताम् आसन्नप्रसववेदनां—प्राप्तप्रसवयन्त्रणामित्यर्थः । हताशां—हता—विनष्टा, आशा—जीवनाद्याकाङ्क्षा यस्याः तां, जीवनप्रत्याशारहितामित्यर्थः । मां—वैदेहीमित्यर्थः । श्वापदाः,—शुनः पदानि इव पदानि येषां ते, हिंस्रजन्तव इत्यर्थः । अभिलषन्ति—भक्षयितुमिच्छन्ति । साऽहम्—इत्थं निरुपाया अहम् । इदानीम्—अधुना, ईदृशे विपत्सङ्कुले समये इत्यर्थः । भागीरथ्यां—गङ्गायाम् । आत्मानं—स्वदेहम् । निक्षिपामि—परित्यजामि ; अधुना जीवनरक्षाप्रत्याशाया अभावात् हिंस्रकवदने स्वशरीरमनिक्षिप्य मातुः भागीरथ्याः सलिले आत्मानं विसर्ज्जयामीति भावः ।

(झ) कष्टम्- अतीव क्लेशकरमित्यर्थः । वत—खेदे ; अरुन्तुदमिदं नेपथ्यभाषण-मिति भावः । अन्यदेव—अस्माकं चिन्तितविषयात् भिन्नमेव । किमपि—अनिर्व्वच-नीयम् इत्यर्थः, एतदस्तु इति शेषः, मया यद्धि प्रागाकलितम्, एतत्तु तत् न भवती-त्यर्थः ; किमेतदभिनेयमित्यधुनाऽप्यस्माभिर्निर्णेतुं न शक्यते, परन्तु अतिदुर्विषह-मेतदिति विभावयाम इति भावः ।

सूत्रधारः।—विश्वम्भराऽऽत्मजा देवी राज्ञा त्यक्ता महावने।
प्राप्तप्रसवमात्मानं गङ्गादेव्यां विमुञ्चति॥ २॥

[इति सूत्रधारौ निष्क्रान्तः]।

रामः। देवि! क्षणमपेक्षस्व। (ञ)

लक्ष्मणः। आर्य्य! नाटकमिदं नाटकमिदम्। (ट)

नेपथ्यभाषितार्थं सूत्रधारः स्वयमेव विशदीकृत्य नाटकीयाऽऽमुखमुपसंहरति, विश्वेति।—राज्ञा नृपेण, रामेणेत्यर्थः, महावने भीषणे दण्डकारण्ये, त्यक्ता विसृष्टा, निर्वासितेत्यर्थः, विश्वम्भराऽऽत्मजा विश्वं निखिलं जगत, बिभर्त्ति धारयति या सा विश्वम्भरा पृथिवी, ["संज्ञायां भृतॄवृजि—" (३।२।४६ पा०) इति खच्प्रत्ययः]। तस्याः आत्मजा दुहिता, देवी सीता, प्राप्तप्रसवं प्राप्तः उपस्थितः, प्रसवः गर्भविमोचनकालः यस्य तथाविधम्, आसन्नप्रसवकालम्, उपस्थितप्रसववेदनं वेत्यर्थः, आत्मानं स्वदेहम्, ("आत्मा देहे धृतौ जीवे स्वभावे परमात्मनि।" इति विश्वः) गङ्गादेव्यां भागीरथीप्रवाहे, विमुञ्चति त्यजति; हिंस्रकादिभ्यः स्वापत्यविनिवृत्तये मातृसमायाः जाह्नव्याः शरणमाप्नोति, तेन आत्महत्यादिकृतः दोषः नाशङ्कनीयः इति भावः। इदन्तु आमुखं प्रयोगातिशयरूपं ज्ञेयम्। पथ्यावक्त्रं वृत्तम्॥ २॥

(ञ) देवि!—जानकि!। क्षणं—कियत्कालम्। ["कालाध्वनोरत्यन्तसंयोगे" (२।३।५ पा०) इति द्वितीया] अपेक्षस्व—विलम्बस्व; मां विहाय त्वमेकाकिनी कुत्रापि कदाऽपि नैव गता, अतः अधुनाऽपि त्वमेकाकिनी एव न गन्तुमर्हसि, यावत् अहमपि तवानुवर्त्ती भवामि, तावदपेक्षस्व इति भावः; मयि जीवति इदानीं न हि त्वमशरणा सती जाह्नवीजले आत्मानं विनिक्षेप्तुमर्हसि, अहमेव ते शरणं सर्वथा भविष्यामीति वा भावः। नेपथ्यभाषणश्रवणात् परं रामेणाप्येतत् व्यक्तीकृतं यदसौ प्राणसमां जानकीं मनसः न हि निर्वासितवानिति, तेन हि अनिशं तच्चिन्तया तादृशाभिनयश्रवणेन च इत्थं प्रलपितमित्यवधेयम्।

(ट) आर्य्य!—पूज्य रघुमणे!। इदं नाटकं—महर्षिवाल्मीकिविरचितं दृश्यकाव्यमेतत्; न हि तात्त्विकतया वैदेही इदानीं गङ्गायाम् आत्मानं निक्षिपति, प्राक् यद्धि भूतं तदेवोपनिबद्धं वस्तु इदानीम् अभिनीयते, अतस्तदर्थं विलापः तदुद्धरणप्रयासो वा कर्त्तुं नोचितः इति भावः। [अवधारणे द्विरुक्तिः]।

रामः । हा देवि ! दण्डकारण्यवासप्रियसखि ! एष ते रामाद्दैवदुर्विपाकः । (ठ)

लक्ष्मणः । आर्य्य ! दृश्यतां तावत् प्रबन्धार्थः । (ड)

रामः । एष सज्जोऽस्मि वज्रमयः । (ढ)

[ततः प्रविशत्युत्सङ्गितैकैकदारकाभ्यां पृथ्वीगङ्गाभ्यामवलम्बिता सीता] । (ण)

रामः । वत्स लक्ष्मण ! असंविज्ञातमनिबन्धनं तम इव प्रविशामि, धारय माम् । (त)

(ठ) दण्डकारण्यवासप्रियसखि !—दण्डकारण्ये—जनस्थानान्तर्गते जनशून्ये तदाख्ये वने, यो वासः,—वसतिः, तत्र प्रियसखि !—अनुकूलसहचरि !, एकमात्र-सहायभूते इत्यर्थः । ते—तव । एषः,—गङ्गायामात्मविसर्ज्जनरूप इत्यर्थः । दैव-दुर्विपाकः,—दैवस्य—दुरदृष्टस्य, दुर्विपाकः,—विषमयः परिणामः । रामात्—अधन्यात् मत्त एवेत्यर्थः, समजनि इति शेषः ; या त्वं सदा मत्समसुखदुःखा आसीः, अहमेव तथाभूतायाः ते सर्व्वांशाः विपत्तेः मूलम्, अतो मत्समो नास्ति अन्यः कृतघ्नः इति भावः ।

(ड) दृश्यताम्—अवलोक्यताम् । प्रबन्धार्थः,—प्रबन्धस्य—उपनिबद्धवस्तुनः, अर्थः,—विषयः ; इदानीं वृथाशोकं विजहीहि, यद्धि वृत्तं वस्तु, तदेव अधुना अभिनीयते, अतस्त्वं धैर्य्यमवलम्ब्य पर्य्यवलोकय इति भावः ।

(ढ) वज्रमयः,—कुलिशसमकठिनहृदयः, अतिनिष्कृप इत्यर्थः । एषः,—अयम्, अहमिति शेषः । सज्जः अस्मि—श्रोतुमेव व्यापारितः भवामि ; यद्यहं वज्रसमकठिनकायः न स्यां, तदा कथमेतादृशकठोरव्यापारश्रवणात् परमेव न शतधा विचूर्णितकायः भवेयम् ? तत् नूनं मत्समः नृशंसः नास्तीह कुत्रापीति भावः ।

(ण) उत्सङ्गितेति ।—उत्सङ्गितः,—क्रोड़देशे स्थापितः, एकैकः,—प्रत्येक-मेकमात्र एवेत्यर्थः, दारकः,—बालकः याभ्यां ताभ्याम्, एकमेकं दारकं स्ववक्षसि संस्थाप्येत्यर्थः । पृथ्वीगङ्गाभ्यां—वसुन्धराभागीरथीभ्याम् । अवलम्बिता—धृता । सीता प्रविशति—रङ्गस्थलमायातीत्यर्थः ।

(त) असंविज्ञातम्—अननुभूतस्वरूपम् । अनिबन्धनम्—[illegible]म्, आकस्मिक-मिति यावत् । तम इव—अन्धकारमिव । प्रविशा[illegible]म, [illegible] अभ्यन्तरं

गङ्गा।—समाश्वसिहि कल्याणि! दिष्ट्या वैदेहि! वर्द्धसे।
अन्तर्जलं प्रसूताऽसि रघुवंशधरौ सुतौ ॥ ३ ॥

सीता। [समाश्वस्य]। दिट्ठिआ दारए पसूदम्हि, हा अज्ज-उत्त! *(थ) [इति मूर्च्छति]।

लक्ष्मणः। [पादयोर्निपत्य]। आर्य्ये! आर्य्ये! दिष्ट्या वर्द्धामहे, कल्याणप्ररोहो रघुवंशः। [विलोक्य]। हा! हा! कथं क्षुभित-वाष्पोत्पीड़निर्भरः प्रमुग्ध एव आर्य्यः। (द) [इति वीजयति]।

---

* दिष्ट्या दारकौ प्रसूताऽस्मि, हा आर्य्यपुत्र!

यामि इत्यर्थः; अभिनयदर्शनेन एवमेव मोहमुपागतः यत्, निविड़ान्धकारमध्ये निमज्जितः एवाहमस्मि इति मन्ये इति भावः। मां धारय—हस्ताभ्यां मच्छरीरम् अवलम्बस्वेत्यर्थः। ["तमः" इत्यत्र "अन्धतमसम्" इति पाठे—अन्धयतीति अन्धं, तथाविधं तमः अन्धतमसं—गाढ़ं ध्वान्तमित्यर्थः। "अवसमन्धेभ्यः तमसः" (५।४।७९ पा०) इति समासान्तः अच्प्रत्ययः]।

अथ वियोगविधुरायाः सीतायाः भागीरथीकृतं समाश्वासनप्रकारमाह, समाश्वसिहीति।—हे कल्याणि! मङ्गलालये!, हे वैदेहि! सीते!, समाश्वसिहि समाश्वस्ता भव, दैन्यं विजहिहि धैर्य्यञ्च धेहि इत्यर्थः, दिष्ट्या भाग्येन, वर्द्धसे वृद्धिं गताऽसि, सौभाग्यवशेन पुत्रलाभाभ्युदयात् अधुना त्वं श्रेयस्विनी भवसीत्यर्थः, रघुवंशधरौ रघुकुलाङ्कुरावित्यर्थः, सुतौ पुत्रौ, अन्तर्जलं गङ्गाप्रवाहमध्ये इति यावत्, [जलस्यान्तः इति विभक्त्यर्थेऽव्ययीभावः, "तृतीयासप्तम्योर्बहुलम्" (२।४।८४ पा०) इति सप्तम्याः पाक्षिकः अमभावः ज्ञेयः] प्रसूताऽसि उत्पादितवती भवसि, पुत्रौ त्वया प्रसूतौ इत्यर्थः, यतस्त्वं पुत्रद्वयं प्रसूतवती, अतोऽतीव सौभाग्यवती भवसीति भावः। [अत्र आदिकर्म्मणि कर्त्तरि क्तप्रत्ययः]। पथ्यावक्त्रं वृत्तम् ॥ ३ ॥

(थ) दिष्ट्या—भाग्येन। दारकौ—पुत्रौ। प्रसूताऽस्मि—उत्पादितवती भवामि; पुत्रोत्पत्तिश्रव[illegible]समकालमेव क्षणम् अनिर्व्वचनीयहर्षस्य समुदयोऽभवत् इति दिष्ट्येत्युक्तं, ततश्च [illegible]सवसमये पतिः समीपे वर्त्तेत, तदा कियान् आनन्दोऽस्माकं [illegible] प्रियपतिविरहं संस्मृत्य तादृशपतिसमागमाभावजनित-[illegible]यम्।

[illegible] सर्वे सौभाग्ययुक्ता भवाम इत्यर्थः। कल्याणप्ररोहः,—

पृथ्वी। वत्से ! समाश्वसिहि समाश्वसिहि।

सीता। [समाश्वस्य]। भअवदि ! का तुमं इअं अ ? । * (ध)

पृथ्वी। इयन्ते श्वशुरकुलदेवता भागीरथी। (न)

सीता। भअवदि ! णमो दे णमो दे। †

भागी। चारित्रोपचितां कल्याणसम्पदमनुगच्छ। (प)

---

* भगवति ! का त्वमियञ्च ?

† भगवति ! नमस्ते नमस्ते।

कल्याण:,—शुभकर:, प्ररोह:,—अङ्कुरो यस्य स:, मङ्गलप्रदाङ्कुरसमन्वित इत्यर्थ:। रघुवंश:,—रघो:, वंश इव—वेणुविशेष इव, वंश:,—अन्ववाय:, रघुकुलरत्नाकर: माङ्गलिक: अङ्कुर: सञ्जात इत्यर्थ:; सीताया: तनयोत्पत्त्या रघुवंश: इदानीं प्रतिष्ठां गत इति भाव:। [अत्र कल्याणे स्वाभेदारोपकप्ररोहशब्दसाहचर्य्यात् वंशशब्दस्य श्लिष्टतया श्लिष्टपरम्परितरूपकालङ्कार:]। क्षुभितेति।—क्षुभितेन—अत्यर्थम् उद्वेल्लितेन, वाष्पाणाम—अश्रूणाम्, उत्पीड़ेन—पूरेण, निर्भर:,—प्रगाढ़:, प्रगाढ़तया आकुल: इत्यर्थ:, अजस्रं वाष्पायमाणनयन इति यावत्। प्रमुग्ध एव—मूर्च्छित एव। आर्य्य:,—राम:; अकारणसीतानिर्व्वासनजनितस्वदोषं संस्मृत्य नियतम् अश्रूणि विमुञ्चन्नेव रघुमणि: स्ववंशरत्नाकरं सीताया: दारकद्वयं प्रसूतमाकर्ण्य सहसा हर्षोदयात् धैर्य्यं धारयितुमपारयन् सपदि मोहमुपागत इति भाव:।

(ध) का त्वम् ?—अत्रभवती किन्नामधेया भवति ?, इयञ्च—एषा अपरा भवत्सङ्गिनी च, का इत्यन्वय:; किं हि नाम भवत्या अस्याश्च इति विज्ञातुमिच्छामीति भाव:; भागीरथ्यां देहविसर्ज्जनसमये ते हि देव्यौ तदीयतप:प्रभावात् सहसा आविरभूतां, तत्तनयञ्च रक्षितवत्यौ, तत्सर्वं प्रसवकाले मूर्च्छिता सा किमपि नाजानात, अत: सविशेषविज्ञानार्थं परिचाययति इति ज्ञेयम्।

(न) श्वशुरेति।—श्वशुरस्य—दशरथस्य, यत् कुलं—वंश:, तस्य देवता—अधिष्ठात्री देवी; महर्षिकपिलशापनिर्द्दग्धानां सगरसन्ततीनां समुद्धारकारिणी भगवती भागीरथी रघुकुलानामधिदेवतात्वेन विशेषत: उपास्या आ[illegible]इति ज्ञेयम्।

(प) चारित्रेति।—चारित्रेण—पातिव्रत्यसंरक्षणरूप[illegible]र्ग्यिता—[illegible]चिता— विवर्द्धिताम्। कल्याणसम्पदं—शुभसम्पत्तिं, मङ्गलसमृद्धिं [illegible] इत्यर्थ:; त्वं यादृशसच्चारित्रवती भवसि, तदनुरूप[illegible]म्, आकस्मिक[illegible] ("अधिगच्छ" इति पाठान्तरम्)। [illegible]नम[illegible]म, [illegible]: अभ्यन्तरं